प्रौढनिबन्धसौरभम्

विश्वनाथ मिश्रः

VN/1733

प्रौढनिबन्धसौरभम्

S. V. S. VIDYAPEETHA
JAMMU.
Book No. 22576
Call No ..

प्रणेता
आचार्यविश्वनाथमिश्रः
प्राचार्य :
राजकीयसंस्कृतमहाविद्यालयः
बीकानेरम् (राजस्थानम्)

Published with the financial assistance from the Ministry of Human Resource Development, Government of India.

सर्वेऽधिकारा लेखकाधीना:

प्रकाशक : विश्वनाथमिश्र:
कैलाशनिकुञ्जम् 6, रानीबाजार,
बीकानेरम् (राजस्थानम्)
प्रथमं संस्करणम् : 1988
मूल्यम् : 18.00 रु. अष्टादश रूप्यकाणि
मुद्रक : सांखला प्रिन्टर्स
बीकानेरम् (राजस्थानम्)

अनुक्रमणिका

S. R.K.S. VIDYAPEETHA
J 22576
Book No...
Call No

		पृष्ठम्
1.	कालिदासे सौन्दर्यतत्त्वम्	9
2.	मेघदूते अलका	15
3.	माघेपदलालित्यम्	19
4.	काव्यम्	24
5.	काव्यालोचने शाब्दोऽनुपात:	29
6.	काव्यत्वं संशीत्यविषय:	36
7.	संस्कृतसाहित्ये ध्वनिस्वरूपनिरूपणम्	40
8.	लक्षणावाद:	46
9.	व्यञ्जना	49
10.	व्यञ्जनाया: शब्दार्थवृत्तित्वविचार:	53
11.	रसस्य दार्शनिक भूमिका	63
12.	रसस्य शाब्दत्वमीमांसा	70
13.	मम्मटीयोपमालक्षणविमर्श:	78
14.	काव्यलिंगानुमानयो: शास्त्रीयसमीक्षा	83
15.	मुखं व्याकरणम्	90
16.	वैयाकरणसम्प्रदायेस्फोटपरम्परा	95
17.	समर्थ: पदविधि:	105
18.	व्याकरणे कर्मसंज्ञा	109
19.	कर्मकर्तृमीमांसा	113
20.	पाणिनिव्याकरणेनियमसूत्राणां परम्परा	118
21.	समासविमर्श:	122
22.	षष्ठीतत्पुरुषनिषेधप्रतिप्रसवयोर्विभिन्नव्याकरणानि	129
23.	क्रियास्वरूपविमर्श:	134
24.	आख्यातार्थविमर्श:	139
25.	विशेषणविभक्त्यर्थविचार:	143
26.	भेदान्वयविचार:	148
27.	एकार्थीभावो व्यपेक्षा च	152

28. शाब्दबोधप्रकिया 157
29. शब्दशास्त्रीयमेकं विवेचनम् 161
30. अक्षरविवेचने ऋकारऌकारौ 164
31. अवच्छेदकताविमर्शः 170
32. असंगसूत्राणि सभाष्याणि 173
33. जगन्मीमांसा 178
34. ख्यातिविमर्शः 182

समर्पणम्

येषां सदिच्छया सत्प्रेरणया चाधिसंस्कृतवाङ्मय
मुदियायाभिरुचिस्तेषां प्रातः स्मरणीयानां
पूज्यपादानां पितृश्रीरामकेशवमिश्र-
महोदयानां पुण्यस्मृतौ समर्पयति
पुस्तकमिदम्

विनीतः
विश्वनाथमिश्रः

पुरोवाक्

पिपठिषया विदग्धजनसन्दोहेषु, बुबोधयिषया संस्कृतवाङ्मयेष्वधीतिनः, प्रचिकासिषया विभिन्नपत्रपत्रिकादिषु लिखेलिमा ननु नैके निबन्धा व्यलिख्यन्त ! प्रायः शब्दशास्त्रीयाः काव्यशास्त्रीयाश्च विषयाः समुप्क्षिप्ताः पक्षत्वेन । न स्यादेतच्चर्वितचर्वणमित्याकलय्योद्भाविता भव्यापूर्वता ! स्फुटता न पदैरपाकृता, न च परित्यक्तमर्थगौरवमपि । स्फुटतया स्युर्बोधविषयाः शास्त्रीया विषया इत्यासीत् समीहा । दीर्घकालाभिव्यापिनीयमन्तर्यात्रा लेखनस्य । उपगताः प्राकाश्यं यत्र तत्र सर्वत्र नैकविधा निबन्धाः । किमुपकृतमेभिरिति बुधजनसन्दोहैकवेद्यम् ।

स्वातन्त्र्यसरिदवगाहमानेऽत्रदेशेऽनुकूले च मातरिश्वनि सर्वतो जेगीयमाने संस्कृतगौरवे, समुपलब्धे च साहाय्यराशौ प्राकाश्यमुपगतान्यशेषदेशेऽनेकानि पत्रपत्रिकादीनि । सुप्तोत्थितं नैपुण्यम् । क्वचित् प्राकाटि आदिकविप्रवाहिता कवितामन्दाकिनी निरन्तरं गतिमत्यद्यापीति । अपरत्र नोपगता विरामं रससिद्धकवीश्वरोपज्ञा काव्यनाटकाख्यानाख्यायिकारूपात्मिका हृद्यगद्यपद्योदञ्चिता रचनापरम्परेति प्रादर्शि ।

गन्तव्यमेकं पन्थानो नैकधा । सूत्रमेकं व्याख्या विभिन्नाः । विवेच्यविषयोऽप्येको विवेचनाऽनेकधा । अद्यत्वे विवेच्यन्ते शास्त्रीया विषयाः, लेलिख्यते बहुशः, विवेच्यतेऽनेकशः, पापठ्यते सोत्कण्ठम्, समाधीयते समनोयोगम् । एतदुपक्रमे लिखिता निबन्धा नूनमुपकरिष्यन्तीति प्रत्ययः । भवन्ति हि निबन्धाः स्फोरकाः कठिनतरविषयाणाम्, व्याख्यातारः सूक्ष्मरहस्यानाम्, प्रेरकाः चिन्तनधारायाः, आविष्कारकास्तत्त्वबोधस्य, उत्साहसमेधका लेखनपरम्परायाः, किं बहुना पाथेयकल्पाः संस्कृतपद्धतिमनुसरतां सारस्वतरसपीयूषपानचञ्चरीकाणामिति सूरयः ।

विमृश्य चैतत् सर्वं किमुपकरिष्यन्ति यत्र तत्र विकीर्णा निबन्धा इति जातो विचारः । नूनं देया पुस्तकाकारता चैषामिति समुदिता भावना । विलसति चेयं भावना मूर्तिमती पुरस्तात् सुरसरस्वतीसमर्चापरायणानां पुरस्तात् । वर्तते चात्र वैविध्यं लेखानाम् । सर्वे खलु शास्त्रीयाः । अध्ययनाध्यापनपथमानीयमानाः कतिपये विषयाः स्युः स्फोरिता वैशद्येनेति विमृश्य तथा कृतोऽत्र यत्नः । कुत्रचित् समुद्भाविताऽपूर्वता लक्षणावादनामके लेखे । ज्ञानरूपा सा, व्यापाररूपा, संस्काररूपा वेति पक्षानुपक्षिप्य याथार्थ्यमुपदर्शितम् । समाहारस्य द्विगौ, द्वन्द्वे, अव्ययीभावे

च सत्वेऽपि किं वैशिष्ट्यं स्थलत्रय इति कुतो विचारः साधीयान् । व्यञ्जनायाः शब्दार्थवृत्तित्वविचारः, काव्यालोचनेशाब्दोऽनुपातः इत्यादिनिबन्धेषु किमस्ति वैशिष्ट्यमिति शक्यते वक्तुं पठनानन्तरमेव । मेघदूते अलका सदृशा निबन्धा प्रसन्नमधुरगिरोपनिबद्धाः स्युस्तोषकरा नूनं विदुषामिति प्रत्ययः । यदि पुस्तकमिदं सारस्वतवैभवविशिष्टशिष्टानां मनःसु निदधीत पदं कथञ्चित् तदा सफलो मे श्रमः ।

अहमस्मि भृशं कृतज्ञो भारतसर्वकारीय मानवसंसाधनविकासमन्त्रालयस्य यस्यार्थिकसाहाय्येन कठिनतरं कार्यमिदं पुस्तकस्यास्य प्रकाशनं सौकर्यमविन्दत् । जम्मूनगरस्थरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य, प्राचार्यपदमुपगूहमानेनानवरतशास्त्रपरिशीलनपरिष्कृतशेमुषीमता आचार्यजगन्नाथपाठकमहोदयेन पुस्तकस्यास्य प्रस्तावनां विलिख्य यदुपदर्शितमौदार्यं तदर्थं किमपि वक्तुं नास्ति मे शब्दसंचयः ।

आयुष्मता उपेन्द्रकुमारेणास्य प्रूफ संशोधनकर्मणि यदुपकृतं तदर्थमहं वितरामि तस्मै भूयांसि आशीर्वचांसि । अत्रावसरे बीकानेरस्थसांखलामुद्रणालयस्याध्यक्षः श्रीदीपचन्दसांखलामहोदयोऽपि नास्ति विस्मरणीयो यस्यादम्येनोत्साहेन अपूर्वया संकल्पनाशक्त्या प्रकाशनमिदं पूर्णतामविन्दत् ।

गच्छतः स्खलनं स्वाभाविकम् । स्यादप्येतत्– स्युरत्रत्रुटयः । अहं वक्ष्याम्यधिकमाभारं तेषां विद्वन्मान्यानां ये खलु कृपया अत्र समागतत्रुटीनामुपरि मे ध्यानं दापयिष्यन्तीति ।

वशंवदः

विश्वनाथमिश्रः

प्रस्तावना

इदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दात्मकं ज्योतिरासंसारं न दीप्यते ।।
रूपान्तरेण ते देवा विचरन्ति महीतले ।
ये व्याकरणसंस्कारपवित्रितमुखा नराः ।।

संस्कृतं कठिनमिति भावनाऽद्यत्वे जनसामान्यहृदयवर्तिनी प्रायः प्राचीनसंस्कृतग्रन्थान् प्रति वैमुख्यमुत्पादयन्ती वर्तते । अत एव संस्कृतं सरलीकर्त्तुमनसः कतिपये विद्वांसः पाणिन्यादिनिर्दिष्टपन्थानं परिहृत्य सरलानुपायानाविष्कर्त्तुमुद्युक्ताः सन्ति । एवं सति 'प्रौढ़निबन्धसौरभस्य कस्यचिद् संस्कृतग्रन्थस्य प्रकाशनमिदानीं कियदुपयोगित्वं बिभर्तीत्यपि शंका स्वाभाविकी । न केवलमेतावदेव, साम्प्रतं कस्यापि प्राचीनशास्त्रस्य विचारमारभमाणा आधुनिकास्तस्य प्रासङ्गिकत्वमपि विचारविषयतां नयन्ति । निर्णीतेऽप्रासङ्गिकत्वे तस्योपयोगित्वमपिशङ्कनीयमिति परिकल्पयन्ति ।

वस्तुतः प्राचीनैस्तपःस्वाध्यायनिरतैर्मुनिभिः शास्त्राणामाविर्भाव आध्यात्मिकीं दृष्टिं पुरस्कृत्य कृतः । सामयिकस्तात्कालिको वा कश्चिदुपयोग इति भावनामाश्रित्य न विरचितानि तैः शास्त्राणि । सा चाध्यात्मिकी दृष्टिः सामान्यजनानामाकर्षणाय नालम् । संस्कृतस्य संस्कृतत्वं वस्तुतस्तयैव दृष्ट्या कामपि सार्थकतामाधत्ते । तदुपलब्धये कतिपय एव प्रस्फुटितप्रज्ञानाः सुधियः प्रचेष्टमाना भवन्ति । पाणिन्यादिमुनिभिः प्रदर्शितेन पथा शब्दशास्त्रमाकलयितुं परम्परया वाराणस्यादिषु केषुचिदेव स्थानेषु संलक्ष्यते समुचितः प्रबन्धः । तत्र परम्परातो गुरुमुखेभ्यः सुगृहीतशास्त्रतत्त्वानां विदुषामन्तेवासित्वमवाप्य सेवापरायणाः प्रणिपातपरिप्रश्नादिविधिभिः शास्त्राणामाकलनं कर्त्तुमीहन्ते । तैरेव च संस्कृतमिदं गरिमाणमद्यापि सम्बिभर्ति ।

आधुनिकाः सरलमार्गानुसन्धानपराः प्रायः "शास्त्रार्थ" इति शब्दमपि न सहन्ते । "शास्त्रार्थः" शास्त्राणां सुचिन्तनपुरःसरमेव कर्त्तुं शक्यते । सा च प्रवृत्तिरधुना प्रायः सर्वत्र क्षीयमाणा परिलक्ष्यते । ये चाङ्गुलिपरिगणनीया विद्वांसोऽधुना प्राचीनशास्त्राकलने प्रवृत्तास्तेष्वपि कतिपयेषामेव लेखनी स्वव्यापारमनुतिष्ठन्ती समुपलक्ष्यते । पत्रिकाणामपि गंभीरशास्त्रतत्त्वप्रकाशनपराणामनुदिन मनुपचीयमानैव वर्तते स्थितिः । परं ये तादृशाः शास्त्रवासनानिर्मलधियः कतिचित्

सुधियः स्वस्वविषयेषु लेखितुं प्रवृत्तास्तेषु महारथाः पण्डिततल्लजाः श्रीमन्तो विश्वनाथमिश्रवर्या राजस्थाने स्वकीयां पाण्डित्यपताकामुत्तोलयन्तो विराजन्ते। एभिर्यथाकालं प्रतिष्ठितासु पत्रिकासु व्याकरणसाहित्यशास्त्रगता विषयाः स्वकीयया प्रौढ्या पद्धत्या विविधनिबन्धरूपेणप्रकाशिताः। ते निबन्धाः सुबहून् शास्त्रविचार-निपुणान् विदुषस्तत्तद्विषयविचारोन्मुखानकुर्वन्।

निबन्धानां लेखनमेका कला। तस्यां प्रयतमानेषु कतिचिदेव साफल्यजुषो-भवन्ति। ईदृशानां प्रौढानां निबन्धानां लेखनं प्राचीनैरपि विद्वद्भिरक्रियत। बौद्धविदुषो रत्नकीर्ते र्निबन्धाः प्रकाशिता अपि। निबन्धेषु न केवलं भाषायामधि-कारोऽपेक्ष्यते, परं विषयानुकूला वाग्विन्यासचातुरी, तार्किकीक्षमताऽप्यपेक्षते। नैषधे श्रीहर्षेणोक्तम्— "मितञ्च सारञ्च वचो हि वाग्मिता" इति। वस्तुत ईदृशी काचिद् वाग्मितैव निबन्धानां प्राणत्वमापद्यते। पाठकानां समक्षं निबन्धकाराः साक्षात्कारमिव प्रस्तुवन्तो भवन्ति। यदाह मल्लिनाथः— "नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते" तथैव निबन्धलेखकाः स्वीयासु वाचोयुक्तिषु प्रवर्तन्ते। मिश्रवर्याणां निबन्धाः काञ्चिदीदृशीमेव विद्वज्जनाभिमतां परिपाटीमनु धावन्ति। स्वीयेषुनिबन्धेषु तैरङ्गीकृता शैल्यपि नितान्तं मनोग्राहितामवलम्बते।

"एकार्थीभावो व्यपेक्षा चेति निबन्धमाकलय्यास्मत्सहयोगिभिः व्याकरण-शास्त्रे प्रौढं परम्परागतञ्च पाण्डित्यं बिभ्रद्भिः पं. रामनारायणमिश्रैः शब्दैरेभिः स्वप्रतिक्रियाऽभिव्यञ्जिता— शब्दब्रह्मणि निष्णातानां विद्वत्प्रवराणान्तत्र भवतां श्रीविश्वनाथमिश्रवर्याणामेकार्थीभावो व्यपेक्षा चेति निबन्धः कस्यगुणग्राहिणो जनस्य शब्दशास्त्रे प्रवेशं कामयमानस्यमनोमोदं न जनयिष्यति? पदसम्पादकविधित्वेन समाससंज्ञादेः सामर्थ्यनिदानभूतत्वेन च द्विविधसामर्थ्यसमीक्षेहापि श्रीमतां विभिन्न-युक्तिप्रमाणसंवलिता विशिष्टवाग्वैभवविलसिता नवनवोन्मेषशालिन्याः प्रतिभायाः परिपोषिणी प्रबन्धेऽस्मिन्नभिचकास्ति सुतराम्।

वर्षत्रयपूर्वमेव मिश्रवर्याणां श्रीनागेशभट्टकृतस्य परिभाषेन्दुशेखरस्य हिन्दी-व्याख्यानं चौखम्बाप्रकाशनेनप्रकाशितं विदुषां समक्षं प्रस्तुतम्। तस्मिन् खलु तेषां व्याख्यानपाण्डित्यं सुतरां समुल्लसति।

मिश्रवर्येषु प्रौढंपाण्डित्यम्, द्रढीयश्च स्वाधीतविषयप्रतिपादनक्षमत्वम्। तदेतदुभयं सुबहुकालंयावत् गुरूणां सान्निध्यलाभस्य सुपरिणामः। तेषां गुरुवर्या-श्चासन् वाराणस्यां वैयाकरणेषु मूर्धन्यास्तपःस्वाध्यायाभ्यामखिलेऽपि भारते लब्धयशसः स्वनामधन्याः "महाशय जी"ति ख्याताः पं. रामयशस्त्रिपाठिवर्याः। गुरु-कुलक्लिष्टै र्मिश्रवर्यैः प्रभूतं स्वविषये श्रान्तमित्यत्र तेषां निबन्धा एव प्रमाणम्। यद्यपि शास्त्रीयेषु निबन्धेषु निबन्धकारस्य स्वातन्त्र्यं नैव किञ्चित् प्रगल्भते, तथापि मिश्रवर्याणां प्रगल्भा वाचोयुक्तयस्तत्रापि राराजन्ते।

मिश्रवर्यैः साहित्यविषया निबन्धाः प्रथममेव मुद्रापिताः । सरसेषु साहित्य-विषयेषु विनायासं प्राप्तप्रवेशाऽभ्यस्ता च पाठकानां धीः सौविध्येन कठोरेषु वैयाकरणविषयेषु प्रवर्तितुं शक्नुयादिति तेषामभिप्रायः स्यात् । "मेघदूते अलकेति" निबन्धस्तु न शास्त्रीयः परं स ललितनिबन्धेषु महनीयेषु स्थानमर्हतीति विश्वसिमि । संस्कृतेऽनुसन्धानकार्यमाश्रित्य लिखितो निबन्धः प्रौढमतिभ्योऽनुसन्धानपरायणेभ्यः कमपि मार्गनिर्देशं प्रकुर्यात् ।

मन्ये जिज्ञासवो न केवलं छात्राः परं विद्वांसोऽपि पठ्यमानेषु निबन्धेष्वेतेषु कामपि समासादयेषुः स्वज्ञानसम्बर्धनजन्यां प्रीतिमिति भूयो भूयः स्वीयां शुभाशंसां वितन्वन् विरमामि । पर्यन्ते च कामये—

या सदागतिसमा सदागति
विश्वनाथबुधवर्यलेखनी ।
सा सदाशिवसदास्वयंवृता
जायतां बुधजनानुमोदिता ।।

जम्मू
4-3-88
(होलिकोत्सवः)

जगन्नाथपाठकः
प्राचार्यः
रणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य

कालिदासे सौन्दर्यतत्त्वम्

मानवहृदयसूक्ष्मतमरहस्यान्वेषणपटीयान्, सहृदयतासहकृत भावनाविशेष-महिम्ना जगत्तादात्म्यमुपेयिवान् सुकुमार-चित्रणचंचरीको भावानामावेगानाञ्च निरूपणेऽनुपमो नैसर्गिकः कविः कालिदासः तेन-परिज्ञातं जीवनरहस्यम् । या शकुन्तला अनाघ्रातपुष्पकल्पा अलूनकिसलयकमनीयकान्ता सा एव आचारप्रमादिनी अभिशप्ता धूसरितवसनं वसाना तपस्विनी क्षेमंकरी अभिज्ञाता । अपरत्र-यस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः इत्युक्त्यनुसारं-रमयाञ्चकार राजानं सैव जातानुतापालतेव जातेति विमृश्य परिज्ञातं जीवनरहस्यं कविना व्याजह्रे-मरणं प्रकृतिः शरीरिणां विकृतिर्जीवनमुच्यते बुधैः

निरन्तरं गतिमत् जगत् । अत्र विराजते तत्त्वद्वयम् । एकं गतिमत्, अपरञ्च सुस्थिरम् । दृश्यतेऽनुभूयते च सर्वैर्यत् योऽहं बाल्ये आसम् स एवेदानीं यौवने, स चैव बार्धक्येऽपि । परन्तु शरीरं यत् बाल्ये आसीत् नेदानीं तद्यौवने न वा वार्धक्ये । एवं रीत्या सांसारिकं निखिलं तत्त्वं शरीरादिकं निरन्तरं क्षीयमाणं विनश्वरं, ततो दूरमात्मतत्त्वं शाश्वतमपरिच्छिन्नम्, नित्यमप्रमेयम् । इदं विज्ञानमेव भारतीयचिन्तन-धाराया मेरुदण्डायमानं विश्वस्मिन् जगतिनिखिलविज्ञानमतिशेते ।

इममेव मेरुदण्डमवलम्ब्य प्रचलिता भारतीय काव्यपरम्परा । अस्मिन्ननन्तनाम-रूपात्मके संसारे भावनानाम् अनुभूतीनाञ्च नानात्वेन वैविध्येन च सम्पन्नो मानवः स्वकीयान् भावान् विचारान् व्यापारांश्च अन्येषां भावैः विचारैः व्यापारैश्च सह प्रवर्तयन् यापयति कालम् । यदाऽसौ सौभाग्यादस्य वैचित्र्योपेतस्य जगतः पुरस्तात् आत्मनीनां स्वतन्त्रसत्तां विस्मृत्य केवलमनुभूतिमात्रमेवावशिष्यते, तदा तस्य जायते-विशिष्टस्थितिः । तदानीं विश्वस्मिन् जगति वर्तमान विशिष्टसत्तातो न पृथक् तस्य स्वतन्त्रसत्ता । स च सर्वत्र तस्यैवानन्तस्य विलासं पश्यति सीमितक्षेत्रमुल्लंध्य तदीयं हृदयं तदानीं विशिष्टां मुक्तावस्थामुपैति । एतादृशीं चिन्मयीं निखिलजड़चेतन-रागमयीं सत्वोद्रेकां दशामापादयितुं रससिद्धैः कवीश्वरैः यत् किमपि क्रियते शब्द-विधानं तदेव कविकर्म काव्यमित्युच्यते ।

अतो न केवलमितिवृत्तलेखनमेव कवेर्दायित्वम् । किन्तु रससिद्धकवीश्वरास्तु-तादृशमनुपमं रचयन्ति, विशिष्टं प्रतिपादयन्ति, यत् अपाकरोति मानवहृदयात् तुच्छस्वार्थ भावनाम् दूरीकरोति तदीयसंकुचितमण्डलम्, गमयति च नानावासना-

वासित मानवहृदयं लोकसामान्यभावभूमिम् । यत्र परस्य न परस्येति ममेति न ममेति च इति विशिष्ट भावनाभावितो मानवः आत्मनीनां सत्तां सर्वथा विस्मृत्य लीनतामुपयाति लोकसत्तायाम् । अनुभवति च परां काष्ठांगतमानन्दसाम्राज्यम् । रमणीयार्थप्रतिपादकः शब्दः काव्यम् इति काव्यं लक्षयता पण्डितराजेन अस्यामेव दिशि संकेतः कृतः । अतएव अग्रे कथ्यते तेन 'रमणीयता च लोकोत्तराह्लाद-जनकज्ञानगोचरता । लोकोत्तरो य आह्लादस्तस्य जनकं यद् ज्ञानं तद्विषयता एव रमणीयता ।

यदिकश्चन कवयति एतादृशं काव्यम्, रचयति एतादृशं विशिष्टविधानम्, आपादयति तादात्म्यं मानवहृदयस्य विश्वस्य क्षोदीयसाऽपि तत्त्वेन तदाऽसौ शक्यते वक्तुं कविरिति शब्देन । अन्यथा कोऽसाविति स एव जानीयात् । महाकवि कालिदास एतादृशलक्षणलक्षितकविवरेष्वन्यतमः । तस्य काव्ये सौन्दर्यान्वेषणं रत्नाकरे रत्नान्वेषणतुल्यमेवास्ते । तावताऽपि पूर्वमिदं विचार्यते किमिदं सौन्दर्यंनाम् ? अद्यत्वे सौन्दर्यस्य चर्चा सर्वत्रैवश्रूयते । अस्योपरि नैके विचाराः प्रस्तुतीकृता विवेचकैः । अतोऽस्य स्वरूपं किमिति विवेचनीयमेव । केचन वदन्ति सौन्दर्यं वस्तुगतम्, अपरे वदन्ति, सौन्दर्यं रचनागतम् । आत्मगतमपितदिति प्रतिपादयन्तोऽप्यन्ये तस्य याथार्थ्यमुपस्थापयितुमशक्ता एव दरीदृश्यते । वयं ब्रूमः न तावत् सौन्दर्यं वस्तुगतम् । एकस्यैव वस्तुनो व्यक्तिभेदेन सौन्दर्यमिव असौन्दर्यस्यापि वक्तुं शक्यत्वात् । एकमेव रमणीयं वस्तु व्यक्तिविशेषं रमयति चेत् अपरत्र व्यक्त्यन्तरं दुखयत्यपि । देदीप्य-मानस्वर्णाभा कमनीयकान्तिरनुपमलावण्या काप्यनिर्वाच्यसौन्दर्या योषित् आनन्दयति व्यक्तिविशेषं चेत्तर्हि सा एव स्वविरहितस्यकृते कष्टप्रदा, दुखप्रदा, अरमणीया सौन्दर्यविहीना कथं न स्यात् । एवमेव सांसारिक निखिलवस्तूनि न सर्वात्मना सौन्दर्याधायकानि । वस्तुतस्तु-सौन्दर्यस्य वस्तुगतत्वं वक्तुमशक्यम् । सांसारिक-सर्ववस्तूनां नित्यनिरन्तरं परिवर्तनशीलतयायद् वस्तु अद्य सुन्दरं तदेव श्वोऽसुन्दरमपि भवितुमर्हति । एकमनुपमलावण्यमपि वार्धक्ये किं तरलयितुं क्षमं कस्यापि मानसम् ? तस्मान्न सौन्दर्यं वस्तुगतम् । किन्तु वस्तुनि यत् प्रतीयते सौन्दर्यं तत्तु केवलमाभास-मात्रम् । तदर्थं विहितेऽपि नाना प्रयत्नेनापादयितुं शक्यते केनापि तस्य स्थायित्वम् । तस्मात् वस्तुगतं सौन्दर्यं केवलं प्रतीतिमात्रम् । यच्च केवलं प्रतीयते न तत्प्राप्यते । यच्च नित्यं प्राप्तं तत्त्वं परमरमणीयं तदर्थञ्च न क्रियते यत्नः केनापि, न वा दीयते ध्यानं तदुपरि तस्मात् सौन्दर्यमात्मगत मेवेति निश्चितम् । आत्मा च सर्वेषां कृते नित्यप्राप्तं वस्तु । नित्यप्राप्तस्य परिज्ञानं न क्रियते तदीया रमणीयता च न ज्ञायते-ऽस्माभिरित्येवास्माकं दैन्यम् ।

आत्मनः स्वरूपम् सत् चित् आनन्दात्मकं सौन्दर्यात्मकं वा तदीयां सत्तामा-दायैव संसारस्य सर्ववस्तूनि सत्तावन्ति । तदीयचेतनतयैव अचेतनान्यपि भासन्ते चेतनवत् । एवमेव तदीयेनानन्देन सौन्दर्येण च निखिलवस्तूनि आनन्दमयानि,

सुन्दराणि च सन्तीति विकल्पातीतोऽर्थः । महात्मना तुलसीदासेनाप्युक्तं "सुन्दरता कहँ सुन्दर करहीं" । स्वयं सुन्दरताऽपि तत एव सौन्दर्यमादाय सुन्दरता पदभाक् भवति ।

अनेन विवेचनेनेदं निश्चितं यत् सौन्दर्यमात्मनिष्ठं तत्त्वं न तु वस्तुनिष्ठम् । परन्तु स्वीकारे चैवमेषा शंकासमुदेति यत् अस्यां स्थितौ कालिदाससदृशैः कविवरैः रूपसौन्दर्यं कथं चित्रितमिति ? किन्तु नैषा शंका युक्ता, यतो हि अस्मिन् वैचित्र्योपेते संसारे यत् किमपि आनन्दादिकं प्रतीयते यत् किमपि सुन्दरादिकं वा पर्यवलोक्यते तत् सर्वं सिन्धोर्विन्दुरिव तस्यैवाखण्डस्यानन्तस्यानन्दसुधासिन्धोः किंवा सौन्दर्यसार-सर्वस्वस्यांशिकी अभिव्यक्तिमात्रम् । एवञ्च गुडजिह्विकान्यायेन लौकिकवस्तूनां सौन्दर्यनिरूपणमपि सर्वथैवौचित्यमञ्चति । अतः कालिदासादीनां प्राकृतिकसौन्दर्य-चित्रणं मानवीयसौन्दर्यचित्रणं वा सार्थकमेवेति वेदनीयम् । नात्रं विस्मर्तव्यं यत् ब्रह्मणः सच्चिदानन्दस्वरूपे आनन्दांशतत्त्वमादाय किं वा सत्यं शिवं सुन्दरमिति तत्त्वत्रयमध्ये सौन्दर्यतत्त्वमादायैव कवयन्ति कवयः । आनन्दो निजस्वरूपम्, किं वा सौन्दर्यमेवस्वकीयं रूपमिति सर्वेषां सचेतसां तत्र स्वाभाविकी प्रवृत्तिः । अत उच्यते रसो वै सः । रसं ह्येवायं लब्ध्वा आनन्दीभवति । तस्मात् सौन्दर्यं न चक्षुर्विषयः किन्तु अनुभूतिविषयः । बाह्यसौन्दर्यंदृष्ट्वा तद्भावनाभावितान्तःकरणः पुरुषः आत्मनिष्ठं सौन्दर्यमास्वाद्य सुखीभवतीति कवीनामत्रैव कृतित्वम् । अस्माकमन्तः सत्तायास्तदाकारपरिणतिरेव सौन्दर्यानुभूतिः । यस्य सौन्दर्यस्य भावनायां मग्नो मानवो विस्मरति स्वकीय पृथक् प्रतीतिं तदेव सौन्दर्यपदभाक् । नान्यदिति सहृदया-नामाकूतम् ।

विवेचनेनेदमायातं यत् सौन्दर्यं द्विविधम्-बाह्यम् आभ्यन्तरञ्च बाह्य सौन्दर्यमान्तरिक सौन्दर्यस्य द्वारमिति कृत्वा कालिदासेन चित्रतानि बाह्य-सौन्दर्याणि ।

कालिदासस्य काव्यानि बहूनि । तत्र प्रतिपदं द्रष्टुं शक्यते सौन्दर्यविलासः । मानवो यथा सृष्टिकेन्द्रं तथैव कालिदासस्य कवित्वकेन्द्रमपि असावेव । परन्तु कवित्वकेन्द्रो मानवो न कदापि एकाकी चित्रितः कविना किन्तु तदीय सन्निधौ प्रकृतिः सदा मुखरायमाणा वर्तते । यदा कविः प्रकृत्या सह एकाकारतामुपैति तदा तदीय-पात्राणां जीवनं प्रकृतेरवयवानामनुभूतितामुपैति । कविसृष्टमानवः प्रकृतिश्चान्योन्यं सहजस्नेहं प्रकटयतः । शकुन्तलायाः पतिगृहगमनावसरे कण्वेन संसूचिता वनदेवता यादृशं प्रसाधनं प्रस्तुवन्ति शकुन्तलायै तत्त सर्वथैवापूर्वम् यथा—

क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतम् ।
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित् ।।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितैः ।
दत्तान्याभरणानि तत् किसलयोद्भेदप्रतिद्वन्द्विभिः ।।

कालिदासचित्रिता प्रकृतिः सर्वथा सम्वेदनशीला। अनुभवति चासौ सुखं दुःखं च मानवतादात्म्यमुपेत्य। एतादृशीविशिष्टामनुभूतिं सहृदया एव कर्त्तुं शक्नुवन्ति। पतिगृहं गच्छन्त्याः शकुन्तलाया भाविनं विप्रयोगं पर्यालोच्य यत्र ज्ञानराशिः कण्वः लतापादपान् प्रति ब्रूते।

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषुया
नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥

अत्र प्रकृतेः जडपदार्थस्य च मानवीकरणं कियदिव सुन्दरं सहृदयहृदयस्पर्शि वर्तत इति सहृदया एव जानन्ति।

अस्मिन्नवसरे समस्त तपोवनस्य व्याकुलताया अपि एकं चित्रं दृश्यताम्—

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः॥

शकुन्तलाविप्रयोगजन्यतीव्रतापावसरे हरिण्यो मुखात् दर्भकवलमुद्गिरन्ति, मयूरा अपि मनोहारि नर्तनं परित्यजन्ति पाण्डुपत्रपातनव्याजेन लता अश्रूणि मुञ्चन्ति।

यथा शकुन्तला कण्वस्य पुत्रीस्वरूपा तथैवाश्रमे समुत्पन्ना नवमालिकाऽपि कण्वस्य कृते कन्यासमा एव। अत एव यथा शकुन्तलाविवाहचिन्ता आसीत् मुनेस्तथैव नवमालिकाया अपि विवाहचिन्ता व्यथयति तम्। किन्तु दुष्यन्तेन साकं परिणीतां शकुन्तलां तथा रसालसंगतां नवमालिकां सम्प्रेक्ष्य वीतचिन्तः कण्वः प्रासादमनुभवतीति श्रूयतां तदीयेनैव शब्देन—

संकल्पितं प्रथममेव मया तवार्थे
भर्त्तारमात्मसदृशं सुकृतैर्गता त्वम्।
चूतेन संश्रितवती नवमालिकेय—
मस्यामहं त्वयि च सम्प्रति वीतचिन्तः।

मानवीय सौन्दर्यचित्रणे प्रायशः नारीणामेव सौन्दर्यं विशेषतयोपवर्ण्यते किन्तु कालिदासेन तु नारीणामिव पुरुषाणामपि सौन्दर्यं मनोहारितया हृदयग्राहितया च चित्रितम्। तद्यथा-वशिष्ठाश्रमं प्रति गमनं कुर्वतोः सुदक्षिणादिलीपयोश्चित्रं प्रस्तुवन् कविः कथयति—

काप्यभिख्या तयोरासीत् व्रजतोः शुद्धवेषयोः।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव॥

अत्र काप्यभिख्या अस्मिन् शब्दे यश्चमत्कारः कविना आधृतः स तु सहृदयैकसंवेद्यः पुष्णाति परां शोभामिति नात्र संशयः।

नारीसौन्दर्यचित्रणे तु कविरयमद्वितीयः ।

उर्वश्याः प्रथमदर्शनावसरे तदीयमनुपमलावण्यं दृष्ट्वा पुरुरवाः तर्कयति
अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः ।

शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलः ।
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ।।

कालिदासोऽकृत्रिमसौन्दर्यमेव सर्वश्रेष्ठं मनुते-तद्यथा—
सरसिज मनुमिद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।।

कालिदासस्य मेघदूतन्तु सौन्दर्यसारसर्वस्वमेव । यत्र मानवेतरो जडोऽचेतनो मेघो दूतत्वेन परिकल्पितः सन्देशश्च प्रियासकाशं, प्रिया, च तस्य धातुराद्या सृष्टिः । तन्वीकनकशलाकायमाना तप्तकाञ्चनवर्णाभा अतएव श्यामा यस्यामुच्छलल्लावण्य-युतयौवनोपदिष्टलालित्यमनवरतं विलसति । शिखरिदशना, पक्वबिम्बाधरोष्ठी सा विश्वविधात्र्या शक्त्या अनुपम विलासरूपा यस्या नयनप्रान्ते परमरमणीयं चकित-हरिणीप्रेक्षणीयं प्रतिक्षणमुल्लसति । कृशमध्या स्तनभारादीषदवनतालसगामिनी नितम्बिनी सा न्यक्कृतविधिविशेषसौन्दर्यमाधुर्यगुणोपेतरचना । श्रूयतां स्वयं यक्षस्य शब्देन—

तन्वीश्यामाशिखरिदशना पक्वबिम्बाधरोष्ठी
मध्येक्षामाचकितहरिणीप्रेक्षणा निम्नाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रास्तनाभ्याम्
या तत्र स्यात् युवतिविषये सृष्टिराद्येवधातुः ।।

न केवलं मनुष्याणामेव अपितु पशूनां पक्षिणामपि सुन्दरचित्रणे कविः सदैव सफलः । शाकुन्तलस्य प्रारम्भ एव-यदा दुष्यन्तो मृगमनुधावति तदा प्राणपरिरक्षणे अत्युत्कटवेगयुतं धावन्तं मृगं दृष्ट्वा दुष्यन्तो वक्ति-मृऽगोयं बारंम्बारं पश्चादनुपतितं स्यन्दनं पश्यति । वाणपतनभयात् पश्चार्धेन पूर्वकायमनुप्रविष्टस्यास्य मुखात् अर्धाव-लीढा घासा बहिः पतन्ति । उदग्रप्लुतत्वादयं बहुतरं वियति उर्व्यां च स्तोकमेव प्रयाति । अत्र श्रोतव्या कालिदासशब्दावली—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यंदने बद्धदृष्टिः ।
पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।।
शष्पैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वात् वियति वहुतरं स्तोकमुर्व्यां प्रयाति

इदं मृगकर्त्तृकं धावनं यथा स्वाभाविकं रमणीयञ्चास्ते यत् पाठकानां पुरस्तात् एकं सजीवं चित्रं प्रस्तौति । पाठकश्च स्वयमेव तादृशीं स्थितिमनुभवति ययाऽसौ मृगमनुसरन् वर्तते ।

न केवलं भावनात्मकवस्तुवर्णने एव कवेर्गतिर्वर्ततेऽपि तु विरहवर्णनेऽपि कवेस्तादृशमेव योग्यत्वम् । उर्वश्यां स्वलोकं गतायां तद्विरहाक्रान्तपुरुरवा नद्यामेवोर्वशीं पश्यति । स कथयति-यावत्यश्चेष्टादयः सन्ति उर्वश्यां तावत्यः सर्वा एव अस्यां नद्यां लक्ष्यन्ते । अतो ध्रुवं मे प्रियानदीरूपेण परिणता—

तरंगभ्रूभङ्गा क्षुभित विहग श्रेणीरसना
विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम्
यथाविद्धं याति स्खलितमभिसन्धाय बहुशो
नदीरूपेणेयं ध्रुवमसहना सा परिणता ॥

एवं रीत्या यत्र कुत्रापि पठ्यते कालिदासकाव्ये सौन्दर्यं प्रतिपदं दृश्यते, पठ्यतेऽनुभूयते च सर्वत्र । अत एव मेघदूतकाव्यमुद्दिश्य रामचन्द्रशुक्लेनोक्तम् नेयं कल्पनायाः क्रीड़ा, न वा कलायाः विचित्रता अपितु प्राचीनभारतस्य सर्वाधिकभावुकहृदयस्य स्वकीयमातृभूमेः रूपमाधुर्योपरि सरलानिष्कपटा प्रेमदृष्टिरेवेयम् । किं वर्णयामो यो यो जनः यत्र कुत्रापि कालिदासकाव्यं पठति, विमुग्ध इव भवति सहृदयोऽन्तःसारसमन्वितः । अस्य भाषा सरसा, सरला । अलंकारा अपि रसं प्रति समर्पणभावनया अहमहमिकया समागताः सौन्दर्यतत्त्वमेव पोषयन्ति । कण्वाश्रमे शकुन्तलां सन्दर्श्य अनाघ्रातं पुष्पमित्यादि दुष्यन्तोक्तिः शकुन्तलाया व्यक्तित्वस्य निपुणमभिव्यञ्जकमिति रसज्ञानामाकूतम् ।

एतेन स्पष्टं यत् कालिदासस्य सौन्दर्यदृष्टिरनुपमा हृदयस्पर्शिनी च वर्तते । तस्य मानवानां प्रकृत्यासह शाश्वतिकः सम्बन्धः । भाषाशैलीप्रभृतीनि काव्यतत्त्वानि असुन्दरमपि तत्त्वं सुन्दरतरमापादयन्ति । फलतः सौन्दर्यभावनाभावितं सहृदयान्तःकरणं भवत्यानन्दमयं यदर्थमुच्यते-आनन्दी भवतीति । आनन्दानुभूतिरेवात्मानुभूतिरिति पूर्वे सूरय इति संक्षेपः ।

मेघदूते अलका

प्रियावियोगविधुरो यक्षः। कथमिवेदं वैधुर्यम्? अप्यासीत् प्रवासरुचिता यक्षस्य? विप्रयोगजन्यतीव्रतापमनुभूय क्रियमाणः सम्प्रयोगः कमप्यपूर्वं जनयत्यानन्दसन्दोहम्, उत्तरलयति मानसम् समेधयति च दर्शनलालसाम्। सततदयितोत्सङ्गसुखमनुभवन्ती वराकी सारसपत्नी लक्ष्मणा किमनुभवति तादृशानन्दपारावारस्य लवमपि यादृशमनुभवति नैशं विप्रयोगमासाद्य प्रातः सम्प्रयुक्ता हर्षोत्फुल्लरोमाञ्चाञ्चितकलेवरा चक्रवाकी? परं न चक्रवाकी सदृशी यक्षी। यत्र जायन्ते नित्योत्सवाः, गीयन्ते मधुराणि, श्रूयन्ते रम्याणि, दृश्यन्ते च परितो नयनाभिरामाणि। यत्र च सघनच्छायामुपेत्य कुसुमरचितानि हर्म्यस्थलानि प्राप्य कल्पवृक्षप्रसूतं रतिफलमास्वाद्यते कामिनीद्वितीयैस्तत्र कथं प्रभवेत् वियोगवार्ता? अत एव नावकाशोऽत्राभिलाषाविरहेर्ष्याणामप्यन्येषां वैधुर्यापादकानामपि। न चापि विपुलसम्पत्त्युपलब्धिबलवदिच्छैवात्र वैधुर्ये बलीयसीति विभावनीयम्। धनाधीशकुवेरस्य त्रैलोक्यरत्नभाण्डागारे निवसतो जनस्य कथमपेक्षतां तुच्छो धनराशिः? कस्तूरिकाजननशक्तिभृता मृगेण काम्यते किं परकीयः सुगन्धलेशोऽपि? रत्नाकरोऽकूपारो नापेक्षते कस्यापि धनराशिम्। अनन्तैश्वर्यसम्पन्नायां यक्षाधिपतेर्नगर्यां निवसन् यक्षोऽयं स्यात् कथञ्चिदकिञ्चन इति नैव शंकनीयं कदाचित्। दूरतो दृश्यमानं विशालं भव्यञ्च तदीयं भवनं, यन्मध्ये मरकतमणिशिलापट्टविनिर्मिता राजते मनोहारिणी वापी। तस्यां वैदूर्यमणिमसृणमृणालमालम्ब्य शोभन्ते विकसितान्यरविन्दानि। नातिदूरं वाप्या इन्द्रनीलमणिभिरुपपादितः क्रीडापर्वतः। परितो यं परिवारयन्ति कनककदलीदेदीप्यमानानि वनानि। माधवीलतामण्डपायिते क्रीडानिकुञ्जे स्फाटिके पीठासने काञ्चनीवासयष्टी यदुपरि तस्य प्रेयान् मयूरः केकापरो विमोहयति मनांसि। यस्यैवं सम्भाराः कथं भवेदसावकिञ्चनः? तस्मान्नाकिञ्चनो यक्षः। परन्तु सर्वविधैश्वर्यसम्पन्नोऽप्यसावनुचचार यक्षाधीशं कुबेरम्।

प्रिया च तस्य धातुराद्या सृष्टिः। तन्वी कनकशलाकायमाना सा तप्तकाञ्चनवर्णाभा अत एव श्यामा, यस्यामुच्छलल्लावण्ययुतयौवनोपदिष्टलालित्यमनवरतं विलसति। शिखरिदशनापक्वबिम्बाधरोष्ठी सा विश्वविधात्र्याः शक्त्या अनुपमविलासरूपा यस्या नयनप्रान्ते परमरमणीयं चकितहरिणीप्रेक्षणीयं प्रतिक्षणमुल्लसति। कृशमध्या स्तनभरादीषदवनतालसगामिनी नितम्बिनी सा न्यक्कृतविधिविशेषसौन्दर्यमाधुर्यगुणोपेतरचना। एतादृशी त्रैलोक्यानुपमरमणी कथमिव पृथक्क्रियतां क्षणमपि?

निमेषमात्रकालिकोऽपि तदीयो वियोगो युगशतायते । अतस्तत्र सम्यगनुरक्तो यक्षो न पर्यपालयत् स्वकीयानुष्ठानभारम् । प्रियाप्रेम्णि समासक्तःप्रमादमन्वतिष्ठदिति कुपितः कुबेरस्तं शशाप, वर्षभोग्यः प्रियविप्रयोगस्ते स्यादिति ।

महामहिमशालिनः कुबेरस्यायं शापः । न खलु कस्यापि साधारणजनस्य, विप्रवरस्य वा, योऽचिरादेव प्रार्थनामनु द्रवीभूय शापमन्यथाकुर्यात् । परं कुबेरो यक्षाधीशो राजराजः । स कथं स्वोक्तिमन्यथयेत् ? फलस्वरूपं विलीनं यक्षस्य देवत्वम्, अपगतो महिमा । कथमतिवाहनीयो वर्षकालिकोऽवधिः ? प्राथमिकोऽयं प्रियविप्रयोगः कथमिव सोढव्य इति विचारपरो यक्षोऽनुल्लङ्घनीयः प्रभोरादेश इति विमृश्य शीतलसुस्निग्धच्छायेषु रामगिर्याश्रमेषु वसतिं चक्रे । तत्र प्रियविप्रयोग-तीव्रतापानुतप्तस्य कथं कथमप्यतिवाहितेष्वष्टसु मासेषु कदाचिन्नभसि दृष्टिपथम-वतीर्णः सान्द्रो बलाहकः । ववृधे तदीयोत्कण्ठा, व्याकुलं मनः, समुत्सुकं चेतः, प्रियान्वेषणपरायणे लोचने । नूनमनियन्त्रणीयोऽयं कालो यदा जलभरभरिता नील-नीरदा व्याप्नुवन्ति नभोमण्डलं, तन्मध्ये क्षणे क्षणे विद्योतते विद्युत्, बलाकाः सामोदमधिनभः समुड्डीयमानाः स्युः, कर्णपीयूषश्चेतस्सन्तर्पणो जायेत केकारवस्तदा को नु धीरधौरेयो धारयेत् स्खलितप्रायं धैर्यराशिम् ? परां काष्ठां गतायामधीरतायां जड़चेतनविवेकहीनो यक्षः प्रत्यासन्ने समये चैतस्मिन् कथं मे प्रिया जीवितं धारयिष्य-तीति मुहुर्मुहुरालोच्य प्रस्तुत्य चार्घ्यं मेघाय स्वीचकार तमेव सन्देशवाहकमुपादिशच्च मार्गं स्वावासभूमेस्त्रैलोक्यसुन्दर्या अलकायाः ।

शरणं सन्तप्तानां, कामदो जनानां, प्राणदो लोकानां जलदः, समुड्डीय राम-गिरेर्मध्ये मार्गं मुग्धसिद्धांगनाभिर्वीक्ष्यमाणः सानुमत्याम्रकूटे विश्रम्य रेवामुत्तीर्य, विन्ध्याटवीमाहिण्डच विदिशोज्जयिन्यादिनगराण्युल्लंघ्य प्रालेयाद्रेस्तटमतिक्राम्य, त्रिदशवनितादर्पणं हरगौरीक्रीडानिकेतनमाससाद कैलासम् । तस्योत्संगे अलका, प्राणधनस्य पत्युरुत्संगे प्राणेश्वरी प्रियेव संसक्ता ।

सम्प्राप्तो मेघोऽलकाम् । सेयमलका त्रिभुवनललामभूता, कैलासस्य मोहिनी मनोहारिणी प्रियतमा, प्रकृतिसुन्दर्याः कुञ्चितालकावली, किं वा सौन्दर्यसारसर्व-स्वक्षोदविनिर्मितानुपमलावण्यललितविलासोत्सवा । दर्शं दर्शमलकायाः सौन्दर्यं, समवलोक्य तदीयं वैविध्यं, संदर्श्य स्वकीयनिखिलसाम्यं चकितचकितो मेघः परां प्रीतिमबीभजत् । दृष्टं तेन– यदि निवसति मयि चंचलविद्युल्लता चेदस्यामपि हेमकान्तिमत्यो ललितवनिताः । चेन्मयि विचित्ररंगरञ्जितमैन्द्रं धनुस्तदा अत्रापि भासमानानि चित्रविचित्ररंगैरनुकुर्वन्ति भवनानि तत्।मामकीनं स्निग्धगंभीरगर्जनमत्र भवनेष्वनवरतवादितमृदंगध्वनिना तुलयितुं शक्यम् । ओतप्रोतं मयि स्निग्धश्यामल-कान्तिमज्जलमपि नात्रोपमेयशून्यं, यतो हि प्रासादभूमयोऽत्रत्या नीलमणिमयाः प्रसारयन्ति सततमुत्कृष्टनीलरूपं सलिलसदृशं परितः । ममोत्तुंगतां गगनविहारिता-

ञ्चानुकुर्वन्ति अत्रत्या अभ्रंलिहाग्राः प्रासादाः । सदा विहारपरायणेयं दर्शनसमकालमेव चित्तं विमोहयति, निखिलं तापं शमयति, आह्लादयति च प्रेक्षकान् ।

यत्र ललितवनिता धारयन्ति हस्तेषु लीलाकमलमुपगूहन्ति कुञ्चितालकेषु मालतीपुष्पाणि, संग्रन्थन्ति चूडापाशे नवकुरबकम्, कर्णपल्लवेषु शिरीषकुसुमानि, आननमलंकर्त्तुं लोध्रपुष्परागं च व्यवहरन्ति, आच्छादयन्ति च सीमन्तलेखां कदम्बपुष्पगुच्छैः । नात्र चित्रं यदेकस्मिन्नेव काले सर्वविधान्युपलभ्यन्ते पुष्पाणि तत्र । अनिर्वचनीयनगर्यां सर्वं विचित्रमेव भवति । देशकालबन्धनमुक्ता अलका । अतस्तत्र नास्ति किमप्यसंभाव्यम् । तत्राभ्रंकषाणि मणिमयभवनानि । यदुपरि पुष्पधन्वा काम इन्द्रधनुषश्छायासूपविष्टः प्रेरयति यक्षान् पश्यति च नित्योत्सवम् ।

तस्यां प्रवहति मन्दं सरसा सरला मन्दाकिनी । तस्यास्तटमुपगम्य जलकणशीतलमनिलं सेवमानाः सहजानुपमसौन्दर्यपरवशवृतामरलोका यक्षकन्यकाः स्वर्णिमबालुकासु मणिसंगोपनान्वेषणक्रीडापरायणास्तिष्ठन्ति ।

तत्र सदापुष्पवन्तो वृक्षा यत्र मधुरं गुञ्जन्ति भ्रमराः । कमलिन्यो विकसितपद्मवत्यः परितोऽनवरतभ्रमणशीलहंसरशनाः । भवनशिखिनः क्रीडापर्वतेषु रममाणाःसंश्रुत्य रमणीवलयध्वानं विस्फार्य चित्रकरवचितपक्षसन्ततिं नृत्यन्तोऽवलोकयन्तेऽत्र । नित्यज्योत्स्नाप्रयुक्तान्धकारदारिद्र्येऽत्रत्याः प्रदोषा अपि विभ्रति कामप्यनिर्वाच्यां समाख्याम् । अत्र सदा वसति वसन्तः, क्रियन्ते सुललिताः समारम्भाः, क्रीडयन्ते वधूभिः समम् तस्मान्नापरं शिष्यतेऽनुष्ठातुम् । न चात्र दुःखस्य चर्चा, अतः तत्प्रयुक्ताश्रुप्रवाहस्तु खपुष्पायित एव । तापो नाम वराकस्तु दूरोत्सारित एव शाश्वतिकाय कालाय । यदि कथञ्चित् जायतेऽपि तापस्तदा केवलं पुष्पधन्वना क्षिप्तपुष्पप्रहारजनित एव, यश्चोपैत्युपशममिष्टजनसम्प्रयोगात् तत्क्षणमेव । किमत्रापि जायते वियोगः पारस्परिको यदिष्टसंयोगः समपेक्ष्यते इति शंकसे चेदत्रापि भ्रान्तिरेव । यतो हि नान्यनिमित्तको विप्रयोगोऽत्र कथंचिदपि सम्भाव्यो बिना प्रणयकलहात् । प्रणयकलहकुपितकामिनीप्रसादनमपि भाग्यवन्त एव लभन्ते केवलम् । परमानन्दरससारसरोवरसमुद्भूता अलका यत्र न प्रभवति बाल्यावस्था । चेदेवं को नु लालयेत् बालम् ? तथा सति नित्यरसोपभोगेऽनभिलषित आभासोऽपि कथञ्चिदापतेत् । न वा तत्र वार्धक्यमेव शक्यते द्रष्टुम् । वर्षीयसः सेवनापेक्षस्य नक्तं दिवं परिचर्यां कथमिव कुर्यात् । अतो वित्तेशानां न च खलु वयो यौवनादन्यदस्ति । अनुपमेयमुपलब्धिः ।

तत्र प्रत्येकं गृहदेहली मण्डिता मणिप्रदीपैः । शाश्वतदीप्तिमन्त इमे प्रकाशराशयो निर्वापयितुमशक्याः परमोपयोगिनोऽपि कदाचिद् भवन्त्यायासकराअपि

तत्रत्यकामिनीनाम् । रागाविष्टचेतःसु प्रियेषु क्षौमं वासः शिथिलयत्सु बिम्बाधराणां, व्रीडापरीतप्रियतमाः प्रक्षिपन्ति चूर्णमुष्टिम् तानुपशमयितुम् । परं शाश्वतप्रदीपाः कथमुपगच्छेयुर्निर्वापम् । हन्त ! ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः । शयनकक्षपर्यङ्कवितानावलम्बिताश्चन्द्रकान्तमणयो गवाक्षमार्गप्रविष्टहिमकरकिरण-सम्पर्कद्रविता मन्दं क्षरन्तः शमयन्ति तासामङ्गग्लानिम् । मध्येनगरं विलासोद्विग्नाः कुबेरानुचरा बहिरुपवनं प्रकल्प्यासीममनोरथास्ते सह किन्नरैर्धनपतियशोगानंकुर्वाणाः प्रविशन्ति तत्र सामोदम् ।

नातिदूरमितः कैलाशो वसतिर्भगवतः शंकरस्य । धनपतिसखो भगवान् शंकरः कामारिर्येन दग्धः पुरा कामः । स्मारं स्मारं शैवं तेजो भीतभीतः कामो भ्रमरज्यं स्वकीयं धनुरत्र विभर्त्येव नहि । किन्तु अलका तदीया नगरी, वर्तन्ते चात्र निखिल-कलाकोविदाश्चतुरवनिताः तासां सभ्रूभंगो दृष्टिपात एवापादयति मान्मथं समीहित-मित्ययत्नकृती कामो विन्दति परां प्रीतिम् ।

विश्वविधातुः सकलकलाकलापकलनपटीयसो धातुः सृष्टिवैचित्र्ये सर्वेभ्यो रमणीयाखिलविश्वमोहिनी सृष्टिः नारी । प्राकृतिकप्रपञ्चाहतः प्राणी एनामेवासाद्य विगतचिन्त आनन्दसुधासिन्धोर्लवलेशमासादयति । चेदसौ लोकोत्तरमण्डनमण्डिता हठादावर्जयति चेतांसि । अन्यथासुन्दरमनुपयुक्तमितिकृत्वोपहस्यते तिरस्क्रियते वा लोकैः । अतो नक्तं दिवमितस्तत आहिण्डय नानासंभारैर्भूषयति निजशरीराणि सौन्दर्यप्रियो लोकः । परं नेयमलका मानवानामावासभूमिः । नात्र लालसां पूरयितुं कश्चिदारंभो न वा प्रयत्नो नैव वा कश्चनोद्योगोऽनुष्ठीयते केनापि । अत्र तु विलसति पारिजाततरुर्यो हि प्रसाधयति कामनाम्, प्रपूरयति लालसाम्, वर्धयति समीहाम् किं बहुना निखिलमप्यभीष्टं करतलामलकायितं करोति । एकः सूते सकलमबला-मण्डनं कल्पवृक्षः । तस्मात् क्षणे क्षणे नूतनतां बिभ्राणा अत्रत्या नार्यो लोकोत्तर-सौन्दर्यसर्वस्वाः सन्तीति नात्र चित्रम् ।

तत्र धनपतिकुबेरगृहादुत्तरेण विरहिणो यक्षस्यानुपमं भवनम् । यत्र निवसति तद्वियोगातुरा विरहिणी यक्षी । यक्षिण्या वियुक्तस्तदीयः सर्वस्वतमः कृतवसतिः रामगिर्याश्रमेषु ।

रससिद्धकवीश्वरानल्पप्रतिभाप्रसूता विचित्रा सेयमलका, या अमूर्तापि मूर्तेव ज्ञाताप्यज्ञातेव, परिचिताप्यपरिचितेव नित्यं नवनवायमाना विश्वेषां मनांसि विमोह-यतीवाद्यापि ।

माघे पदलालित्यम्

इह खलु जगति प्रयुज्यमानासु भाषासु मध्ये रमणीयतमा तमोऽतीता निसर्गसंस्कृता संस्कृतभारती । तस्याश्च हृदयमिव राराजीति सुधाधारया परिप्लावितं निखिलमपि जगत् प्रीणयत् सारायमाणं मनोहारि काव्यजगत् । तस्य च सर्वस्वीभूतायां बृहत्त्रय्यामन्यतमं शिशुपालवधम्। रचयिता चास्य महाकविर्माघः ।

महाकविर्माघो वितते संस्कृतकविपरम्परावाहिनि काव्याकाशे देदीप्यमानोऽम्बरमणिरिव विभ्राजमानो वर्तत इति न तिरोहितं प्रेक्षावताम् । स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनां सरस्वती अभिव्यनक्ति तदीयमलौकिकं प्रतिभाविशेषम्। तावतैव तेषां महाकवित्वलाभः । अन्यथा यत् किमपि लिखित्वा कृती स्यात् कोऽपि जनः । अतः कवित्वमनितरसाधारणं तत्त्वम् ।

क्षणे क्षणे परिवर्तनशीलमिदं जगत् प्रतिपदमायासयति प्राणिनः, जनयत्युद्वेगं, दर्शयति चानिष्टम् । विरसेऽत्र जगज्जालेऽनुभूयतेऽनवरतं विभीषिका, परिलक्ष्यते तातप्यमानता, दृश्यते उद्वेजकता । तत् कथमत्र वर्तितव्यमिति विमृश्यानल्पकल्पनामण्डितप्रतिभावन्तो भास्वन्तो महाकवयः स्निग्धविमलकाव्यवारिधारया सिञ्चन्ति तातप्यमानं मरुसहोदरं मनुजहतहृदयम् । अत एव कवयन्ति ते । सरसललितोचितसन्निवेशचारुणा काव्येन परमानन्दसन्दोहजनकतया निखिलजडचेतनरागमयीं सत्त्वोद्रेकां चिन्मयीं दशामुत्पादयन्ति महाकवयः । या चोच्यते तन्मयीभवनमिति ।

महाकवीनां प्रातिभी तूलिका रचयति किमप्यपूर्वं येन नीरसान्यपि सरसानि क्रियन्ते, निर्जीवा अपि सजीवायन्ते, जडोऽपि चेतनायते, संगीतमिव चानुभूयते वनदेवतानां, वयसां विरावः । एतदेवाभिप्रेत्योक्तम् ।

जयन्ति ते सुकृतिनः रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजं भयम् ॥

अस्यामेव कविपरम्परायां परिगण्यते महाकविर्माघः । नानाशास्त्रावगाहिनी तदीया सूक्ष्मेक्षिका, या रहस्यभूतं तथ्यं सर्वात्मना आत्मसात्कृत्य पुरः स्फुरदिव प्रस्तौति पुरस्तात् सहृदयानाम् । अनेन प्रवाहिता समधिका माधुरीझरी स्वकीयकाव्ये । पदानि च प्रयुक्तानि तादृशानि मृदूनि यानि झटित्यावर्जयन्ति चेतांसि सचेतसां काव्यरसरसिकानाम् । एतदीयकाव्यस्य रुचिरतां ह्लादनपरायणताञ्च

प्रैक्ष्योक्तं केनापि— मेघे माघे गतं वयः । अर्थात् मेघदूते माघकाव्ये च तेन व्यतीतं वयः ।

न्यक्कृतकविभासः कालिदास· उपमायां दक्षः, अर्थगौरवे चादक्षः, पदलालित्ये चाप्रशस्तः । भारविस्तु अर्थगौरवे सिद्धः उपमायामसिद्धः, पदलालित्ये च विप्रतिसिद्धः । दण्डी नु पदलालित्ये निपुणः, उपमायामनिपुणः अर्थगौरवे चानभ्यस्तः । अपाकृतदोषौघो माघो दत्तकदारकः, उपमाकारकः, अर्थगौरवापादकः, पदलालित्यस्थापकश्चेति काव्यार्थपरिशीलनपरिष्कृतशेमुषीकाणामाकूतम् । तदुक्तम्—

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ।।

प्रस्तुते प्रबन्धेऽतिरिच्य माघस्य निखिलं वैशिष्ट्यं पदलालित्यमेव प्रस्तूयते समासतः । किं नाम पदलालित्यम् ? कथञ्चैतद् भवति काव्यस्य महत्वाधायकमिति चेत् पदानि भवन्ति सुबन्तानि तिङन्तानि च । ललितस्य भावो लालित्यं माधुर्यमिति यावत् । एवञ्च पदेषु वाक्येषु संघटनायां वा यत्र श्रुतिसुखदं माधुर्यमवतिष्ठते तत्रैव पदलालित्यमिति शक्यते वक्तुम् । पदवाक्यगतं लालित्यं श्रुतिकटुत्वादिदोषपरिहीणं शब्दसौष्ठवं झटित्यावर्जयति चेतांसि सचेतसां प्रवर्तयति च काव्यार्थानुशीलने प्रवर्द्धयति च गरिमाणं काव्यस्येति महनीयता पदलालित्यस्य ।

महाकविर्माघो नोपेक्षते पदलालित्यं कदाचन । एतदीयमहाकाव्ये असाधारणं सालंकारवर्णनं पदे पदे माधुर्योपेतं शक्यते द्रष्टुम् । एकस्मिन् पद्ये प्रकृतिचित्रणं कुर्वताऽनेन जीवनस्य पक्षद्वयं कियदिव सुन्दरं चित्रितमिति दृश्यतां—प्रभातवर्णने—

कुमुदवनमपश्रि श्रीमदम्भोजषण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिलसितानां हा विचित्रो विपाकः ।। 11–64

उदीयमानं सूर्यं सम्प्रेक्ष्य अपगतश्रीकं कुमुदवनं म्लानं भवति । कमलवनानि च विकचानि, अत एव श्रीमन्ति अवलोक्यन्ते । दिवान्धा उलूका ये निशासु एव रमन्ते ते कथं न विमनायन्तां सूर्योदये । नैशं विप्रयोगमासाद्य प्रियायाः सायासः चक्रवाको मुदमुपैति साम्प्रतम् । उदेति सूर्यः, चन्द्रश्चास्तमेतीति विधिविलसितानि भवन्ति विचित्राणि । एकत्र सूर्यस्य बालरूपेण रिंगतश्चित्रणं पदमाधुर्योपेतं कियदिव सुखदमिति पठ्यताम्—

उदयशिखरशृङ्गप्राङ्गणेष्वेव रिंगन्
सकमलमुखहासं वीक्षितः पद्मनीभिः ।

विनतमृदुकराग्रः शब्दयन्त्या वयोभिः
परिपतति दिवोऽङ्के हेलया बालसूर्यः ।।

उत्थातुमक्षमो बालो यथा रिङ्गति प्राङ्गणे तथैव बालसूर्यः उदयगिरिशृङ्गात्मके प्राङ्गणे रिङ्गन् दिवोऽङ्के परिपतति । पदलालित्ये वर्णानां माधुर्यम्, भाषायाः संगीतात्मकत्वम्, भावानुसारिभाषाश्रयणम्, भाषायामपि आरोहावरोहक्रमश्चापेक्षितो भवत्युत्कर्षाय काव्यस्य । ऋतुवर्णनप्रसंगे माघस्य षष्ठसर्गे यमकयुतानि मधुरमधुराणि पद्यानि पदलालित्यस्य परां काष्ठां गतानि ।

मनाक् देया दृष्टिः भाषायाः संगीतात्मकत्वे—

मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ।। 6–20

मधुरया मनोहरया मधुकराङ्गनया मुहुर्निभृताक्षरमुज्जगे । मधुकर्या च मधुना वसन्ते बोधितानां विकासितानां मधुना समेधितमेधयासंवर्धितप्रतिभया भूयते । अत एव मदापादकध्वनिभृता उज्जगे गीतमिति भावः ।

सानुप्रासा सरसपदावलीयं कियदिव मनोहारिणीति जानन्ति तत्त्वज्ञा एव । यमकालंकारेऽपि भाषायाः माधुर्यं कीदृशं प्रस्तुतं कविनेति दृश्यताम्—

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः ।। 6–2

समागतो वसन्तः । यत्र नवपलाशानि नवीनपर्णोपेतानि पलाशवनानि राजन्ते । क्वचिच्चस्फुटानि विकचानि परागैः परागतानि परिव्याप्तानि अरविन्दानि विलसन्ति । मृदुलाः कोमला अत एव तान्ता आतपसमये किञ्चिन्म्लाना लतान्ताः पल्लवा यस्मिन् तं सुमनोभरैः सुरभिं सुगन्धिं सुरभिं वसन्तं हरिरपश्यत् ।

क्वचित् भावानुसारिभाषाश्रयणे पदलालित्यमनुभूयताम्— अलिभयादपसरन्त्या कयाचित् कलकलो ध्वनिः कृतः । सौरभं तदीयं वदनम् । हठादाकृष्टास्तत्र भ्रमराः । भ्रमरभयात् यः संभ्रमस्तया संभृतशोभया चञ्चलाक्ष्या चलितया अत एव कलो मेखलायाः कलकलो विदधे । पठ्यताम्—

वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया ।
चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशान्यया ।। 6–14

शब्दालंकारस्यार्थालंकारस्य च प्रयोगे दक्षो माघः कलापक्षस्य भावपक्षस्य च निपुणं प्रस्तोता । रैवतकं वर्णयताऽनेन निदर्शनायाः कियान् खल्वभिनवः प्रयोगः कृत इति दृश्यतामधोलिखितपद्ये—

उदयति विततोर्ध्वरश्मिरज्जा-
वहिमरुचो हिमधाम्नि याति चास्तम् ।

वहति गिरिरयं विलम्बिघण्टाद्वय-
परिवारितवारणेन्द्रलीलाम् ।। 4–20

रैवतकस्यैकभागे सूर्यः उदेति । एकभागे च चन्द्रोऽस्तमेति, तस्मात् बिभर्ति गिरिरयं तादृशगजस्य तुलां यमुभयतो लम्बते घण्टाद्वयम् ।

शृङ्गाररसस्य विभावानुभावयोश्चित्रणे माघः कुशलः । सूर्यास्तस्य च वर्णनं कुर्वता कविना इदमेवाभिव्यज्यते यत् चन्द्रस्य ज्योत्स्ना उन्मदयति विभावान् । सुरत-क्रीडाप्रसंगे निपुणं प्रस्तुतीकृता शृङ्गारस्यानुभावाः । परन्तु माघस्य शृङ्गारचित्रणम् अतिस्फुटं वैरस्यमप्यापादयति कदाचित् । यत्र कुत्रापि मर्यादामनुल्लंघ्यापि सरसपद-कदम्बकश्चित्रितः शृङ्गारोऽनेन । यथा—

यां यां प्रियः प्रैक्षत् कातराक्षीं
सासा ह्रिया नम्रमुखी बभूव ।
निःशंकमन्याः सममाहितेर्ष्या-
स्तत्रान्तरे जघ्नुरमुं कटाक्षैः ।।

अत्रापि कोमलकान्तपदावल्यां शृङ्गारचित्रणं कामप्यपूर्वामेव शोभां बिभर्तीति विदन्ति विज्ञाः ।

"क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।"

इति माघस्योक्त्या रमणीयतां प्रति तस्य विशेषरूपेणाकर्षणमिति शक्यते वक्तुम् । रमणीयता च पदानां लालित्यानतिरिक्ता । ललितपदविन्यासे माघः सिद्धहस्तः । पदमाधुर्यस्य निपुणता यदि द्रष्टव्या वर्तते चेत् तदा माघकाव्यं दर्शनीयम् ।

दृश्यतामधोलिखितपद्येऽनवद्यं लालित्यम्—

विकचकमलगन्धैरन्धयन् भृङ्गमालाः
सुरभितमकरन्दं मन्दमायाति वायुः ।
समदमदनमाद्यद्यौवनोद्दामरामा
रमणरभसखेदस्वेदविच्छेददक्षः ।। 11–19

विकसितकमलगन्धैर्भृङ्गमालारुन्मदयन्, मकरन्दं सुरभितमापादयन् रति-लीलाश्रमजन्यस्वेदविच्छेददक्षो वायुर्वातीति चित्रितमत्र कविना । नास्त्यावश्यकता कथनस्य यद् मध्ययुगीनकाव्यगता विशेषताः सर्वाः शक्यन्ते द्रष्टुं माघकाव्ये । वर्णन-चातुर्यं, भावगाम्भीर्यं, कोमलपदविन्यासः, श्लिष्टपदोपन्यासः, अद्वितीयः शब्द-बन्धश्च तदानीन्तनीयेषु काव्येषूपलभ्यत एव । एतत् सर्वमभिप्रेत्यायं प्रवादो यन्माघकविः कलावादी । नास्य दृष्टिः काव्यस्य सर्वात्मनि तत्त्वे आत्मस्वरूपे ।

परं कथनमिदं न सर्वात्मना तथ्यतामुपैति । माघेन न केवलं कलापक्ष एवोररीकृतोऽपितु भावपक्षोऽपि सम्यक् परिगृहीतस्तेन । कविनानेन श्रीकृष्णस्य युद्धवीरतायास्तादृशं कृतं चित्रणं येन समेधते समुत्साहः, संचारश्च भवति नवजीवनस्य । मध्ये मध्ये शृङ्गारादयो यद्यपि आनीयन्तेऽनुभूतिपथं तथाप्यत्र प्रधानस्तु वीररस एव । तदुक्तं मल्लिनाथेन—

नेतास्मिन् यदुनन्दनः स भगवान् वीरः प्रधानो रसः
शृङ्गारादिभिरङ्गवान् विजयते पूर्णा पुनर्वर्णना ।
इन्द्रप्रस्थगमाद्युपायविषयश्चैद्यावसादः फलं
धन्यो माघकविर्वयन्तु कृतिनस्तत्सूक्तिसंसेवनात् ॥

वयं ब्रूमः— नात्र वीरस्यप्राधान्यं न वा शृङ्गारस्य, किन्तु कविनिष्ठा भगवद्विषया रतिरेवात्र प्रधानम् । एवञ्च भावस्यात्र प्राधान्यम् । भावश्च रस्यत आस्वाद्यत इति व्युत्पत्त्या रस एव । तस्मात् रसाभिव्यञ्जकतया माघकाव्यं ध्वनिकाव्यमेव । माघ एवैकस्तादृशः कविर्यस्य जीवनचरितं लोकविश्रुतम् । माघश्च स्वकीयेन वैशिष्ट्येनानवरतभासमाने कविपरम्परावाहिनि संसारे किमपि विशिष्टं स्थानं बिभर्तीति काव्यभावनाभरितान्तःकरणानां सहृदयानामाकूतमिति संक्षेपः ।

काव्यम्

असारमिदं जगत् प्रतिपदमायासयति प्राणिनः, दर्शयति अनिष्टम्, जनयति चोद्वेगमित्याकलय्य महीयांसः कवयो लोकोत्तरानन्दसन्दोहजनकतया चतुर्वर्गफल प्राप्तये काव्यात्मिकां सारस्वतीं सृष्टिमरीरचन् । अत एव प्रभुसम्मितवेदादिशास्त्रेभ्यः सखिसम्मितपुराणेतिहासेभ्यश्च विलक्षणा सत्कविभणितिः मधुरमभिदधती मञ्जुभाषिणी कामिनीव प्रवणयति मानवमनांसि शुभैकनिदानेष्वभ्युपायेषु । अत एवोक्तम्—

> चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
> काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ।।

काव्यं नाम कवेः कर्म । कविश्च क्रान्तद्रष्टा भवति । स हि न केवलं संकुचितं परिमितं वा अर्थजातं पश्यति, न वा केवलो मनुष्योऽहमिति कृत्वा मानवीयान् भावान् एव साक्षात्करोति, अपि तु तस्य कृते विश्वेषां निर्मुक्ता विस्तृता च स्थली वर्तते । स सरित्प्रवाहे मधुरं गानं शृणोति, क्वचिच्च आकर्णयति वयसां विरावे वनदेवतानां सन्देशम्, प्रकाशयति चापरत्र प्राच्यां चन्द्रोदये वनितासुखसम्भोगम्, ख्यापयति चान्यत्र नायिकामुखमकलंकचन्द्रमसा तुल्यम् । दैशिककालिकपरिधयस्तं परिवेष्टुं समर्थाः न भवन्ति । स कालातीतां रचयति, देशातीतां दर्शयति, परोक्षम्, प्रत्यक्षयति, भूतं भावयति, जडं चेतनयति, निर्बलं सबलयति, किं बहुना अधरीकरोति ब्रह्माणमपि विरचय्यापूर्वमपारं काव्यसंसारम् । एतत् सर्वं विमृश्यैव मम्मटाचार्यः काव्यप्रकाशे ब्रह्मणः सृष्टेरपेक्षया काव्यसृष्टेर्महनीयतामुदचीचरत् । ब्रह्मणः सृष्टिः षड्रसोपेता क्वचित् हृद्यापि भवति क्वचिदायासकरी, न चेयं कविसृष्टिस्तथा ।

इयं हि नवरसोपेता सर्वदा सर्वान् ह्लादयति, नैराश्यनीहारं निरस्यति, उत्साहं समेधयति, लौकिकं जनं सुखयति, सहृदयं चमत्करोति, मुमुक्षुं मोचयति, अलमनल्पजल्पनया कविभारतीयमघटितमपि घटयन्ती निखिलं प्रसाधयति ।

यद्यपि निखिलं जगत् बिम्बरूपतया काव्यक्षेत्रं तथापि विश्वस्य निखिलं वस्तु न भवति काव्योपादानम् । काव्यगुम्फने तु तादृशस्योपादानस्यावश्यकता वर्तते यत् क्षोदीयसीं भावनां परिसमाप्य समुत्थाप्य च क्षुद्रधरातलात् जीवनतलं ज्ञानस्य सौन्दर्यस्य च नभस्तलमारोहयेत् । प्रदर्शयेच्च सत्यं शिवं सुन्दरमित्यस्य दिव्यं पन्थानम् । शिवतत्त्वमेव काव्यस्य परोपनिषद् ।

कविः विश्वेषां जनानां प्रतिनिधिः; तस्यविचाराः भवन्ति समेषां विचाराः। अत एव कवेरनुभूतिः ललितपदकदम्बकरूपमाकलय्य, स्वानुभूतिरिव सहृदयहृदयं प्रविश्य, आनन्दयति, रमयति, मदयति, मोहयति च यथावसरम्। अत एवोक्तमभियुक्तैः :—

सरस्वती स्वादु तदर्थवस्तु
निःष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति
परिस्फुरन्तं प्रतिभाविशेषम्॥

लोकोत्तरवर्णनानिपुणः कविः रसैकतानपरायणः विशिष्टामेव रचनां रचयति। तत्र न रागस्य स्थानम्, न वा द्वेषस्योज्जृम्भणम्, न च कलहस्य वावकाशः। अत एव तदीया रचना जीवन्ती भूयसे कालाय सुस्थिरेवावतिष्ठते। शारीरिकबुभुक्षादिशमनायान्नाद्याहारस्येव मानसिकश्रमापकरणपुरःसरम् अपूर्वमानन्दमुत्पादयितुमेव सारस्वतसृष्टेरवतारः। तत्रापि यदि रागद्वेषकलहादयः समुज्जृम्भेरन् तर्हि को नाम भेदस्तमः प्रायजनेभ्यो विलक्षण रचनापरायणस्य कवेः? अत एवेदानीं वर्षाकालिकमण्डूका इव प्रत्यहं निर्मीयमानान्यपि भूयांसि काव्यानि रागद्वेषपारस्परिकेर्ष्याज्वरग्रस्तानि नावलोक्यन्ते सहृदयैः, नाद्रियन्ते सामाजिकैः, न साक्षात्क्रियन्ते विदग्धैः, अपितु उपहस्यन्ते सर्वैः, विलीयन्ते चाचिरादेव।

यदप्युच्यते — कालिदासीयादिकाव्येषु वर्णितं केवलं विलासमयं जीवनम्, दर्शितः यौवनस्योद्दामो विलासः, उपदर्शितः क्वचित् वासन्तिकमदमत्तकषायकंठकलकंठीकलरवः, क्वचिच्च तारतरमुच्चरतां वयसां विरावः, अपरत्र मायूरः केकारवः। परञ्च न खलु चित्रितं क्वचिदपि शैत्यवशात् कटकटायमानदन्तानां हीनानां दीनानाञ्च इतिवृत्तमपि। सेयं प्राचीनकाव्येषु असह्या न्यूनता शिरःशूलायते।

परमेतत् सर्वमविचारितरमणीयम्— यतो हि— इदानीन्तनविषमपरिस्थितिपरिक्लान्तानां पित्तोपहतचक्षुषां तदानीन्तने स्वर्णयुगेऽपि दीनतायाः दरिद्रतायाश्च दिदृक्षाया ईर्ष्यामूलकत्वेनोपेक्ष्यमाणत्वात्। यदि स्यादपि कथञ्चिदणुमात्रं क्वचित् तादृशमनभीष्टं तथ्यं तदानीं, तदा गुणसन्निपाते निमज्जमानस्य स्वल्पदोषस्येवोपेक्षणीयमेव तन्महाकवीनाम्।

किञ्च-काव्यं सप्रयोजनं साधयितुकामेन प्रवृत्तिमता कविना ऐतिहासिकं चित्रणं न खल्वभीष्टाय कल्प्यते। तथा चित्रणपरायणे तु तस्यात्मपदवाच्यत्वमपि न सिद्ध्येत्। "रसो वै सः" "रसं ह्येवायं लब्ध्वा आनन्दीभवति" इत्यादिश्रुत्या आनन्दस्य ब्रह्मरूपतया सच्चिदानन्दस्वरूपस्य ब्रह्मणः आनन्दांशस्यैव विवर्तमिदं जगदिति कृत्वा तदुद्बोधनायैव महाकवेः प्रवृत्तिः। एतदेव नूनं सत्यं चित्स्वरूपममृतञ्च स्वीयया समुज्ज्वलया प्रभया देदीप्यमानमपि अज्ञानावरणेनाच्छन्नमुद्बोध-

काभावात् तिरोहितं सदपेक्षते चिद्गतावरणभंगं, तदाकाराकारितामन्तः करणवृत्तिं वा। अत एव समुचितललितसन्निवेशचारुणा काव्येन समर्पितैः पुनः पुनरनुसन्धानात्मिकया भावनया अलौकिकत्वमुपगतैः विभावादिभिः सम्भूय प्रादुर्भावितेन व्यञ्जनाव्यापारेणापाकृते आनन्दांशावरणे अज्ञाने भग्नावरणचिद्विशिष्टः स्थायी विगलितवेद्यान्तरसम्पर्कः सन् उपभुज्यते कैश्चित् पुण्यवद्भिः। तदुक्तम्—

पुण्यवन्तः प्रमिण्वन्ति योगिवद् रससन्ततिम्।

अयमेव च काव्यस्य मेरुदण्डः। एवमापादयतः काव्यस्य भवति हृद्यता, उपादेयता, सार्वजनीनता चेति मनाग् मुकुलितलोचनैर्विभावनीयम्।

लोकोत्तरवर्णनानिपुणकवेः कर्म काव्यम्, इति स्थिते काव्यत्वं शब्दपर्याप्तम्, अर्थपर्याप्तं, तदुभयपर्याप्तं वेति भवति विचिकित्सा। वर्णनञ्च भवितुमर्हति अर्थस्य। न चार्थः कवेः कर्म। न हि केनापि कविना कोप्यर्थः समुत्पाद्यते। अतः कविकर्मता केवलं शब्दनिष्ठैव। सा चेयं कविकर्मता केवलं गुम्फनात्मिकैव न तु उत्पाद्यत्वरूपा, शब्दानां नित्यत्वेन कव्युत्पाद्यतायास्तत्र वक्तुमशक्यत्वात्। अत एव काव्यं लक्षयति अग्निपुराणे "संक्षेपात् वाक्यमिष्टार्थव्यवच्छिन्नापदावली" इति प्राथमिकं काव्यलक्षणमुपलभ्यते। पदावली च शब्दसमूहात्मिकेति तत्र कविकर्मता वक्तुं सुशका। अयमेव शब्दपर्याप्तकाव्यतावादः आचार्यदण्डिनाऽपि स्वीकृतः[1]। अत्र च काव्यलक्षणद्वये निभालितम् केवलं काव्यस्य बाह्याङ्गतत्त्वं दोषगुणालंकारादिकम्, न च मनागपि स्पृष्टं काव्यस्य जीवनाधायकं तत्त्वम्। अतः स्थूलदृशा विचारमपहाय शब्दनिष्ठकाव्यतावादी दर्पणकारो विश्वनाथः सूक्ष्मेक्षिकया ध्वनिकारादिभिः निर्धारिते वस्त्वलंकाररसरूपे त्रिविधे ध्वनौ काव्यात्मतत्त्वे तन्मध्यतः रसध्वनिमेव काव्यात्मत्वेनाङ्गीकृत्य— "वाक्यं रसात्मकं काव्यमिति लक्षणयाञ्चकार। परन्तु विश्वनाथस्य शब्दमात्रे काव्यतास्वीकरणं पुनस्तदीयया "काव्यं द्विविधंदृश्यं श्रव्यञ्चेति" स्वकीयोक्त्या एव विप्रतिषिद्धमिति चिन्तनीयमेवास्ते।

शब्दमात्रकाव्यतावादिषु पण्डितराजजगन्नाथस्य प्रमुखं स्थानम्। अनेन हि महता संरम्भेण साधितः शब्दकाव्यतावादः। तथा हि यदि काव्यत्वं शब्दार्थयोः व्यासक्तं स्यात् तदा अवयवस्य समुदायातिरिक्तत्वेन प्रत्येकवृत्तिधर्मावच्छिन्नानुयोगिताकसमुदायत्वावच्छिन्न प्रतियोगिताकभेदस्याङ्गीकर्त्तव्यतया 'घटो न घटपटौ' इति यथा व्यवहारः तथैव श्लोकवाक्यं न काव्यमिति व्यवहारोऽप्यापद्येत, काव्यत्वस्य श्लोकवाक्यात्मकशब्दमात्रे पर्याप्तेरभावेन श्लोकवाक्यत्वावच्छिन्नानुयोगिताक—शब्दार्थोभयत्वावच्छिन्नप्रतियोगिताकभेदस्य सुस्पष्टं वक्तव्यतया तथा वक्तुंशक्यत्वात्। यदि च काव्यत्वं शब्दमात्रपर्याप्तं स्वीक्रियते तदा "श्लोकवाक्यं न काव्यमिति" व्यवहारो नैव जायते। यतो हि तथा सति भेदीयप्रतियोगितावच्छेदकं तथा

1. शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली।

अनुयोगितावच्छेदकञ्चैकं शब्दत्वमेवेति "घटो न घटः" इति व्यवहारो यथा न भवति तथैवोपर्युक्तो व्यवहारोऽप्यशक्य एव ।

काव्यत्वस्य प्रत्येकं पर्याप्तत्वे स्वीक्रियमाणे तु एकस्मिन्नेव काव्ये शब्दःकाव्यम्, अर्थः काव्यम् इति काव्यद्वयव्यवहारः केन वार्यताम् ? तस्मात् "रमणीयार्थप्रतिपादकः शब्दः काव्यम् । अत एव "काव्यं पठ्यते, काव्यादर्थोऽवगम्यते" काव्यं श्रुतम् इत्यादयो व्यवहाराः सम्पद्यन्ते ।

अत्र ब्रूमः— यथा शब्दः कविकर्म तथा अर्थोऽपि कविकर्म वर्तत एव । स्वतः सम्भविनोऽर्थाः कविसमवेतरसबोधौपयिकसामग्रीविषयकज्ञानकर्मत्वाक्रान्ताः सन्ति एव । ह्लादोत्पादकमर्थं मनसि पूर्वं निश्चित्यैव काव्यकरणे जायतेप्रवृत्तिः महाकवीनाम् । एतदतिरिक्तं भवन्ति केचन तादृशाः अर्थाः ये न खलु लोकप्रसिद्धिमुपगतास्तथापि कविकल्पना-प्रसूताः विच्छित्तिविशेषजनकाः कविप्रौढोक्तिसिद्धपदेन व्यवह्रियन्ते । एवञ्चार्थेष्वपि कविकर्मता स्पष्टमेव प्रतिभाति ।

तस्मात् कविकर्मत्वेन शब्दार्थयोः उभयोः काव्यत्वे न काचित् विप्रतिपत्तिः । अत एव 'काव्यं श्रुतम्' काव्यं पठितम् इत्यादिव्यवहारवद् "काव्यं बुद्धमिति" अर्थस्य काव्यत्वविषयकोऽपि व्यवहारो दृश्यते लोके । न च काव्यत्वस्योभयपर्याप्तत्वे "श्लोकवाक्यं न काव्यमिति व्यवहारापत्तिस्तदवस्थैवेति वाच्यम् ? काव्यत्वस्योभयनिष्ठत्वेऽपि लक्षणया अन्यतरस्मिन् अपि काव्यपदप्रयोगस्य कर्त्तुं शक्यतया तादृशापत्ते वारणात् । अत एव वेदत्वस्य शब्दार्थोभयनिष्ठत्वेऽपि "ऋचः पठति" इति शब्दमात्रे भाक्तः ऋक् प्रयोगः संगच्छते ।

वस्तुतस्तु शब्दमन्तरा अर्थस्य अर्थमन्तरा शब्दस्य चावस्थानाभावेन तयोस्तादात्म्यं वर्तते । तादात्म्यञ्च तद्भिन्नत्वेऽपि तदभेदेन प्रतीयमानत्वम् । अत एव अर्थे शब्दधर्मत्वव्यवहारो जायते यत् "पदं श्रुतम् अथार्थं शृणु" । अत्र अर्थे श्रावणप्रत्यक्षविषयत्वरूपः शब्दधर्मः प्रयुक्तो वर्तते । एवञ्च शब्दार्थयोरुभयोः काव्यत्वस्वीकारे न प्रतिभाति कश्चन प्रत्यवायः । पण्डितराजेन शब्दमात्रे काव्यतां स्वीकुर्वताऽपि तत्र रमणीयार्थस्य सत्ता स्वीकृतैव । यदि तदभिमते शब्दात्मके काव्ये रमणीयार्थप्रतिपादकता न स्यात् तदा तस्य काव्यत्वमेव व्याहतं स्यात् । अतः काव्यत्वमुभयपर्याप्तमेव ।

शब्दार्थयोः काव्यत्वस्वीकारादेव अर्थदोषगुणालंकाराणाम् अर्थशक्तिमूलकध्वनीनाञ्च निरूपणं संगतं भवति । शब्दमात्रस्य काव्यत्वे तु तद्गतानामेव दोषगुणालंकाराणां विवेचनस्यौचित्येन भूयसामर्थगतानां दोषगुणादीनां विवेचनस्योन्मत्तप्रलापत्वापत्तिः स्यात् । अतः रसप्रतीतिविघातकदोषरहितौ माधुर्यादिगुणसम्पृक्तौ सालंकारौ क्वचिन्निरलंकारावपि शब्दार्थौ काव्यम् । तस्य जीवातुभूतं तत्त्वं ध्वनिः ।

स च यद्यपि वस्त्वलंकाररसरूपस्त्रिविधः, तथापि वस्त्वलंकारयोः वाच्यसहिष्णुव्यङ्ग्यत्वेऽपि रसरूपो ध्वनिः सर्वथा वाच्यासहिष्णुरिति तस्यैव प्रामुख्यं विलसति काव्यक्षेत्रे। अत एवोक्तम्—

दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।
सर्वे नवा इवाभान्ति मधुमासे द्रुमा इव ।।

तस्य च व्यञ्जकता क्वचित् शब्दे क्वचिच्चार्थेऽवतिष्ठते। यत्र शब्दस्य व्यञ्जकता तत्रार्थस्य सहकारिता, यत्र चार्थस्य व्यञ्जकता तत्र शब्दस्य सहकारिता भवति। नियामकश्चात्रान्वयव्यतिरेकसहचार एव। एवं रीत्या रसप्रधानं काव्यमेवात्रोपादेयम्। तदेव च कृत्ये प्रवर्तयति, निवर्तयति चाशुभात्, प्रेरयति विश्वमानसं प्रेयसि, दर्शयति च श्रेयः। अतस्तदेव साध्यं, साधितं वा स्यात् यथा तथा यतनीयम्।

काव्यालोचने शाब्दोऽनुपातः

अतिरोहितः खल्वेष विषयः पुरस्तात् विदुषां यद् व्याकरणशास्त्रं निखिलशास्त्रोपयोगि प्रधानञ्च षडंगेषु मुखमिवेति। इदमेव व्याख्यातृ धातुप्रत्ययादीनां, साधयितृ संख्यातीतानां रूपाणाम्, विवेचकं साधुत्वस्य, अपकारकमसाधुत्वस्य, नीरक्षीरविवेकवत् शब्दापशब्दपरिज्ञानमानदण्डभूतम्, शब्दबोधप्रदीपकम्, नामाख्यातोपसर्गनिपातप्ररूपकम्, किं बहुना उपकरणैरेभिः सर्वशास्त्रोपकारकमिति विदन्त्येव तज्ज्ञाः। वरीवृत्यन्ते व्याकरणशास्त्रगृहीतानितत्त्वानि येन केनापि प्रकारेण शास्त्रान्तरेषूपकारकाणि।

वैयाकरणानां सूक्ष्मचिन्तनस्य पराकाष्ठा स्फोटात्मके शब्दपरिकल्पने स्पष्टतया परिलक्षितुं शक्यते। एनामाधारीकृत्याद्य व्याकरशास्त्रं न केवलं व्युत्पत्तिप्रयोजकमेवापितु विवेच्यविषयमाधारीकृत्य दर्शनशास्त्रतां बिभ्रद् कामप्यपूर्वां सरणिमनुसरतीति जानन्त्येव तत्त्वविदः।

शब्दशास्त्रे स्फोटपरिकल्पना कथमिति जिज्ञासा चेदवधार्यतां किमपि—शब्दो हि निखिलव्यवहारसाधनम्। जगति खलु जायन्ते यावन्तो व्यवहारास्ते सर्वे शब्दायत्ता एव। पुरा मानवोऽनुकरणेन इङ्गितेन व्यवहारयाम्बभूव, पश्चात् च तद्द्वारा तस्य शब्दज्ञानमजायतेत्यादि कथनं केवलमज्ञानविजृम्भणमात्रम्। मानवानां ध्वनियन्त्रमेतादृशं विलक्षणं निर्मितं येनासौ स्वनिर्माणकालादेव स्पष्टं समुच्चारयन् प्रसाधयति निखिलं व्यवहारं वाग् द्वारा। यावती पुरातनी सृष्टिः मानवस्य तावानेव पुरातनस्तदीयः शब्दप्रयोज्यो व्यवहारः।

स चायं शब्दः किं स्वरूपः ? नित्योऽयमनित्यो वेति विसंवादः। तत्र शब्दस्यानित्यत्वमिति नैयायिकादयः। तेषामिदमत्राकूतम्— कृते प्रयत्ने जायते शब्दस्तस्मात् कार्योऽसौ घटवत्। कार्यत्वमनित्यत्वञ्च परस्परमविनाभावीति एकतरसिद्धावन्यतरसिद्धिः सुतरामेव। फलतः शब्दोऽनित्यो घटवत्। किञ्च-उच्चारणानन्तरं नैनं मुहूर्तमप्युपलभामहे, तस्मादाशुविनाशितया अनित्यः शब्दः। करोति शब्दव्यपदेशाच्चानित्यत्वं शब्दस्य। घटं कुरु इतिवत् प्रयुनक्ति प्रयोक्ता 'शब्दं कुरु, मा शब्दं कार्षीः।' एभिः प्रमाणैरिदं स्पष्टं शक्यते वक्तुं यद् शब्दोऽनित्यः। न चात्र मते किमिदं पदं नाम किञ्च वाक्यमितिजिज्ञासा चेत् तेषां कथनमिदं यद्-वर्णसमूहः पदम्, पदसमूहो वाक्यम्। किन्तु नैतत् समीचीनं यतो हि वर्णसमूहस्य परिकल्पना अलीकप्राया, तेषामाशुविनाशितायास्तेनैवोपपादितत्वात्।

अत एव वाक्यकल्पनाऽपि पराहतैव । न च क्रमभाविनां वर्णानां संस्कारद्वारा कार्यकरत्वं वक्तुं शक्यम् ?, यथा क्रमेणोत्पन्ना अपि ग्रासाः समुदितास्तृप्ति जनयन्ति । एकस्मिन्नपि ग्रासे हीयमाने न भवति तृप्तिः । अतः समस्ता एव ग्रासास्तृप्तेः कारणम् । न च युगपत् प्रयुज्यन्ते तेऽपितु क्रमश एव । एवं क्रमोत्पन्ना अपि वर्णा एवार्थाभिधानक्षमाः । एवञ्च अनित्या वर्णाः शब्दजशब्दन्यायेन पदवाक्यप्रत्यक्षं कुर्वाणा वाचकतामुपयान्ति ।

अत्रेदं वक्तव्यम्— घटपदघटकप्रत्येकं वर्णस्य कम्बुग्रीवादिमद्व्यक्तिवाचकत्वमुत समुदितस्य ? तत्र न तावदाद्यस्तथा सति एकैकवर्णादर्थप्रतीतौ जायमानायामपर वर्णोच्चारणवैयर्थ्यापत्तेः । न द्वितीयः उच्चरित प्रध्वंसितत्वस्य तवाभिमतस्य वर्णेषु सत्वेन तेषां यौगपद्यस्यकालत्रयेऽपि वक्तुमशक्यत्वात् । पूर्ववर्णस्थितिकाल एव द्वितीयवर्णोत्पत्तिरपि वक्तुमशक्या यावद् गकारे वाग्वर्तते न तावदौकारे इत्यभियुक्तोक्त्या पूर्ववर्णनाशोत्तरं द्वितीयस्योत्पत्तिस्वीकारात् । एवञ्चार्थज्ञानस्य समुदायाधीनत्वेन समुदायस्य च साधयितुमशक्यत्वेन अर्थप्रतीतौ प्रत्यवायपरिहाराय वैयाकरणाः स्फोटवादं प्रत्यपीपदन् । स च स्फोटः–स्फुटति=प्रकाशते अर्थो यस्मादिति व्युत्पत्या अर्थप्रकाशको नित्यः, तद्व्यञ्जकश्चानित्यो ध्वनिः । यादृशोभवति ध्वनिर्मुखात् तादृश एव तद्रूपरूषित एवाभिव्यज्यते स्फोटो वर्णात्मकः पदात्मको वाक्यात्मको वा । प्रणाल्यानया नित्यस्यान्तरस्य स्फोटस्यानित्येन ध्वनिना व्यङ्ग्यव्यञ्जकभावसम्बन्धः । अनेकजपाकुसुमाभिव्यक्तस्फटिकस्येव व्यञ्जकध्वनीनां नानात्वेऽपि न तस्य नानात्वम् । ध्वनिक्रमानुपातितया स्फोटस्य घटशब्दाभिव्यक्तस्फोटे गृहीतशक्तिकस्य कलशध्वनिनाऽभिव्यक्तात् स्फोटात् न भवति अर्थप्रत्ययः ।

एवञ्च स्फोटशब्दस्य व्युत्पत्तिद्वयं भवितुमर्हति–स्फुटति=प्रकाशते अर्थो यस्मादसौ स्फोटः, स्फुट्यते व्यज्यते वर्णपदादिध्वनिभिरिति स्फोटः । अत्र प्रथम व्युत्पत्त्या तस्य वाचकत्वं, द्वितीयया च तस्य व्यङ्ग्यत्वं सुस्थिरम् । न चेदं कल्पनामात्रम् ? अद्यत्वे विज्ञानेनापि संसाधिते शब्दस्य नित्यत्वे यद्यनित्यत्वे एव कस्यचिद् कदाग्रहस्तदा "तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं कापुरुषा पिबन्तिः" इत्युक्ति चरितार्थयन्तु ते । न तेन किमप्यत्याहितं शब्दस्य ।

इतः काव्यालोचनक्षेत्रेऽपि चिन्तनपरम्परा आसीत् गतिशीला । दण्डिनः (ई. 660-680) आरभ्य वामनपर्यन्तम् (800 ई.) अलंकारशास्त्रिणामासीत् महान् योगोऽस्य शास्त्रस्य विकासक्रमे । तस्मिन् समये (I) काव्यस्वरूपम् (II) काव्ये गुणाः (III) काव्य अलङ्काराः इति विषयत्रयं पुरस्तादानीतं लोकस्यालंकारशास्त्रिभिः । नात्र चित्रं यदिदं चित्रणमैकान्तिकं स्थूलम् । स्वरूपं नाम शरीरं, तच्चातीव स्थूलं, तदुपरि अलंकाराणां सन्निवेश इति तु स्थूलतरतामेवा-

भिनक्ति केवलम् । यद्यपि गुणानामप्युपरिकृतो विचारस्तैस्तथापि गुणा आत्मनो धर्माश्चेत् किं स्वरूपमात्मन इति विषये तु शून्यतैवासीत् वामनपर्यन्तम् । यद्यप्युक्तं वामनेन- (I) रीतिरात्मा काव्यस्य (II) विशिष्टापदरचना रीतिः (III) विशेषो गुणात्मा'' इति । एतेन काव्यात्मविषयिणी वामनस्यासीत् सूक्ष्मेक्षिकेति शक्यं वदितुम्, तथापि स आत्मा गुणरूप एवेति प्रतिपादनेन स्थूलदृष्टिरेव तस्येति वक्तुं शक्यम् ।

वामनादति प्राचीनो भरतमुनिः स्वकीयनाट्यशास्त्रे विभावानुभावव्यभिचारि संयोगात् रसनिष्पत्तिरिति सूत्रयाम्बभूव । एतेन स्पष्टं यत् रसस्यनान्तरीयकसत्ता काव्येषु भरतकाल एव सम्मानिता आसीत् । किन्तु भरतात् परवर्तिनोऽलंकारप्रिया गुणप्रिया वा आचार्याः रससदृशं रमणीयतत्त्वमपि गजनिमीलिकया कथमिवावालोकयन्निति विचारणीयो विषयः । वामनः कान्तिनामके गुणे दण्डिभामहादयो रसवदलंकार एवान्तर्भावयाम्बभूवुस्तत्तत्त्वमित्यहो स्थूलदर्शितातेषाम् ।

अनेन पर्यालोचनेनेदं तथ्यं पुरः स्फुरति यत् आन[illegible]शास्त्रीय समीक्षायाम्—

I. रससम्प्रदायः
II. अलंकार सम्प्रदायः
III. रीतिसम्प्रदायः (गुणसम्प्रदायः)

इत्येते त्रयः सम्प्रदाया आसन् । तत्र प्रसिद्धिं गतौ तु गुणालंकारसम्प्रदायावेवास्ताम् । रस सम्प्रदायस्तु तादृशीं स्थितिं नाभजत यादृशीं भजते इदानीम् ।

आलंकारिकजगति आनन्दवर्धनाचार्येण काव्यशास्त्रीयालोचने नवीनतोद्भाविता । इतः पूर्वं ये आचार्यास्ते तु स्वालोच्यतत्त्वस्य काव्ये निश्चितं किमपि स्थानं दातुं तदीयोपयोगिताञ्च प्रतिपादयितुमुदासीना इवावलोक्यन्ते । मन्ये तत्त्वाविष्कारे एवासीत् तेषां दृष्टिर्नतु तदुपयोगेऽपि । आनन्देन काव्यस्यात्माध्वनिरिति व्याहरता काव्यस्य परमसौन्दर्यतत्त्वं ध्वनिनाम्ना संकेतितम् । न च ध्वनितत्त्वमानन्दोपज्ञं 'बुधैः समाम्नातपूर्वः' इत्युक्त्या तस्य प्राक् कालिकत्वात् । रामायणमहाभारतादौ प्रतिपदमनुभूयमानस्यापि तस्य लक्षणकरणशालिनां बुद्धौ तस्यानारोहणमात्रमेव स्थाणोरदर्शनमिवान्धेन ।

गुणालंकारयोरनन्तरं ध्वन्यात्मकस्यप्रतीयमानतत्त्वस्यान्वेषणानन्तरं काव्यशास्त्रीयसमालोचना स्वात्मनि परिपूर्णा । शान्ता च जिज्ञासापरम्परा । जातञ्चान्वेषणं काव्यशास्त्रीयमेरुदण्डस्य । सर्वैश्चिन्तकैर्निर्भ्रान्तं स्वीकृतमिदं तथ्यम् । कथं वा जायेतापि विसंवाद आत्मतत्त्वोपलब्धेरनन्तरमपि । न हि अन्तःकरणावच्छिन्न चैतन्यात्मके आत्मनि प्रयोजकतासम्बन्धेन शरीराधिष्ठिते तद् विषयिणी जिज्ञासा

22576
VN/1733

समुदेति कस्यापि । अनुपमलावण्यवत्यां कामिन्यां निखिलावयवातिशायिलावण्ये को न स्निह्यति ? को वा तत्रान्वेष्टि परमपि किमप्यन्वेषणीयम् ? एवञ्च ध्वनि-तत्त्वमवाप्यविश्रान्तिमुपगते आलोचनाक्षेत्रे न कदापि मात्सर्यं प्रदर्शनीयम् । तदुक्तं ध्वनिकारेण—

अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः ।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ।।

प्रतीयमानार्थ एव काव्यस्य जीवनाधायक इत्यत्र न कस्याप्यलंकारशास्त्रिणो विप्रतिपत्तिः । व्यञ्जनाविरोधी महिमभट्टोऽपि "काव्यस्यात्मनि संज्ञिनि रसादिरूपे न कस्यचिद् विमतिः" इति व्याजहार । किन्तु अस्य प्रतीयमानार्थस्य प्रतीतिः कथं जायते' इति प्रश्ने परापतितो विसंवादः । विसंवादे समाधित्सया पक्षद्वयी प्रस्तुता । तत्रैकपक्षो व्याकरणशास्त्रमवलम्ब्य समादधातिचेदपरोऽवलम्बते न्याय-सरणिम् । तत्र ध्वनिकार आनन्दवर्धनो व्याकरणपक्षमवलम्ब्य प्रतीयमानार्थप्रतीतिं स्वीचकार । वैयाकरणमतानुसारमनित्या वैखरी नार्थप्रत्यायनक्षमेति अर्थप्रत्याय-नायाङ्गीकृतः स्फोटो वैयाकरणैरितिपूर्वमेवावोचम् । तत्र चानित्यया वैखर्या नित्यस्य स्फोटस्य व्यङ्ग्यव्यञ्जकभावः सम्बन्धः । वैखर्यात्मकः शब्दो वैयाकरणैः ध्वनिरिति नाम्नाभिहितः ।

प्रतीयमानार्थप्रत्यायनविषये ध्वनिकारेण वैयाकरणानामियमेव सरणिर-वलम्बिता । यथा वैयाकरणानां स्फोटो भवत्यव्यक्तस्तद्व्यञ्जकश्च वैखरीध्वनि-र्व्यक्तस्तथैव साहित्यक्षेत्रेऽपि प्रतीयमानोऽर्थो वाचकलक्षकशब्दावेद्यत्वादव्यक्त एव भवति । तद् व्यञ्जकश्च वाचको लक्षको वा व्यक्त एव शब्दो भवतीति स्फुटमेव साम्यमत्र । इयद्साम्यमवाप्य आचार्य आनन्दवर्धनो न केवलं व्यञ्जकस्य व्यङ्ग्यस्य वा कृतवानभिख्यां ध्वनिरिति, अपितु यत्र ध्वन्यते तद् काव्यमपि ध्वनिरिति प्रख्या-पयामास ।

एतन्मतानुसारम्—

(i) ध्वन्यते व्यज्यते योऽसौ ध्वनिर्व्यङ्ग्यरसादिः ।
(ii) ध्वनति व्यञ्जयति योऽसौ ध्वनिः शब्दोऽर्थश्च ।
(iii) ध्वन्यते येन व्यापारेण सोऽपि ध्वनिर्व्यञ्जना व्यापारः ।
(iv) ध्वन्यते यत्र काव्ये तदपि ध्वनिनामकमुत्तमं काव्यम् ।

प्रकारेणामुना निखिलवाङ्मयव्यापकं ध्वनितत्त्वं समजायतेत्यत्र समालो-चकानामैकमत्यम् ।

ध्वनिशब्दस्यैवं व्यापकार्थत्वं प्रतिपाद्य तस्य व्याकरणोपज्ञत्वं संसूचयन् व्याहरति ध्वनिकारः— प्रथमे हि विद्वांसो वैयाकरणाः । व्याकरणमूलत्वात् सर्वविद्यानाम् । ते हि श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति । तथैवान्यैरपि

तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वदर्शिभिः वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेशो व्यञ्जकत्वसाम्यात् ध्वनिरित्युक्तम्। (ध्वन्यालोके प्रथमोद्योते)

न्यायपक्षे बद्धमिथ्याग्रहाः काव्यविदभिमानिनो न्यायभक्ताः प्रतीयमानार्थ-प्रतिपित्सया वाच्यार्थस्य हेतुत्वमुररीकृत्य व्यङ्ग्यव्यञ्जकभावस्थले अनुमाप्यानु-मापकभावसम्बन्धं गम्यगमकभावसम्बन्धं वा स्वीकृत्य व्यञ्जनायाः खण्डनं चिकीर्षन्ति । तथा चोक्तं महिमभट्टेन—

अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम् ।
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम् ।।

परं व्यञ्जनाखण्डनेच्छा तेषां धूलिधूसरितैव जाता । यतो हि अनुमानमस्ति प्रमाणमेकम् । भवन्ति च प्रमाणानि प्रमेयसम्बद्धान्येव तद्बोधजनकानि । वह्निना सह व्याप्तिसम्बन्धसम्बद्ध एव धूमोऽनुमापयति वह्निम् । भवति चासौ व्यभिचार-विरुद्धादि हेत्वाभासबहिर्भूतः । न च हेत्वाभासत्वमुपगच्छता हेतुना कर्त्तुंशक्यतेऽनु-मितिः । वन्ध्यासुतेन कृतं कार्यं दृष्टं केनाप्यद्यावधि ?

भ्रम धार्मिक विश्वस्तः सः श्वाद्यमारितस्तेन ।
गोदानदीकच्छकुञ्जवर्तिना दृप्तसिंहेन ।।

अत्र मा भ्रमेति प्रतीतिर्यथा जायते व्यञ्जनया तथा किं भवितुमर्हति "इदं गोदातीरं भीरुभ्रमणायोग्यम्, सिंहवत्वात्" इत्यहेतुकेनानुमानेन ? धार्मिकस्य भीरुत्वं, पुंश्चल्याः प्रामाण्यञ्च न च प्रमाणप्रतिपन्नम् । न च सिंहवत्वं भ्रमणवारणे क्षमम् । सत्यपि तस्मिन्नभीष्टसिद्धयर्थं भ्रमणस्य दृष्टचरत्वात् ।

स्यादपि कथञ्चित् अनुमानेन व्यङ्ग्यार्थबोधः, परं किमसौ सहृदयजनमनो ह्लादयितुमपि क्षमः ? मरुमरीचिकायामनुमितेन जलेनोपशाम्यति कस्यापि पिपासा ? बुभुक्षितो जनो हृद्यस्य खाद्यस्यानुमानं कृत्वा बुभुक्षां शमयितुं क्षमः किम् ? कर्कशमनुमानम् । यत्र व्याप्तिहेत्वाभासादीनामालोडनं नूनमेव प्रतीतिं स्थग-यति तत्र दूरे तिष्ठतु काव्यचमत्कार इति प्रतीयमानस्थले अनुमाप्यानुमापकभाव-सम्बन्धोऽशक्य एव ।

येयं व्यञ्जना व्यङ्ग्यबुभुत्सयाऽङ्गीकृता सा वर्णपदवाक्यप्रकरणचेष्टाभि-नयादिषु निर्भ्रान्तं चरन्ती वर्तते । अस्याः खण्डनं न्यायभक्तानां कृते हिमालय-शिखरारोहणायमानमेवास्ति । 'गंगायां घोषः' इत्यत्र शैत्यपावनत्वप्रतीतिर्यद्यनु-मानेन कर्त्तुमिष्यते तदा अत्र गंगा पदं तटबोधकं प्रवाहे घोषस्य बाधितत्वादितिरीत्या तटार्थोऽपि प्रतीयतां तेनैवानुमानेन । निराक्रियताञ्च लक्षणापि । किमपराद्धं व्यञ्जनया येन तदुपर्यनावश्यक आक्रोशः प्रकाश्यते । सा चेयं व्यञ्जना अभिधेव लक्षणेव च शब्दवृत्तिरपि वर्तते । स्यान्नाम नैकत्रास्या वर्तनं परं नैतावता अस्याः शब्दनिष्ठत्वमपाकर्त्तुंशक्यम् ।

"गतोऽस्तमर्कः" इति शब्दं संश्रुत्य तत्तद्वासनावासितान्तःकरणा यत्र विभिन्नं व्यङ्ग्यमवबुद्ध्य स्वस्वनियोगेषु व्यापृता भवन्ति। यस्य च व्यङ्ग्यस्याभिधेयतो भिन्नतासाधकानि बोद्धृस्वरूपसंख्यादीनि नैकानि कारणानि ख्यातिं गतानि सन्ति, तद्बोधिकां व्यञ्जनां निराकरिष्णुर्महिमभट्टो व्यक्तिविवेके व्यञ्जनावादिनः आह्वयांचक्रे। तत्रोक्तं तेन—

'यत् पुनरस्यानेकशक्तिसमाश्रयत्वात् व्यापारान्तरपरिकल्पनं तदर्थस्यैवोपपद्यते, न शब्दस्य, तस्यानेकशक्तिसमाश्रयत्वासिद्धेः। तथाहि एकाश्रया; शक्तयोऽन्योन्यानपेक्षप्रवृत्तयोऽप्राकृत पौर्वापर्यनियमा युगपदेव स्वकार्यकारिण्यो दृष्टाः। यथा—दाहकत्वप्रकाशत्वादयोऽग्नेः। न च शब्दाश्रयाः शक्तयस्तथा।

(व्यक्तिविवेकः प्रथमविमर्शः पृ. 113)

अस्यायमभिप्रायः— शब्दे एकाधिकाः शक्तयः स्थातुं न क्षमाः। तत्र तु केवलमेकैवशक्तिरिति शक्यं वक्तुम्। सा चाभिधैव। एकाश्रितानेकशक्तिषु परस्परं नैरपेक्ष्यं दृश्यते। यथा अग्नेर्दाहकता प्रकाशकता पाचकता च। लक्षणाव्यञ्जना च न शब्दनिष्ठाभिधानिरपेक्षा शक्तिः; किन्तु अभिधाश्रिता एवेति तयोः शब्द शक्तित्वमयुक्तम्।

अत्रोच्यते—शब्देऽभिधातिरिक्ताशक्तिर्नास्तीति रिक्तं वचः। शब्दे श्रूयमाणे संकेतितार्थबोधस्येव संकेतितार्थसम्बद्धार्थस्य प्रतीतेरपह्नवः कर्त्तुमशक्य इति तद् बुबोधविषया लक्षणास्वीकरणस्य वज्रलेपायितत्वात्। न च "लक्षणारोपिता क्रिये"ति मम्मटोक्त्या लक्षणायाः शब्दे आरोपितत्वेन मुख्यतया तस्या अर्थवृत्तित्वमेवेति वाच्यम्?

तात्स्थ्यात्, तद्धर्म्यात्, तत्साहचर्यात्, तत् सादृश्याच्च अशक्येऽपि शक्यतावच्छेदकारोपो भवति तदा तदवच्छिन्नस्य बोधः शब्दशक्तिलक्षणया जायते चेदत्र-कथमुत्पद्यते शिरोवेदना। अनारोपितशक्यतावच्छेदकस्थले अभिधा, आरोपितस्थले च पुनर्लक्षणेति विषयविभागस्य सुस्पष्टत्वम्। एवं मुख्यार्थबाधग्रहनिरपेक्षमुख्यार्थसम्बद्धासम्बद्धनियतार्थबोधजनिका व्यञ्जनाऽपि शब्दवृत्तिरेवेति नात्र कश्चनविसंवादः।

न चैकाश्रयाः शक्तयः परस्परं निरपेक्षा इति युक्तं वचः। अग्नेर्दाहकत्वाभावे प्रकाशकत्वस्य कथमपि साधयितुमशक्यत्वात्। दाहकत्वं मास्तु पाचकत्वञ्चास्तु अग्नाविति कथनस्य यत्नसहस्रेणापि साधयितुमशक्यत्वमेव। अतोऽग्नेः प्रकाशकत्वं पाचकत्वं वा यथा दाहकत्वाश्रितं तथा लक्षणा व्यञ्जना च अभिधाश्रिते स्याताञ्चेत् किमपराद्धं शब्दशास्त्रानुगामिता अलंकारशास्त्रस्य? व्यङ्ग्यव्यञ्जकयोः घटप्रदीपयोरिव सहावस्थानं नास्तीति व्यङ्ग्यव्यञ्जकभावोऽयुक्त एवेति कथनमप्यापातरमणीयं, यतो हि..नहि दीपेन घट इव पूर्वसिद्धं वस्तु व्यज्यतेऽत्र। अत्र तु

तत् क्षणमेवास्वादपदवीं नीयमानं चमत्कारैकप्राणं तत्त्वमभिव्यज्यते इति लौकिककारकज्ञापकहेतुभ्यां विलक्षणोऽयं व्यञ्जनाख्यो व्यापारो व्यङ्ग्यार्थज्ञापक इति घटप्रदीपदृष्टान्तस्यात्राकिञ्चित्करत्वमेव ।

अथापरमिदमुच्यते नैयायिकपक्षधरैः काव्यशास्त्रिभिः— "शब्दबुद्धिकर्मणां विरम्यव्यापाराभाव इति जागरूके सर्वमान्यसिद्धान्ते अभिधया जाते बोधे तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वेन विनष्टेशब्दे तद् द्वारा अपरार्थस्य बोधस्तदर्थञ्च व्यञ्जनास्वीकरणञ्च व्यर्थमेवेति । अत्र ब्रूमः— ये स्वीकुर्वन्ति शब्दानामनित्यत्वं ते नामालपन्तु यथेच्छं, किन्तु येषां नये तृतीयक्षणवृत्तिध्वंसप्रतियोगिध्वनिव्यङ्ग्यः स्फोट एव शब्दः स एव च शक्त्याश्रयस्तदा नित्यस्य तस्यापलपितुमशक्यतया तद्द्वारा व्यङ्ग्यार्थबोधस्तथा तदाश्रया व्यञ्जना च कथमपलप्येत ? व्यञ्जनाविरोधिनो न्यायशास्त्रानुरागिणो वदन्तीदमपियत् येनानुमानेन प्रतीयमानार्थप्रत्ययो भवति तस्य प्रमाणकोटिमाटीकमानता नावश्यिकी। हेत्वाभासात् यानुमितिः सापि स्वीकृतानुमितिरूपेण। अतोऽत्र हेत्वाभासस्य दोषोद्भावनं न सम्यगिति । किन्तु इदमपि तेषां वचोऽसाम्प्रतमेव । नहि हेत्वाभासस्यानुमितिकारणता क्वचिदपि दृष्टा श्रुता वा । स्यान्नाम कथञ्चिद् कस्यापि तोषायासावनुमितिः किन्तु न सा प्रमात्मिका अपि तु भ्रमात्मिकैव । न च भ्रमात्मकं ज्ञानमिष्टसाधनताप्रयोजकं सफलप्रवृत्तिप्रयोजकं वा । यद्येतादृशीमेवानुमितिं प्रकल्प्य रसादीन् काव्यात्मनः स्वदितुमिच्छन्ति न्यायपक्षे बद्धादरास्तदायं प्रयासो नातिरिच्यते जलताडनादिति शक्यते वक्तुम् । अनुभवपथगोचरीक्रियमाणस्य व्यञ्जनयाऽऽस्वादपदवीं नीयमानस्य व्यङ्ग्यस्यानुभूतौ यो भवत्यलौकिक चमत्कारप्राणसारः स कथमिवोपपद्यतां हेत्वाभासेन भ्रमात्मिकया प्रणाल्येति सम्यग् विमृश्य अलंकारशास्त्रिभिः शब्दशास्त्रीयः पन्था अनुसृत :

एतदतिरिक्तम्— अनेकार्थकशब्दस्थले एकत्रार्थधीनियन्त्रणाय संयोगविप्रयोगादीनां यथाऽङ्गीकारो वैयाकरणसम्प्रदाये तथैव न केवलं तदनुयायिभिः साहित्यिकैरेवाङ्गीकृतमपितु अनिच्छद्भिः सर्वैरपि स्वीकरणीयं भवति तत्तत्त्वमन्यथा अनेकार्थकशब्दस्य कः कोऽर्थो ग्राह्य इत्यनिर्णय एव स्यात् ।

चतुष्टयीशब्दानां प्रवृत्तिः, धातोरर्थः फलं व्यापारश्च, शाब्दबोधे फलस्य व्यापारस्य वा प्राधान्यमित्यादिविवेचनं दृष्ट्वा निश्चितमिदं शक्यते वक्तुं यद् अलंकारशास्त्रीयसमीक्षोपरि शब्दशास्त्रस्य पूर्णः प्रभावः । यद्यपि कुत्रापि दृश्यते परापतितः प्रभावो न्यायशास्त्रस्यापि परं न तेन जायते काचिद् भीतिर्यथा बिभ्यति शाब्दं प्रवेशं साहित्य क्षेत्रे दृष्ट्वा न्यायपक्षावलम्बिनः साहित्यालोचका इत्यलम् ।

काव्यत्वं संशीत्यविषयः

काव्यमिति पुरातनः शब्दः। परिभाषितञ्च काव्यत्वं बहुभिराचार्यैः। तत्र केचन शब्दनिष्ठं तदिति चेदपरे शब्दार्थोभयपर्याप्तं तदिति प्रतिपेदिरे। विसंवादः केवलं व्यासज्यवृत्तित्वे प्रत्येकं पर्याप्तत्वे वा न तु तस्य शब्दनिष्ठत्वं निराकृतं केनापि। उभयवृत्तित्वेऽपि तस्यान्यतरवृत्तित्वं सुतरामेव।

कवेः कर्म काव्यमिति व्युत्पत्तिस्तस्य। कविश्च शब्दमेव करोति न तु अर्थमपि। "अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः" इत्याकारकवाक्यविन्यासे स्वयं प्रभवः कवयो न तु हिमालयस्योत्तरदिश्यवस्थापने क्षमत्वं तेषाम्। अपरे तु–कविवृत्त्युच्चारणकर्मतायाः शब्द इव कविसमवेतरसबोधौपयिकसामग्रीसंघटनविषयकज्ञानकर्मताया अर्थे च सत्वादुभयोः काव्यत्वमव्याहृतम्।

इह पुरोऽनिलकम्पितविग्रहा, मिलति का न वनस्पतिना लता।
स्मरसि किं सखि ! कान्तरतोत्सवं, न हि घनागमरीतिरुदाहृता।।

इति पद्ये श्रुतिपथमुपगते तद्घटकपदनिष्ठशक्तिग्रहवतोऽतस्तदर्थविषयकबोधवतः सहृदयस्य यः खलु जायतेऽलौकिकश्चमत्कारस्तत्र शब्दार्थयोर्नान्तरीयकत्वमपाकर्त्तुमशक्यम्।

इदमिदानीमानीयते विचारपदवीं यत् काव्यत्वेनाभिमतः कः खलु शब्दः ? तत्रायं खलु संशयातीतोऽर्थो यत् रघुवंशमेघदूतादौ या लिपिरुट्टंकिता तामेव शब्दमभिप्रेत्य प्रचलतीयं धारणा लोके यच्छब्दः काव्यमिति। तथ्यमप्येतत्-व्यवहारजगति लिपेरेव साम्राज्यं सर्वत्रोज्जृम्भते। यच्च व्याकरणशास्त्रं शब्दसाधुत्वनिकषोपलं तदपि लिपिमाश्रित्यैव प्रचालयति स्वकीयं निखिलं व्यवहारम्। "इकः स्थाने यण् स्यादचि" इत्यर्थकम् "इको यणचि" इति सूत्रं लिपिमन्तरा कुत्र प्रवर्तेत ? कथं वा दीर्घवृद्धिगुणादिकार्याणि सम्पाद्येरन् लिपिमन्तरा। प्रकृतिप्रत्ययविधानं तत्प्रकृतिकं निखिलं विकारजातं लिप्यामेव सम्पाद्यते। पिपठिषुश्छात्रः प्रथमकक्षायां ककारोऽयं गकारोऽयमिति रीत्या लिपिमाध्यमेनैव क्रमशः निखिलं वाङ्मयं पठतीति विदन्त्येव बुधाः।

दूरं तिष्ठतु विश्ववाङ्मयम्। दृश्यतां केवलं भारतीयं संस्कृतवाङ्मयमेव। लक्षाधिकपुस्तकान्यत्र लिपिबद्धानि ज्ञानसाधनानि सहस्राब्दीभ्यो दिव्यालोकं

वितरन्ति । कश्चन जनो यदा किमपि पुस्तकं पठति तदासौ लिपिमेव पठति । पठनसमये तस्य कण्ठताल्वाद्यभिघातजन्यो यो हि ध्वनिः स वैखरीशब्दवाच्यः । इयं वैखरी तृतीयक्षणवृत्तिध्वंसप्रतियोगिनी । अतोऽनित्येयम् । अनित्यानाञ्च सहभावोऽसम्भवः । सहभावाभावे च पदानां वाक्यानाञ्चावस्थानं यत्नसहस्रेणाप्यशक्यम् । न च संस्कारवशादव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णवत्वं तदुत्तरवर्णे प्रकल्प्य पदप्रत्यक्षं वाक्यप्रत्यक्षं बोपपादनीयमिति वाच्यम् ? नष्टविद्यमानयोः पौर्वापर्यस्य वक्तुमशक्यत्वात् । अत्र हि एको विनष्टो द्वितीयश्चोत्पन्न इति स्पष्टमेव नष्टविद्यमानता ।

स्यान्नामैवं कथञ्चित् पदप्रत्यक्षोपपादनं किन्तु पदस्य सत्ता तु वक्तुमशक्यैव । यद्यविद्यमानेऽपि पदे शक्तयाश्रयत्वमभ्युपगम्यते तदा नष्टो घटो जलवानिति प्रयोगः कथमिव वार्यताम् । अतो वैखरी न कदापि शब्दरूपा, किन्तु मुखादुच्चारितायां वैखर्यां तद्रूपरुषितो य आन्तरः स्फोटात्मको मध्यमाया नादांशो व्यक्तः स एव शब्दः, स एव च शक्तयाश्रयः । तदुक्तं भाष्यकृता—येनोच्चारितेन सास्नालांगूलककुदखुरविषाणवतीनां सम्प्रत्ययो भवति स शब्दः । सम्प्रत्ययो बोधः । बोधश्च शक्तिज्ञानात् । शक्तयाश्रयञ्च पदम् । तच्चान्तरं स्फोटात्मकमेव नान्यदिति निर्बाधम् ।

इदमप्यत्र विज्ञेयम्— मध्यमा वाक् शब्दात्मिका न तु संविद्रूपा । हृदयदेशेऽभिव्यक्ता तत्तदर्थविशेष-तत्तच्छब्दविशेषोल्लेखिन्या बुद्धया विषयीकृता परश्रोत्रग्रहणायोग्या कर्णपिधाने सूक्ष्मतरवाय्वभिघातेन, उपांशुशब्दप्रयोगे च स्वयं श्रूयमाणा मध्यमा वागिति लक्षणलक्षितायाः संविदेकरूपत्वस्य कालत्रयेऽपि साधयितुमशक्यत्वात् ।

अयमत्र सारांशः- वैखरी मात्रात्मा न शब्दः । शब्दस्तु मध्यमाया नादांशः स्फोटरूपः । वैखर्यां शब्दप्रयोगो भाक्तः । तत्र हेतुः स्फोटात्मकस्य तस्य तद्द्वाराभिव्यञ्जनम् । लौकिकः शास्त्रीयश्च सर्वोऽपि व्यवहारो रेखागवयन्यायेन वैखर्यामेव । सा एव श्रुतिगोचरा । तामेव श्रुत्वा लिप्यात्मके स्वरूपविशेषे शब्दत्वव्यवहारोऽपि भाक्त एव । स्फोटव्यञ्जकवैखरीव्यञ्जकत्वेन लिपिषु शब्दत्वव्यवहारस्य सार्वजनीनत्वात् ।

एतेन— शब्दो वैखरीमात्रात्मा, मध्यमादयः संविदेकरूपा, वैखरीत्वेऽपि शब्दो न काव्यम्, तस्यानुवादेषु परिवर्तनात्, मूककविप्रबन्धेषु चादर्शनात्, इत्यादि सर्वं प्रत्युक्तमेव वेदितव्यम् । अनुवादेषु परिवर्तनात् वैखरी न काव्यमिति तु सर्वथा रिक्तं वचः । कल्प्यताम्— 'अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः' इति काव्ये पठिते सति एतादृशवैखरीरूपरूषितेन स्फोटेन यथा भवति सम्प्रत्ययोऽर्थस्य तथैव इमं ध्वनिं परिवर्त्याङ्ग्लभाषायां भाषान्तरे वानुवादेन आंग्ल-

भाषाबद्धवैखरीध्वनिरूपरूषितः स्फोटोऽभिव्यक्तो गृहीततन्निष्ठशक्तिकस्य प्रत्याययति चेदर्थं कोऽत्र विसंवादः काव्यत्वस्वीकारे इति न प्रत्येमि।

आनन्दकोषोल्लासकस्यार्थसंघातस्य जायतां नाम काव्यत्वं परं नैतावता शब्दस्य काव्यत्वं व्यपाकर्त्तुंशक्यम् ।

शब्दमन्तराऽर्थोपस्थापनमपि कथमिति समाहितिः दुःखा च दुरुपपादा च। केरलवास्तव्यस्यादृष्टहिमालयस्य तद्विषयकः काव्यजास्वादः कथमिवोपपाद्यताम् । अस्त्युत्तरस्यामित्यादि शब्दे श्रुतिपथमुपगते यादृशं चित्रं भवति पाठकस्यान्तस्तले, तेन च यो जायते तस्यालौकिकश्चमत्कारस्तत्र बीजं शब्दमेव पश्यामः । तत्र हिमालयस्य बौद्धः प्रत्ययोऽपि शब्दायत्त एव । तदुक्तम्—

शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान् ।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ॥

यदप्युच्यते— अर्थस्यास्य ज्ञानं शब्दस्य ज्ञानादुपजायये, ततः शब्दज्ञानार्थज्ञानयोरेवान्योन्यं संकेतः, न तु शब्दस्यार्थेनार्थस्य वा शब्देनेति शक्तीनां शब्दगतत्वं भाक्तमेव पितामहगतं पौत्रजनकत्वमिव । अत्रोच्यते— घटस्य ज्ञानमित्यभिहिते सति यथा ज्ञाननिष्ठविषयितानिरूपितविषयता घटे भासते, तथैव शब्दस्य ज्ञानमिति वाक्ये ज्ञानविषयीभूतः शब्द एव । तादृशच्छब्दाज्जायतेऽर्थसम्प्रत्यय । यदि शब्दो ज्ञानविषयीभूतो न भवेत् तदा कथं जायेत ततोऽर्थबोधः । तस्माच्छब्दस्य श्रावणप्रत्यक्षात्मकज्ञानात् शब्दबोधस्ततः शब्दनिष्ठशक्तिज्ञानादर्थसम्प्रत्यय इत्येव विदुषां पन्थाः । न हि कदापि कस्यापि जायतेऽश्रुतादगृहीतशक्तिकाच्च शब्दादर्थबोधः । यस्य पुरुषस्य भवति संकेतग्रहोऽयं शब्दोऽस्मिन्नर्थे शक्तइति तस्यैव भवति तदर्थविषयकोपस्थितिस्ततः शाब्दबोधश्चेति शक्तीनां शब्दगतत्वे सुतरां सिद्धे तस्य भाक्तत्वकथनं निराधारमेव । तस्मादभिधादिवृत्तीनां शब्दगतत्वं सुस्थिरमेव मन्तव्यम् । अत एव शक्त्याश्रयत्वात् शक्तं पदमिति प्रवादोऽपि संगच्छते । अत एव पितामहदृष्टान्तोऽप्यत्रापार्थतामेव भजते ।

एवमुपर्युक्तप्रक्रियया यथा साधित शब्दादर्थप्रत्ययस्तथैव शब्दार्थयोरेवान्योन्यं संकेतो न तु तद्ज्ञानयोरिति मन्तव्यम् । कथमेवं चेदवधार्यतां किमपि— पदं श्रावयित्वा वक्ति वाचकः— "पदं श्रुतमथार्थं शृणु"। अत्र विचार्यतां मनाक् किमसौ घटपटादीनर्थान् श्रावयति ? किं घटपटादयोऽर्थाः श्रावणप्रत्यक्षविषया उत् चाक्षुषप्रत्यक्षविषयाः ? किन्तु वाचकप्रयुक्तशब्देनेदमेवावधार्यते यत् असौ अर्थे शब्दधर्मत्वमारोप्य कृतवांस्तथा प्रयोगम् । एवं "रामेति द्वयक्षरं नाम मानभङ्गः पिनाकिनः" इत्युक्त्या शब्दार्थयोरेवान्योन्यं संकेतः, संकेत एव तादात्म्यम्, तच्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्; अभेदस्याध्यस्तत्वाच्च न भवति मुखदाहाद्यापत्तिरग्निशब्दोच्चारणे । एतेन शब्दज्ञानार्थज्ञानयोरेव तादात्म्यं, शब्दार्थयोस्तादा-

त्स्याङ्गीकारेऽग्निशब्दोच्चारणे मुखदाहापत्तिः, गुड इत्युच्चारिते मुखमाधुर्यापत्तिरित्यादयः सर्वे विप्रलापाः समूलोन्मूलिताः।

पूर्णतामीयुषः काव्यस्य कश्चन अलंभावाभिधो धर्मोऽलङ्कारः। अयमेव काव्यस्यात्मेति केचित्। तत्र जिज्ञास्यते— कोऽयं परात्परो धर्मोऽलंभावात्मा नामकः? यद्यलम्भावत्वं पर्याप्तिसम्बधेन वृत्तित्वमित्युच्यते तदा आपादमस्तकं पर्याप्त्याऽलंकारभूषितं मृतशरीरमपि सात्मकमिति कथं न व्यवहरणीयं स्यात्। यदि कश्चनालौकिक एवालंकारस्तादृशस्तदा काव्यात्मविषये नाममात्रे विवादः। रसस्य प्रतीतिमात्रस्वरूपस्य सहृदयसामाजिकनिष्ठस्य काव्येऽवर्तनात् तस्यात्मत्वं विखण्ड्यते चेन्मनस्तोष एव क्रियतां केवलम्, परं सामाजिकैरनुभूयमानस्य तादृशविलक्षणास्वादनादनतिरिक्तस्य रसस्योपस्थापकमभिव्यञ्जकञ्च किमित्यपि विचारितं कदापि? नो चेदिदमिह सम्प्रधार्यतां यत् दृश्यं श्रव्यं वा काव्यमेव दर्शनपठनद्वारा तदुपस्थापकमिति अभिव्यञ्जकतासम्बन्धेन काव्ये वर्तनात् तस्य काव्यात्मत्वं कथं निराकर्त्तुं शक्यते? अत एव श्रूयते—

> दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात्।
> सर्वे नवा इवाभान्ति मधुमासद्रुमा इव॥

तस्माद् रसस्य काव्यात्मत्वमन्यथयितुमशक्यमेव।

अयञ्चाप्येकः पक्षः— शब्दे शक्तिरस्ति न वेति। परं शब्दे शक्तिर्नास्तीति कथनं मम मुखे जिह्वा नास्तीति कथनान्नातिरिच्यते। विश्वस्यास्य निबन्धिनी शक्तिः शब्देष्वेवाश्रिता। प्रत्यहं शब्दमूल एव जागतिको व्यवहारः। मृदुशब्दश्रवणे प्रसन्नतां, कटुशब्दश्रवणे गालीश्रवणे वा दण्डोद्यतकरतां च प्रेक्ष्य शब्दशक्तेर्निराकरणं कथमिव क्रियते इति न वेद्मि। मन्त्रादिशक्तयः सर्वविदिताः साम्प्रतमपि दृष्टफलाः कथमपाकर्त्तुं शक्यन्ते?

यच्चापि कथ्यते— सूर्यस्य प्रकाशवत् यदि शब्दस्य देहे शक्तिः स्यात् तदा विश्वस्य भाषापि सूर्य इव एकैव भवेत्। परमिदमपि कथनमविचारितमेव। नहि सूर्य इव विश्वस्मिन् जगति एका भाषा वर्तते। असंख्यभाषाभिः क्रियन्ते व्यवहाराः संसारेऽत्र। स च व्यवहारस्तत्तद्भाषाशब्दैरेवेति संशयातीतोऽर्थः। शक्तिमन्तरा अर्थाप्रत्ययः, अर्थाप्रत्यये च व्यवहाराभावः। तस्मात् सर्वभाषाशब्देषु शक्तिरस्तीति सुतरामेव सिद्धमनुभवगोचरीक्रियमाणञ्च तथ्यम्। नेदं विस्मर्तव्यं यत् सूर्यस्यैकत्वेऽनेकत्वे वा अकिञ्चित्करो मानवः' किन्तु भाषाप्रयोगे स्वाधीनः। अत एव विश्वस्मिन् संसारे बहुविधा भाषाः श्रूयन्ते। तस्माच्छब्दशक्तिखण्डनव्यामोह आहो पुरुषिकामात्रमेवेत्यलम्।

संस्कृत-साहित्ये ध्वनि-स्वरूप-निरूपणम्

अथेदं विविच्यते कोऽयं ध्वनिः, कदा कुतो वाऽस्य प्रादुर्भावः ? ललित सन्निवेश-चारुणि काव्ये च कीदृग् अस्य स्थानम् ? इत्येवं मीमांसायां सर्व-प्रथमं व्याकरण-शास्त्रे एव ध्वनि-शब्दो दृष्टि-पथम् अवतरति। 'स ध्वनिर् इति सूरिभिः कथितः', इति स्वकीयोक्त्या ध्वनिकारस्याऽपीदं सम्मतम्। तथा च पस्पशाह्निके शब्द-स्वरूप-निरूपण-प्रस्तावे महाभाष्यकारः— 'प्रतीत-पदार्थको लोके ध्वनिः शब्दः'। तद्यथा— शब्दं कुरु। मा शब्दं कार्षीः, शब्द-कार्य् अयं माणवकः इति ध्वनिं कुर्वन् एवम् उच्यते, तस्माद् ध्वनिः शब्दः'। अस्याऽयं भावः, गौर् इत्य् उच्चार्यमाणे यावद् गकारे वाग् वर्तते न तावद् औकारे इति भाष्योक्त्या वर्णानाम् आशुविनाशितया तेषां सम्मेलनाऽभावात् पदस्य वाक्यस्य वा गगनकुसुमायमानत्वेन कथं स्याद् अर्थधीर् इति संशयम् आपन्नैः शाब्दिकैः पूर्ववर्णाऽनुभव-जनित-संस्कार-सहिताऽन्तिम-वर्णाऽभिव्यंग्यः स्फोट एव वाचकत्वेनोररीकृतः। स्फुटति प्रकाशते अर्थोऽस्माद् इति च तदीय-व्युत्पत्तिः। स च व्यंग्यात्मकः शब्दो नित्यो ब्रह्म-स्वरूपः सकल-प्रमेय-प्रत्यायन-क्षमः। तस्यैव व्यंजकः शब्दो ध्वनिः। ध्वनति व्यनक्ति स्फोटम् इति ध्वनिः। तदुक्तं हरिणा—

नादैर् आहितबीजायाम् अन्त्येन ध्वनिना सह।
आवृत्त-परिपाकायां बुद्धौ शब्दोऽवधार्यते॥
ध्वनि-प्रकाशिते शब्दे स्वरूपम् अवधार्यते॥ इत्यादिः।

स च ध्वनिः प्राकृत-वैकृत-भेदेन द्विविधः। तत्र प्राकृत-ध्वनिरूप-रूषितः स्फोटोऽभिव्यज्यते। वैकृत-ध्वनिस् तु केवलं द्रुत-मध्य-विलम्बिताऽऽदि-वृत्तिभेदाऽऽपादक एवाऽस्ति। अत एव तम् एवाऽयं श्लोकं द्रुतं पठति, अयञ् च विलम्बेनेति च लोक-व्यवहारः। तद् उक्तम्—

स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिर् इष्यते।
वृत्ति-भेदे निमित्तत्वं वैकृतः प्रतिपद्यते॥

एवञ् च स्फोटरूपाऽन्तरशब्दाऽभिव्यञ्जकवैखरी वाग् एव ध्वनिर् इति वैयाकरण-समयः। वैयाकरण-मतानुसारिभिर् आलंकारिकैर् अपि येनाऽर्थेन वाच्योऽर्थोऽधः क्रियते तादृशस्य व्यंग्यस्य ध्वनने समर्थस्य शब्दार्थ-युगलस्य ध्वनिर् इति व्यवहारः कृतः। उक्तं ध्वनिकृता—

यत्रार्थः शब्दो वा तम् अर्थम् उपसर्जनीकृतस्वार्थौ।
व्यंक्तः काव्यविशेषः स ध्वनिर् इति सूरिभिः कथितः॥

यत्राऽर्थो वाच्य-विशेषोऽर्थो वाचक-विशेषः शब्दो वा तम् अर्थं व्यंक्तः स काव्य-विशेषो ध्वनिः। अत्र तम् अर्थम् इति पदेन कोऽपि विलक्षणः सहृदयमात्रैकवेद्यो लावण्यवत्यां निखिलाऽवयवाऽतिशायिलावण्यम् इवाऽनिर्वचनीयोऽर्थोऽभिप्रेतः। तथ्यम् अप्य् एतत्— महीयांसः कवयो हि स्वकीयाऽप्रतिमप्रतिभा महिम्ना निखिल-लोक-लोचन-पथान्तराल-निहितम् अनाघ्रातं पुष्पम् इवाऽतिकमनीयं सर्वथाऽभिनवं सहृदय-मात्रैकवेद्यं तत्त्वं सविमर्शम् आकृष्य पुरस्ताल् लोकस्याऽऽनयन्ति। उक्तं ध्वन्यालोके—

प्रतीयमानं पुनरन्यद् एव वस्त्व् अस्ति वाणीषु महाकवीनाम्।
यत् तत् प्रसिद्धाऽवयवाऽतिरिक्तं विभाति लावण्यम् इवाऽङ्गनासु॥

प्रतीयमानार्थ एव काव्यस्य जीवनाऽऽधायकः। आत्मानम् अन्तरा शरीरम् इव काव्यं तं विनाऽभव्यम् असुन्दरम् उपेक्षणीयम् एव भवति। वैयाकरणा ध्वनिं प्रत्यपीपदन् इति कथनं तथ्यम् अपि नालम्बते मनोग्राहिताम्। स्फोटव्यञ्जक-क्षणिक-वर्णेषु ध्वनिपदं प्रयुंजानास् ते यद्यपि सन्ति पथ-प्रदर्शका ध्वनिमार्गस्य, तथाऽपि सुदीर्घकालात् संशय-पदवीम् आरूढस्याऽनभिव्यक्त-स्वरूपस्य ध्वनेः प्रतिष्ठापन-श्रेयस् तु आनन्दवर्धनाऽऽचार्यस्यैवाऽस्ति। आनन्दात् पूर्वम् अलंकारशास्त्रिणां मध्ये काव्या-ऽऽत्मतत्त्वम् आदायाऽऽसीत् सुमहान् मतभेदः।

भामह-उद्भट्-रुद्रट-प्रभृतयः प्राचीनाऽऽचार्याः काव्यात्मत्वेनाऽलंकारम् एव स्वीचक्रुः। काव्येऽलंकारस्य प्राधान्यं प्रत्यक्षाऽप्रत्यक्षरूपेण आचार्य-दण्डिनाऽपि स्वीकृतम्। एतत्-सम्प्रदायानुसारेणाऽलंकार एव काव्यस्य जीवनाऽऽधायकं तत्त्वम् आसीद्। यद्यप्य् एभिर् आचार्यैर् अलंकारः काव्यस्याऽऽत्मेति स्पष्टं न कुत्राप्य् उल्लिखितं तथाऽपि सर्वतोभावेन प्राधान्यम् अलंकारस्यैव प्रत्यपादि। तन्-मार्गाऽनु-यायिभिर् अन्यैर् अपि कैश्चिद् अलंकारस्यैव प्राधान्यम् अङ्गीकृतम्। उक्तं हि पीयूष-वर्षजयदेवेनाऽपि—

अंगीकरोति यः काव्यं शब्दार्थाव् अनलंकृती।
असौ न मन्यते कस्माद् अनुष्णम् अनलं कृती॥

एभिर् आलंकारिकै रसतत्त्वं न पर्यज्ञायि इति न, भरत-नाट्यशास्त्रे तस्य वर्णनात्। तस्य च तेषाम् अपि प्राक्तनत्वात्। अतो रसतत्त्वम् अलंकारान्तर्भूतम् एवेति एषां तात्पर्यम् आसीत् येन च रसवदाद्य्-अलंकाराणां प्रादुर्भूतिस् तदानीम् एव जाता। तथा च प्रतीयमानम् अर्थम् अवलम्ब्य समासोक्त्य्-अप्रस्तुतप्रशंसाऽऽदयोऽलं-कारा अपि अस्मिन्न् एव काले समुद्भाविताः।

एतद् अनन्तरम् आचार्य-वामनस्य समये विशिष्टा पदरचना रीतिर् इति लक्षण-लक्षिता रीतिः काव्यस्य आत्मत्वेन प्रसिद्धिं गता। रचनायां वैशिष्ट्यञ् च गुणप्रयोज्यम् इति रीति-सम्प्रदायो गुण-सम्प्रदायेनाऽपि उच्यते। रीतेः काव्यात्म-

वादी वामनः रसतत्त्वं ध्वनि-तत्त्वं वा सम्यङ् निभालयन् अपि दीप्तरसत्वं कान्तिर् इति परिभाषिते कान्ति-नामके गुणेऽन्तर्भाव्य तत् काव्यस्याऽन्तरंग-तत्त्वं स्वीचकार । प्राचीन-मते काव्य-जगति ध्वनेः स्थानं बहिरंगं, वामन-मते तु अन्तरंगम् इति प्राचीनेभ्यो वामनस्य वैशिष्टयम् अस्ति । अस्य मते विविधवैचित्र्योपेतैः पदैः जायमानायां रचनायाम् एव चमत्कारो भवितुम् अर्हति नाऽन्यथेति मन्तव्यम् ।

एवं संशय-दोलायां दोदुल्यमाने काव्यात्म-तत्त्वे आचार्य आनन्दवर्धनो ध्वनिविषयकान् अखिलान् पूर्वपक्षान् अकाट्यतर्क-प्रतर्कैर् विदलय्य कतिपयभेदप्रभेदैः प्रविभज्योदाहरण-प्रत्युदाहरण-मुखेनोपबृंहित-कलेवरं ध्वनिं काव्यात्मत्वेन प्रतिष्ठापयांबभूव । एतत् प्रदर्शितध्वनिस्वरूपं दर्शं दर्शम् अद्यापि चमत्कृत इव जायते मनीषिवर्गः । अदसीयं ध्वनिक्षेत्रम् अतीव विस्तृतम् । तथा हि—

1. ध्वनति यः स शब्दोऽर्थश् च ध्वनिः ।
2. ध्वन्यते इति ध्वनिः व्यंग्यरसादयः ।
3. ध्वन्यते अनेन इति ध्वनिः व्यंजनाव्यापारः ।
4. ध्वन्यतेऽस्मिन्न् इति ध्वनिः काव्यम् ।

ध्वनिकृता संस्थापिते ध्वनौ यद्यपि सर्वैर् अभिनन्दितोऽविरलप्रवाहश् च जातो ध्वनिः परन्तु स्थापनाकाले त्व् अत्र आसीन् महान् विरोधः । ध्वनिकारेण तत्र त्रयाणां विरोधिनां कल्पना कृता । तत्र केचनाऽभाववादिनः केचन भक्तिवादिनोऽपरे चाऽनिर्वचनीयत्व-वादिनः । तत्राऽभाववादिष्व अपि त्रयो विकल्पा आसन् ।

तत्र केचन शब्दार्थ-शरीरं तावत् काव्यम् । तत्र स्वयं शब्दार्थौ तु काव्यात्मत्वं नार्हतः शरीरत्वात् । यदि च शब्दार्थ-शोभादायको ध्वनिर् इत्य् उच्यते तर्हि शब्दार्थ-गुणाऽलंकाराणाम् एव शब्दार्थ-शोभा-कारितया तद्अतिरिक्तस्य काव्यशोभाहेतोर् अभावेन नास्त्य् एव ध्वनिः । यदि नामाऽयं ध्वनिर् अभविष्यत् तदाऽवश्यं बुधैर् अलंकारादिवत् पर्यचेष्यत । अतो नास्त्य् एव ध्वनिर् इति जगदुः । अन्ये पुनः प्राचीन-प्रदर्शित-सहृदय-हृदयाह्लादिशब्दार्थमयत्वरूपस्य काव्यलक्षणस्य ध्वनाव् अनुपलम्भेन कपोलकल्पित एव ध्वनिर् इति प्रोचुः । इतरे च— काव्य-चारुत्वहेतुष्व् अलंकारादिष्व् एवाऽन्तर्भाव्य ध्वनिम् अनतिरिक्तम् आहुः । अपरे च लक्षणीय एव व्यंग्यार्थ इति मन्वाना भक्तिर् ध्वनिर् इति प्रतिपेदिरे । पुनर् अन्ये गिराम् अगोचरं ध्वनेस् तत्त्वम् इति प्रतिपादयांबभूवुः । एते सर्वे विपक्षि-पक्षाः स्वयम् एवोद्भाविताः समाहिताश् च ध्वनिकृता यद् 'भ्रम धार्मिक विश्रब्धः, कस्य वा न, रोषो भवति' इत्यादिषु बहुषु स्थलेषु बोद्धृ-स्वरूप-संख्याऽऽदीनाम् वैभिन्न्याद् वाच्याद् भिन्नस्वरूपो ध्वनिः कथंकारं वाच्य-वाचक-चारुत्व-हेतुषूपमादिष्व्

अन्तर्भावयितुम् अर्हः । न हि सुनिपुणोऽपि कुलालो यत्नसहस्रेणापि घटं पटयितुम् ईष्टे । तथैव वाच्यार्थ-विमुखाऽऽत्मनां सचेतसां तत्त्वदर्शिन्यां बुद्धाव् एव अवभासमानो ध्वनिः कथं वाच्य-परिपोषकोपमाद्यलंकारायमाणो भवेत् । कामं प्राचीनैर् अस्य नाम-करणं न विहितं परं एतेनैवाऽस्य ध्वनेर् अभाव इति कथनं तु असाम्प्रतम् । न हि स स्थाणोर् दोषो यद् अन्धस् तं न पश्यति । लक्ष्य-स्थले पुनः परीक्ष्यमाणे तु रामायण-महाभारताऽऽदौ ध्वनिर् एव प्रतिपदम् अनुभूयते सहृदयैः ।

अयञ् च व्यंग्याऽऽत्मको ध्वनिर् वाच्य-लक्ष्य-तात्पर्याऽऽदि-निखिलान् अर्थान् अतिशय्य वर्तत इति वाच्य-परिपोषक-व्यंग्य-स्थलेषु समासोक्ति-दीपकाऽपह्नुति-संकराद्य-अलंकारेषु कथम् अपि भवितुं नाऽर्हति अस्याऽन्तर्भावस् तत् तत्-स्थले व्यंग्यस्य क्वचिद् वाच्योपकारकत्वात् क्वचित् च तत्-तुल्यत्वात्, व्यंग्यस्य तु वाच्याऽतिशायितायाः सर्वैर् अभिप्रेतत्वात् यथोक्तम्—'वाच्यातिशायिनि व्यंग्ये ध्वनिस् तत् काव्यम् उत्तमम्' इति ।

एवम् एव ध्वनेर् लक्षणीयत्व-कथनम् अपास्तम्, मुख्यार्थ-बाध-ग्रहपूर्विकाया मुख्यार्थ-सम्बन्ध-नियताया लक्षणाया मुख्यार्थ-बाध-ग्रह-निरपेक्ष-शक्यार्थ-सम्बन्ध-नियताऽनियत-विभिन्न-व्यंग्याऽर्थ-बुभुत्सया स्वीक्रियमाणया व्यंजनया सह महतो विभेदस्य स्पष्टं प्रतीयमानत्वात् । वस्तुतो वाच्य-व्यतिरिक्तस्याऽर्थस्य वाच्य-वाचकाभ्यां तात्पर्येण प्रकाशनं यत्र व्यंग्य-प्राधान्ये स ध्वनिः । लक्षणा तु लक्ष्यताऽवच्छेदकाऽवच्छिन्ने शक्यताऽवच्छेदकाऽऽरोप-रूपेति वैभिन्न्यस्य स्पष्टतया तयोर् ऐक्याऽपादनं सर्वथैवाऽयुक्तम् । 'भक्त्या बिभर्ति नैकत्वं रूपभेदाद् अयं ध्वनिः' इत्येवं प्रकारेण निपुणं प्रत्याख्यातो ध्वनेर् भक्तिरूप-पक्षो ध्वनिकृता ।

ध्वनिकारानन्तरं ध्वनिवादस्य प्रबलतम-विरोधिनौ कुन्तक-महिमभट्टनामानाव् अभूताम् । कुन्तकस् तु ध्वनिं वक्रोक्ताव् अन्तर्भावयन् वक्रोक्तिजीवित-नामकं ग्रन्थं प्रणिनाय । महिमभट्टस् तु ध्वनिर् अनुमेय इति आकलय्याऽनुमान-प्रमाणेनैवोपपत्त्या व्यंजनां प्रत्याचख्यौ । अनन्तरम् आचार्यमम्मटः खण्डयन् उपर्युक्तं विपक्ष-पक्षं ध्वनेर् अकाट्यत्वं साधयंश् च स्वकीये काव्यप्रकाशे व्यंजनां पूर्णरूपेण प्रातिष्ठिपत् । वस्तुतो ध्वनेर् विशालं भवनं तु व्यंजनाम् अवलम्ब्यैव स्थितम् इति ध्वनि-स्थापनं व्यंजना-स्थापन एव विश्राम्यति ।

स चाऽयं ध्वनिर् लक्षणा-मूलोऽभिधामूलश् चेति प्रथमं द्विविधः । अविवक्षितवाच्यो विवक्षिताऽन्यपरवाच्यश् चेत्य् अनयोर् नामान्तरम् । तत्र लक्षणाया जहत्स्वार्थाऽजहत्स्वार्थत्व-भेदेन तन्-मूलो ध्वनिर् अपि अर्थान्तरसंक्रमिताऽत्यन्ततिरस्कृतवाच्य-भेदेन द्वैविध्यं कलयति । अभिधामूलो ध्वनिर् अपि पूर्वं संलक्ष्याऽसंलक्ष्यक्रम-भेदेन द्वैविध्यं प्राप्य संलक्ष्यक्रमस्य शब्दाऽर्थोभयशक्त्युत्थतया पंचदश

भेदान् बिभर्ति । एवं सर्वेषां सम्मेलनेन मुख्यतयाऽष्टादश भेदा ध्वनेः सम्पन्नाः । अवान्तर-भेदानाम् अतिभूयसी संख्या गणयितुम् अप्य् अशक्या । उक्तं हि ध्वनिकृता—

रस-भावाऽऽदि सम्बद्धा यद्य् औचित्याऽनुसारिणी ।
अन्वीयते वस्तुगतिर् देशकालादि-भेदिनी ॥
वाचस्पति-सहस्राणां सहस्रैर् अपि यत्नतः ।
निबद्धाऽपि क्षयं नैति प्रकृतिर् जगताम् इव ॥

एषु च उपर्युक्ताऽष्टादशसु भेदेषु वस्त्व्-अलंकार-रसरूप-त्रिविधो ध्वनिर् व्यंग्यो भवति । तत्र वस्त्व्-अलंकारौ तु वाच्य-सहिष्णू व्यंग्यौ । तौ व्यंग्य-भावं भजन्ताव् अपि कदाचिद् वाच्यताम् अपि कलयतः । किन्तु रसरूपो ध्वनिस् तु कथम् अपि वाच्यतां न सहते । वाच्यता च तस्य स्वशब्द-निवेदितत्वेन, विभावाऽऽदिप्रतिपादन-मुखेन वा स्यात् । परन् च परमानन्दस्वरूपस्य विगलितवेद्यान्तर-सम्पर्कशून्यस्य चर्वणामात्रविश्रान्तिधाम्नस् तस्य सर्वथैव विलक्षणतया वाच्यत्वं कालत्रयेऽप्य् अशक्यम् । तत्र व्यंग्य-स्थलेऽपि रसस्य विधाद्वयी वर्तते, प्रधानत्वेनाऽप्रधानत्वेन च । यदाप्रधानत्वेन रसव्यंजनं तदा तु रसवदादयोऽलंकारा भवन्ति । प्राधान्येन व्यज्यमाने रसादौ हि ध्वनि-काव्यम् उच्यते व्यंग्यश् च तत्र रसादिर् भवति । वस्तुतोऽलंकारादयोऽपि वाच्यमुखेन न तादृशीं शोभां बिभ्रति यादृशीं व्यंग्य-भावेन दधति । उक्तं हि—

शरीरीकरणं येषां वाच्यत्वे न व्यवस्थितम् ।
तेऽलंकाराः परां छायां यान्ति ध्वन्यंगतां गताः ॥

एवं प्रकारेण प्रतिष्ठापिते ध्वनिसिद्धान्ते निरतिशयपरप्रेमाऽऽस्पदीभूतं व्यंग्य-तत्त्वम् आधारीकृत्यातीवोपादेयं श्लाघनीयञ् च जातं काव्य-जगत् । अवस्था-देशकालादीनां वैचित्र्यान् नैकविधत्वम् उपेयुषि व्यंग्यार्थे च तदाऽऽधारीकृत्य निर्मित काव्यं काम् अपि परां शोभां पुष्णाति । स च व्यंग्याऽऽत्मकोऽर्थः 'प्र' 'च' इत्यादिनाऽभिव्यज्यते तथैव-प्रकृति-प्रत्यय-वाक्य-काव्य-महाकाव्यादिभिर् अपीति किम् अपि काव्यस्थलं नाऽवशिष्टं यद् ध्वनिना न संस्पृष्टं भवेत् । इत्थं खलु महती व्यापकता ध्वनेर् अस्ति या प्रत्येकं सहृदयैः सर्वत्राऽनुभूयते । अस्मिन् ध्वनि-क्षेत्रे न केवलं पूर्वतः प्रचलितानां रस-गुण-दोषाऽलंकार-विषयक-सिद्धान्तानाम् एवाऽन्तर्भावः सम्पन्नोऽपि तु पश्चाद्-भाविनोऽप्य् औचित्यादयः सम्प्रदाया नाऽतिक्रमन्ते सीमानं ध्वनेः । उक्तम् एवैतत्—

अनौचित्याद् ऋते नान्यद् रसभंगस्य कारणम् ।
औचित्योपनिबन्धस् तु रसस्योपनिषत् परा ॥

एतेन औचित्यस्य रसपरिपोषकत्वं स्पष्टम् एव व्यक्तं भवति। रसपदेनाऽत्र जगति न केवलं शृङ्गार-हास-करुणादय एव रसा गृह्यन्तेऽपितु रस्यते आस्वाद्यते योऽसौ रस इति व्युत्पत्त्या रस-रसाभास-भाव-भावाभासादयोऽपि गृह्यन्ते। त्रिषु व्यंग्येषु मध्ये रसरूपो व्यंग्यः सर्वान् व्यङ्ग्यान् अतिशेते। स एव मुख्यः काव्यस्याऽऽत्मा। यद्यपि ध्वनिकृता काव्यस्याऽऽत्मा ध्वनिर् इति व्याहृत्य वस्त्व्-अलंकार-रसरूपस्य त्रिविधस्याऽपि ध्वनेः काव्याऽऽत्मत्वं दर्शितम्। परन्तु—

काव्यस्याऽऽत्मा स एवाऽर्थस् तथा चादिकवेः पुरा।
क्रौंच-द्वन्द्व-वियोगोत्थः शोकः श्लोकत्वम् आगतः॥

अनया कारिकया रसस्यैव काव्याऽऽत्मत्वं प्रत्यपादि। शोको हि करुणरसस्य स्थायिभावः। स वृक्षस्य फलरूपेण परिणाम इव स्वयम् एव रसरूपे परिणतः। अतो रस एव काव्यस्याऽऽत्मा इति ध्वनिकारस्य मतम्। अयम् एव सिद्धान्तः काव्यप्रकाशकारस्य विश्वनाथस्य च सम्मतः। अत एव विश्वनाथः स्वकीय-दर्पणे 'वाक्यं रसात्मकं काव्यम्' इति लक्षणं चकार। पण्डितराजजगन्नाथस् तु 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति लक्षणं कुर्वन् वस्त्व्-अलंकार-रसरूपेषु त्रिविधेष्व् अपि ध्वनिषु यः कोऽपि लोकोत्तराह्लाद-जनक-ज्ञान-गोचरी भवेत् स एव काव्यात्मेति त्रिविधस्याऽपि ध्वनेः काव्याऽऽत्मत्वं स्वीचकार। एवञ् च बहोः कालाद् विवादास्पदीभूता काव्याऽऽत्म-विचारपरम्परा ध्वनितत्त्वम् आसाद्याऽधुना विश्रान्तिम् उपगता। अतः ध्वनि-सिद्धान्तः सम्पादयिता, काव्यात्मनः, प्रविभाजयिता काव्यांगतत्वानां, प्रेरयिता, आलोचन-विचार-परम्पराणाम् अधुना संस्कृतसाहित्ये मूर्धन्यायमानो वर्तत इति नाऽत्र कस्यचिद् विमतिः।

लक्षणावादः

काव्ये चमत्काराधायकतया लाक्षणिकशब्दानां स्वकीयं विशिष्टं महत्त्वमस्ति। 'अयमैन्द्री मुखं पश्य रक्तश्चुम्बति चन्द्रमाः'। कचतस्त्रस्यति वदनमित्यादौ वा लाक्षणिकाः शब्दाः कस्य वा न भवन्ति विच्छित्तिविशेषजनकाः। साहित्यशास्त्रे लाक्षणिकशब्दप्रयोगः एकः पुरातनः पन्थाः वर्तते। तत्र का नाम लक्षणेतिजिज्ञासायां मम्मट :—

मुख्यार्थबाधे तद्योगे रूढ़ितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया॥

अयं भावः— किमपि विशिष्टं तत्त्वमुद्दिश्य यत्र वक्ता कमपि शब्दं प्रयुनक्ति तत्र प्रथमन्तावत् शब्दस्य मुख्यार्थः प्रतीयते। परन्तु तस्य वाक्यघटकपदार्थान्तरेणान्वयो यदा न भवति तदा वक्तुस्तात्पर्यानुपपत्त्या येन शब्दव्यापारेण अन्योऽर्थः प्रतीयते स शक्यसम्बन्धस्मरणरूपः शब्दव्यापारो लक्षणा। यथा 'गंगायां घोषः' इत्यत्र गंगाशब्दस्य प्रवाहोवाच्योर्थः। स एव च प्रथमं प्रतीतिपथमवतरति। न च तत्र घोषः स्थातुं शक्नोतीति वक्तुस्तात्पर्योपपत्तये प्रवाहसम्बद्धस्तीररूपोर्थस्तत्रलक्षणया बुध्यते। एतादृशप्रयोगद्वारा शैत्यपावनत्वप्रतीतिस्तीरे व्यज्यते। अत्र लक्षणे मुख्यार्थबाधशब्देन मुख्यार्थस्यान्यपदार्थासम्बन्ध एव विवक्षितः न तु वास्तविको मुख्यार्थस्य बाधः। यतो हि मुख्यार्थप्रतीतिरेव लक्षणाबीजम्। यदि च मुख्यार्थः पूर्णरूपेण बाध्येत तदा को मुख्यार्थः कश्चतदीयः सम्बन्धः इत्याद्यनवगमात् यत्नसहस्त्रेणापि लक्षणा भवितुं नार्हति। वस्तुतस्तु मुख्यार्थबाधेन वक्तृतात्पर्यविषयवाक्यार्थबोधाभाव एवाभिप्रेतः।

अत एव 'छत्रिणो यान्ति' काकेभ्यो दधि रक्ष्यताम् इत्यत्र मुख्यार्थस्य गमनरक्षणक्रियायामन्वयस्य संभावनायामपि 'आद्ये मुख्यार्थस्य एकसार्थवाहित्वेन द्वितीये चोपघातकत्वेनाभिप्रेयत्वात् भवत्येव लक्षणा। यत्र तु नैतादृशं तात्पर्यमवतिष्ठते किन्तु काकमात्रे एव तात्पर्यं तत्र नैव भवति लक्षणा। एतेन तात्पर्यानुपपत्तिरेव लक्षणाबीजं न तु अन्वयानुपपत्तिरिति व्यज्यते। यद्यपि 'गंगायां घोषः' यष्टीः प्रवेशय' इत्यादौ तात्पर्यानुपपत्तिरिव अन्वयानुपपत्तिरप्यस्ति तर्हि तात्पर्यानुपपत्तेर्लक्षणाबीजत्वे मानाभावश्चेदुच्यते तन्न सम्यक्-एवं चेत् किमिति घोषपदस्यैव मीनादौ न लक्षणा स्यात्, गंगायाः एव तीरे कथं स्यात्? अतस्तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति निश्चितप्रायम्।

उक्तलक्षणे यदिति पदं लुप्तकरणतृतीयान्तमव्ययम् । तथा च शब्दो यया वृत्त्या अर्थान्तरं प्रत्याययति सा लक्षणा। सा चारोपिता क्रिया । पुरुषेण लक्ष्यार्थं-विषयतया जनिता न तु शक्तिवत् सिद्धा ईश्वरोद्भाविता वा । अथवा मुख्यार्थव्यव-हितलक्ष्यार्थविषयकत्वात् शब्दे कल्पिता। साक्षात्सम्बन्धेन मुख्यार्थनिष्ठा परम्परया शब्दनिष्ठेति यावत् । केचन– यदिति पदं क्रियाविशेषणम् । तेन यल्लक्ष्यते प्रतिपाद्यते सा प्रतीतिरेव लक्षणेति प्रोचुः । तन्न सम्यक्-अभिधाव्यञ्जनयोरिव लक्षणाया अपि शब्दव्यापारत्वस्यैवौचित्यात् । अत एव विश्वनाथेन दर्पणे मम्मटा-भिप्रायं स्पष्टयता 'ययान्योऽर्थः' इत्युक्तम् । न च—

मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे।
अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ॥

इति प्रतीतिर्लक्षणेति कथनेन तस्याः ज्ञानरूपत्वमेवेति वाच्यम् ? प्रतीयते बुध्यते यया सा प्रतीतिरिति करणव्युत्पत्त्या प्रतीतिशब्दस्य शब्दव्यापारपरत्वात् । तत्र लक्षणायान्तावदयं क्रमः– प्रथमं मुख्यार्थप्रतीतिः, ततो मुख्यार्थबाधः ततस्तात्पर्यानुपपत्तिः, ततो मुख्यार्थसम्बन्धानुसन्धानम्, ततो लक्ष्यार्थबोधः' इति ।

'मुख्यार्थबाधे तद्योगे' इत्यादिलक्षणालक्षणं कुर्वता मम्मटेन सूचितं यल्लक्ष-णायां मुख्यार्थबाधः, मुख्यार्थसम्बन्धः, रूढ़िप्रयोजनान्यतरत्वञ्चेति हेतुत्रयमस्ति । एतेषां त्रयाणां कारणता दण्डचक्रचीवरन्यायेनास्ति । यथा दण्डादीनां प्रत्येकं समवधाने धटो नोत्पद्यते किन्तु समेषां समवधाने एव । एवं मुख्यार्थबाधादिहेतु-त्रयसमवधाने एव लक्षणा भवति न तु प्रत्येकं समवधाने । अत्र मुख्यार्थसम्बन्धस्य हेतुकोटौ निवेशेन 'शक्यसम्बन्धो लक्षणा' इति केषाञ्चिन्मतं न भाति मनोरमम् । लक्षणायाः सम्बन्धरूपत्वे तस्याः सम्बन्धहेतुत्वाभावात् । लक्षणा सम्बन्धरूपा, 'तद्धेतुरपि सम्बन्धः' इत्येकस्यैव कारणत्वं कार्यत्वञ्चानुपयुक्तमेव । तस्मात् शक्यसम्बन्धस्मरणरूपः व्यापारो लक्षणा । स्मरणञ्चज्ञानरूपमिति लक्षणाऽपि ज्ञानरूपा जाताऽत्र मते । एतद्व्यापारभूतज्ञानविषयत्वात् शक्यसम्बन्धस्यापि लक्ष-णात्वं कथंचिदुन्नेयं भवितुमर्हति ।

वस्तुतस्तु लक्षणास्वरूपनिर्णये भूयान् मतभेदो वर्तते । केचित्तु– अन्वयाद्यनु-पपत्तिज्ञानपूर्वकं शक्यत्वेन गृहीतार्थसम्बन्धज्ञानेनोद्बुद्धशक्तिसंस्कारतो बोधे लक्षणा (मञ्जूषायाम्) । अर्थात् शक्यसम्बन्धज्ञानेनोद्बुद्धशक्तिसंस्कारो लक्षणेति वदन्ति। केचन मीमांसकाश्च वाक्यशक्त्यनंगीकारात् वाक्यार्थो वाक्यज्ञाप्य इतिकृत्वा 'ज्ञाप्यसम्बन्धेनोद्बुद्धशक्तिसंस्कारो लक्षणेति वदन्ति । एतदुदाहरणञ्च 'गभी-रायां नद्यां घोषः' इति । अत्र मतद्वये 'उद्बुद्धशक्तिसंस्कारो लक्षणेति तत्त्वम् ।

कुमारिलभट्टमते तु-अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते' इत्युक्त्या प्रतीति-र्ज्ञानम् लक्षणा । अथवा प्रतीतिशब्दस्य करणव्युत्पत्त्या शब्दव्यापारो वा लक्षणा ।

अन्ये तु-शक्यसम्बन्धेनाशक्यप्रतिपत्तिरेव लक्षणेति वदन्ति। मम्मटेन च 'अन्योऽर्थो लक्ष्यते यत्सेति वदता येन शब्दव्यापारेणान्योऽर्थो लक्ष्यते प्रतिपाद्यते स शब्द-व्यापारो लक्षणेति प्रत्यपादि। नैयायिकाश्च— 'लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः' इति वदन्तः शक्यसम्बन्धस्यैव लक्षणात्वं प्रतिपादयामासुः।

वैयाकरणाश्च-यत्र तात्स्थ्यात्, तद्धर्म्यात्, तत्सामीप्यात्, तत्साहचर्यात् इत्यादिभिः हेतुभिः, तद्धर्माभाववति तद्धर्मारोपेण मुख्यार्थादन्यः अर्थोऽवबुध्यते तत्र लक्षणेति वदन्ति। व्यवहारे निमित्तं च तद्धर्मारोप इति शक्यतावच्छेदकारोप एव लक्षणेति तन्मतम्। अत्र मते तीरे गंगात्वारोपः दध्युपधातकमात्रे च काकत्वारोपो भवति। एवञ्च लक्षणा एका अप्रसिद्धा शक्तिरेवेति फलितम्। प्रवाहे गङ्गाशब्दसंकेतः अनादिकालतः परन्तु तीरे प्रयोजनवशात् प्रवाहसामीप्यात् गङ्गात्वारोपः क्रियते। अतः आरोपकरणात् इयमप्रसिद्धा शक्तिः। अत्र मते तत्तद्धर्मावच्छिन्ने शक्यतावच्छेदकधर्मारोपो भवति। अत एव 'कचतस्त्रस्यति वदनमित्यादौ राहुत्वादिविशिष्टस्य आरोप्यतावच्छेदककचत्वादिनाबोधात् न भवति त्रासाद्यन्वयानुपपत्तिः। कचत्वविशिष्टो राहुरित्यादिबोधेन तदुपपत्तेः। एतेन कचत्वादिना बोधे त्रासकरत्वानुपपत्तिः, राहुत्वादिनाबोधे च चमत्कारानुपपत्तिरिति अपास्तम्। अत्रैव मते 'गङ्गायां मीनघोषौ स्तः' इति वाक्यमुपपद्यते। अत्र गंगापदेन वास्तविक– गंगात्वावच्छिन्नस्य प्रवाहस्य, तथा आरोपित-गंगात्वावच्छिन्नस्य तीरस्य च बोधः समकालमेव भवति। अतः मीनघोषयोः यथासंभवमेकधर्मावच्छिन्नेऽन्वयात् द्वन्द्वोऽपि साधीयान् भवति। युगपद्वृत्तिद्वयविरोधोऽपि नात्र मते संभवति। अन्यथा मीनस्यान्वयार्थं शक्त्याः समाश्रयणं घोषस्यान्वयार्थं लक्षणायाश्चाश्रयणमिति वृत्तिद्वयविरोधः— एककालावच्छेदेनापतितः स्यात्।

एवञ्च उपर्युक्तप्रपञ्चेन लक्षणायाः, ज्ञानरूपत्वम्, सम्बन्धरूपत्वम्, संस्काररूपत्वम्, शक्यतावच्छेदकारोपरूपत्वञ्च प्रस्तुतीकृतं वर्तते। तत्र सम्बन्धरूपत्वन्तु नैव युक्तं, तस्याः सम्बन्धहेतुत्वात्। ज्ञानसंस्काररूपत्वमपि न युक्तम्? अभिधाव्यञ्जनयोरिव लक्षणाया अपि शब्दव्यापारत्वस्यैवौचित्यात्। तस्मात् शक्यतावच्छेदकारोप एव लक्षणा। शक्यतावच्छेदकारोपेण तदर्थनिरूपिता अप्रसिद्धाशक्तिः शब्दे समागच्छति। सा च शब्दव्यापारस्थानापन्नेत्यलं विस्तरेण।

व्यञ्जना

कवित्वस्य सौन्दर्यस्य च मनोऽभिरामेण रामणीयकेन महिम्ना विश्वेषां मनांसि विषयेभ्यो व्यावर्त्यासत्यात् सत्ये ऽशिवाच्च शिवे तेषां प्रवर्तनमेव काव्यस्य मेरुदण्डः। अतएव प्रभुसम्मित वेदादिशास्त्रेभ्यः सखिसम्मित पुराणेतिहासेभ्यश्च विलक्षणा-सत्कविभणितिः मधुरमभिदधती मञ्जुभाषिणी कामिनीवाभिनिवेशयतिमानवमनांसि शुभैकनिदानेष्वभ्युपायेषु। स्वकीयानिर्वचनीयकल्पनाशक्त्या अमूर्तस्य मूर्तत्वं परोक्षस्य वर्तमानत्वं प्रसाधयन्तो महीयांसः कवयो लोकलोचनपथान्तरालनिहितं सहृदयमात्रैकवेद्यं शोभनीयं तत्त्वं सविमर्शमाकृष्य पुरस्ताल्लोकस्योपस्थापयन्ति ! उक्तं ध्वनिकृता—

> प्रतीयमानं पुनरन्यदेववस्त्वस्तिवाणीषु महाकवीनाम्,
> यत्तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥

प्रतीयमानार्थ एव काव्यस्य जीवनाधायकः। "उदितं मण्डलं विधोः" इत्येकमेववाक्यं वक्तृबोद्धव्यादीनां वैशिष्टयेन कथंकारं जीवनाभावगमनविधिनिषेधादीन् प्रत्याययतीति नतिरोहितं प्रेक्षावतां कृते ! नहि जीवनाभावाभिसरणादिष्वर्थेषु, "उदितं मण्डलं विधोः" इतिवाक्यस्य संकेतग्रहः केनाप्यभ्युपगतो येनाभिधातमर्थमभिधातुं क्षमा भवेत्। उक्तं हिदर्पणे–तत्र संकेतितार्थस्यबोधनादग्रिमाभिधेति। अतो व्यङ्ग्यार्थबुभुत्सया व्यञ्जना वृत्तिरवश्यमेवाभ्युपेया ! अभिधावृत्या पदार्थोपस्थित्यनन्तरं "घटंकरोतीत्यादौ घटवृत्तिकर्मतानुकूलकृत्याश्रयः" इत्यादि बोधे कर्मतारूप संसर्गस्य बोधनाय तात्पर्यनामिकैकाऽपरावृत्तिरपि-अभिहितान्वयवादिना कुमारिलभट्टेन स्वीकृता। इयं खलुतात्पर्यवृत्तिः पदार्थयोरसंकेतितं साकांक्षं सम्बन्धमभिव्यनक्ति ! पदार्थद्वयस्य सम्बन्ध-बोधानन्तरं जायमानः प्रतीयमानार्थबोधः सम्बन्धमभिधाय क्षीणतामुपगतया तात्पर्यवृत्या कथमपि भवितुं नार्हतीति तेनापि व्यङ्ग्यार्थं बोधयितुं व्यञ्जनाभ्युपेया भवति। अन्विताभिधानवादि प्रभाकरमतेतु वाक्यघटकानां प्रत्येकंपदानामन्विते पदार्थे एवशक्तिः अतोऽन्वयं बोधयितुंतात्पर्यवृत्तिर्नाभ्युपेया। किन्तु गामानय गांवधान" इत्यादावेकस्यैव गामिति पदस्यानयनान्वितगविशक्तिः बधानान्वितगवि वा शक्तिरितिविचारे "निर्विशेषं न सामान्यमिति नियमानुसारं सामान्यान्वितस्य विशेषान्विते पर्यवसानं भवति। किन्तु सामान्याच्छादितविशेषपदार्थस्य संकेतलभ्यत्वेऽपि ततो दूरं जायमानो व्यङ्ग्यार्थबोधः कथं स्यादभिधयेति अत्रमतेऽपिव्यञ्जनायाः स्वीकरणमावश्यकमेव। इदमत्र न विस्मर्तव्यं

यदिमावभिधावादिनावास्ताम् । अभिधयैव व्यञ्जना गतार्थेति तयोर्मतम् । तच्चनिराकृतमुपर्युक्तप्रपञ्चेन । व्यञ्जनां प्रत्याचक्षाणो भट्टमतानुयायी भट्टलोल्लटः सिद्धान्तद्वयं प्रत्यपीपदत् यत् "सोऽयमिषोरिवदीर्घदीर्घतराभिधाव्यापारः" यत्परः शब्दः स शब्दार्थः ! अर्थात् यदर्थे यस्यतात्पर्यं स तस्य शब्दस्यार्थः । एवञ्च-व्यङ्ग्यार्थोऽप्यभिधयैवबुध्यतामलं व्यञ्जनास्वीकारेणेति । किन्तु नैतद्युक्तं यतो हि-इषुरेकेनैव वेगाख्येन व्यापारेण यथा मर्मच्छेदं मर्मभेदं प्राणहरणञ्च विधत्ते तथैव यद्येक एव शब्द एकेनैवाभिधाव्यापारेण पदार्थोपस्थितिमन्वयबोधं व्यङ्ग्य-बोधञ्च कुर्यात् तदा लक्षणायाः समुच्छेद एव स्यात् ! तीराद्यर्थस्याभिधेयत्वेन सिद्धे तेषां लक्षणीयत्वस्यायुक्तत्वात् । वस्तुतस्तु शब्दबुद्धिकर्मणां विरम्यव्यापारा-भावः "इति सिद्धान्तस्य जागरूकतायां तथा कथनं केवलं साहसमात्रम् । यत्परः शब्दः 'स शब्दार्थः' इत्यस्यतु इदन्तात्पर्यं यद् वाक्यान्तर्वर्तिषुपदार्थेषु यः सिद्धपदार्थ-स्तस्य विधानमनर्थकमिति साध्यस्यैव विधेयत्वम् तत्रैव च वाक्यतात्पर्यमतः स एव वाक्यार्थः । यथा लोहितोष्णीषाः प्रचरन्ति इत्यत्र-लोहितोष्णीत्वमात्रमेव विधीयते । प्रचरणन्तु मानान्तरादेव सिद्धम् । अतो यत्पर इत्यादि कथन-मयुक्तमेव ।

न च मास्तु अभिधया व्यङ्ग्यार्थबोधः किन्तु तत्र लक्षणैव क्रियताम् त्यज्यतां व्यञ्जनाया आडम्बरः, इत्यपि कथनमसाम्प्रतम् ! यथा गंगायां घोषः" इत्यादौ मुख्यार्थवाधपूर्विका लक्षणा भवति, न दृश्यते तथा मुख्यार्थबाधो निःशेषच्युत चन्दनमित्यादिस्थले । एवञ्च गतोऽस्तमर्कः उदितं मण्डलं विधोरित्यादिस्थले प्रतिपदमनुभूयमानाः व्यङ्ग्याः कथं प्रतीतिपथमवतरेयुः विनाव्यञ्जनाम्, उक्तं हि प्रकाशे

लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो ।
न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः ।

मुख्यार्थवाधादिहेतुत्रयं विनैव व्यङ्ग्यार्थविशिष्टोलक्षणीयः, इति कथनमपि न भवति हृदयास्पदम् । प्रयोजनेन सहितस्य लक्षणीयत्वायोगात् ! ज्ञानस्य विषयो यथा भिद्यते ज्ञानात् तथा फलमपि । यथा नीलप्रत्यक्षस्य विषयो नीलः फलन्तु तत्र ज्ञेयधर्मः प्रकटता तथैव लक्षणाजन्यज्ञानविषयत्वेन तत्फलस्य शैत्यपावन-त्वादेर्वैभिन्न्यस्यावश्यकत्वात् । दशरूपककारधनिकस्यापीदं कथनं यद् तात्पर्यस्या-परिमेयत्वात् व्यङ्ग्यार्थोऽपि तात्पर्यार्थ एवेति न समीचीनं यतो हि तात्पर्यवृत्या वोध्यत्वं हि तात्पर्यार्थत्वम् । सा च तात्पर्यवृत्तिः सम्बन्धबोधनादेवोपरता नालं व्यङ्ग्यं बोधयितुम् । काचिदपरा चेयं तात्पर्यवृत्तिस्तदा नाममात्रमेव वैभिन्न्यम् । तुरीयकक्षायां वृत्युपलब्धेः । कैश्चिद् व्यञ्जनामस्वीकर्त्तुमेवं प्रत्यपादि— यस्मिन् खलुशब्देश्रवणविषयतामुपगतेयावानर्थो वाच्यो व्यङ्ग्यो वा ज्ञायते तत्र शब्दस्यैव-निमित्तत्वम् । एवञ्चवाच्यार्थ इव व्यङ्ग्यार्थेऽप्यभिधैववृत्तिर्न तु व्यञ्जनेति ।

तदप्यविचारितरमणीयमेव, व्यञ्जनामन्तरा व्यङ्ग्यार्थं प्रति शब्दस्य निमित्तत्वस्य-वक्तुमशक्यत्वात् ! किञ्च अभिधेयात् व्यङ्ग्यार्थेनैकविधं वैभिन्न्यम् । यथा वाच्यार्थे विधिरूपे व्यङ्ग्योनिषेधरूपः । बोद्धा च परस्परं भिन्नः, संख्याऽपि तयो-र्भिन्ना । गतोऽस्तमर्कः इत्यादौवाच्यार्थ एक एव व्यङ्ग्यार्थस्तु भूयान् । एवं खलु जाग्रति बहु वैभिन्न्ये को नाम व्यङ्ग्यार्थं वाच्यार्थयितुमिष्टे । नहि सुनिपुणोऽपि कुलालोयत्नसहस्रेणापि घटं पटयितुमिष्टे । व्यञ्जनावादस्य प्रतिष्ठापनमानन्द-वर्धनेनकृतम् । आनन्दात् पूर्वं ये खलु भामहोद्भट्टरुद्रटप्रभृतयोऽलंकारशास्त्रप्रणेता-रोबभुवुस्ते व्यञ्जनां स्वीचक्रुरेव नहि । तत्र कश्चन अलङ्कारवादी अपरो रीतिवादी, इतरश्च वक्रोक्तिवादी स्वाभिमतं सिद्धान्तमेव काव्यात्मत्वेन प्रतिपाद-याम्बभूव । यद्यपि भरतस्य रसवादस्तदानीं पूर्णख्यातिमगमत्-तथापि रसवत् प्रेयोर्जस्वीत्याद्यलङ्कारेष्वेतं रसवादं तेऽन्तर्भावयाम्बभुवुः । एवं संशयदोलायां दोदुल्यमाने काव्यात्मवादे नैकविधान् पक्षानुद्भाव्य प्रत्याख्याय ध्वनिसिद्धान्तः सम्यक्तया प्रतिष्ठापितो ध्वनिकृता आनन्देन । तेन प्रतिष्ठापितायाञ्चव्यञ्जनायां तस्याः प्रबलविरोधी महिमभट्टोऽनुमानेन व्यञ्जनां गतार्थयन् "भ्रमधार्मिक विश्रब्ध" इत्यत्र भ्रमणाभावस्य सिंहवत्वेन हेतुना अनुमेयत्वं प्रतिपादयामास । किन्तु भीरोरपि स्वामिनिदेशेन कान्तास्नेहेन धनप्रलोभेन वा सत्यपि भयकारणे भ्रमणस्य दृष्टचरत्वेन साध्याभाववद्वृत्तित्वेन हेतोर्व्यभिचरितत्वात् व्यङ्ग्यस्यानुमेयत्वं खपुष्पायितमेव । पण्डितराजजगन्नाथेन "दुर्गालंघितविग्रहः" भद्रात्मनोदुरधिरोहतनोः" इत्यादिना-नार्थस्थले शक्तिनियामकैः प्रकरणादिभि र्नियन्त्रितायामभिधायां योऽपरार्थबोधः सहृदयसंवेद्यः स खलु व्यञ्जनाया एव महिमेति कस्यचित् सिद्धान्तं प्रत्याख्यातम् । श्लेषस्थल इव तत्रापि अर्थद्वयस्य बोधस्तेनाभिधयैव स्वीकृतः। एवं रूपेण तादृशस्थले व्यञ्जनाया अनावश्यकतां प्रतिपादयताऽपि तेन योगरूढ़ि स्थले रूढ़िज्ञानेन योगापहरणस्य सकलतन्त्रसिद्धतया रूढ्यनधिकरणस्य योगार्थस्य व्यक्ति विना प्रतीतिरसंभवेति व्यञ्जनाया आवश्यकत्वं प्रत्यपादि । सा चेयं व्यञ्जना न खलु साहित्यशास्त्रोपज्ञा किन्तु सर्वविद्यानिदानं व्याकरणशास्त्रमेवास्या अपि मूलम् । वैयाकरणा हि चादीनां टाबादीनां च द्योतकत्वं प्रोचुः । द्योतकत्वञ्च— समभि-व्याहृतपदनिष्ठशक्तिव्यञ्जकत्वम् । एवञ्चव्यञ्जनावादः स्पष्टमेव व्याकरणेऽव-लोक्यते । व्यंञ्जनावादस्य पृष्ठभूमिः वैयाकरणानां स्फोटवादः । स चापि स्फोटो मध्यमानादव्यङ्ग्य एव भवति ! अतएव नागेशभट्टः— "मुख्यार्थबाधग्रहनिरपेक्ष-बोधजनको मुख्यार्थसम्बद्धासम्बद्धप्रसिद्धार्थविषयको वक्त्रादिवैशिष्टयज्ञानप्रतिभाद्यु द्बोधसंस्कारविशेषोव्यञ्जना" इति लक्षणयाञ्चकार । सा चेयं व्यञ्जना "व्यापाररूपेति विश्वनाथेन दर्पणे प्रत्यपादि । नागेशः तु संस्काररूपामिमां प्राह । अत्रापि विषयतासम्बन्धेन पदे समारोप्य पदनिष्ठवृत्तित्वं सूपपादनीयम् । इयं खलु व्यञ्जना स्वरूपसती बोधिका, ज्ञाता वेति विचारे न तावत् ज्ञातासती-बोधिकाभवितुमर्हति यतो हि अभिधाज्ञापककोषव्याकरणादिवद् व्यञ्जनाज्ञापकस्य

कस्यचित् सुतरामभावात् । अतो व्यञ्जना स्वरूपसतीबोधिका । न चैवं सदा सर्वैरपि व्यञ्जकशब्दैः व्यङ्ग्यार्थप्रतीतिः स्यादिति वाच्यम् ? व्यञ्जनाजन्यबोधं प्रतिवासनाया अपि कारणत्वाङ्गीकारात् । सा च वासना प्राक्तनी, इदानींतनी वा भवेदित्यन्यदेतत् । वस्तुतस्तु अभिधालक्षणे इव व्यञ्जना न केवलं पदमात्रवृतिः किन्तु वक्तृबोद्धव्यप्रस्तावदेशकालचेष्टादीनापि वैशिष्टद्येनव्यङ्ग्यार्थप्रतीत्या संस्काररूपत्मेव तस्याः समीचीनं प्रतिभातीत्यलम् ।

व्यञ्जनायाः शब्दार्थवृत्तित्वविचारः

वाच्य-लक्ष्य-तात्पर्यार्थ-व्यतिरिक्तस्य सहृदयैकमात्रवेद्यस्य चमत्काराधायकस्य कस्यापि प्रतीयमानार्थस्य द्योतिका वृत्तिर् व्यञ्जना । उक्तम् अपि—

विरतास्वभिधाद्यासु ययार्थो बोध्यते परः ।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ।।

तत्र व्यञ्जना प्रथमं द्विविधा, शब्दनिष्ठा अर्थनिष्ठा च । तत्रापि शब्दनिष्ठा व्यञ्जना अभिधालक्षणामूलत्वाद् द्विविधा । यथा अभिधा शब्दव्यापारस् तथैव लक्षणापि शब्दस्यैवेति तन्-मूलाऽपि व्यञ्जना शाब्दी एव इत्य् उक्तम्—

'अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा'' इति ।'

आर्थीव्यञ्जना च यत्र वक्तृवोधव्यकाक्वादीनां वैशिष्ट्यात् काव्यवासनापरिपक्वबुद्धीनां वाच्यलक्ष्यव्यतिरिक्तोयोऽन्योऽर्थः प्रतीयते, तद्धेतुर् योऽर्थस्य वाच्यलक्ष्यव्यङ्-ग्यस्य त्रिविधस्य व्यापारः स एवोच्यते आर्थीव्यञ्जनेति ।

अस्याश् च व्यञ्जनायाः शब्दार्थगतत्वव्यवस्थापकौ त्व् अन्वयव्यतिरेकाव् एव स्तः । तच्छब्दसत्वे तदर्थ-प्रत्ययः, तच्छब्दाभावे च न तत्प्रत्ययो यत्रासौ शाब्दी व्यञ्जना । यत्र च तच्छब्द-परिवर्तनेऽपि तदर्थाभिव्यक्तिर् नापैति तत्रार्थी व्यञ्जनेति विदुषाम् आकूतम् । अर्थात् शब्दस्य पर्यायपरिवृत्यसहत्वम् एव व्यञ्जनायाः शाब्दत्वे बीजम् ।

काव्यप्रकाशोद्योतकारास् तु नियन्त्रितार्थधीजनकत्वं शाब्दव्यञ्जनात्वम् इति प्रोचुः[1]। अत्रोपपद्यन्ते विभिन्ना विचिकित्साः । तद्यथा अभिधामूलां व्यञ्जनाम् अभिलक्ष्य काव्यप्रकाशे तदनुसारिणि दर्पणे चोक्तम्—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ।।

दर्पणेऽप्य् एतत् समानार्थकं श्लोकान्तरं लिखितम् । एतेन ज्ञायते यद् अभिधा-मूला व्यञ्जना तत्रैव जायते यत्रानेकार्थकाः शब्दाः स्युः । तत्रैव नियन्त्रितायाम् अभिधायां द्वितीयार्थ-प्रतीतिर् जायते व्यञ्जनया । किन्तु नियन्त्रितार्थधीजनकत्वम् इति शाब्दव्यञ्जनायाः लक्षणं केवलाम् अभिधामूलाम् एवादाय प्रवृत्तम् अहोस्वित्

1. काव्यप्रकाशबालबोधिनी पृष्ठे 70 ।

लक्षणामूलाम् अप्य् आदाय ? यदि च लक्षणा-मूलव्यञ्जनम् अपि लक्ष्यं वर्ततेऽस्य तदा न हि "गंगायां घोषः" "उपकृतं बहुतत्र किम् उच्यते" इत्यादौ क्वचिद् अपि दृश्यते अनेकार्थकः शब्दस् तत्-प्रयुक्तम् अभिधायाः नियन्त्रणं वा। एवं-स्थिते कथंकारम् अत्र शाब्दव्यञ्जनात्वम् इति विप्रतिपत्तिः। यदि च शब्दस्य पर्याय-परिवृत्त्यसहत्वमूलकत्वेनाऽत्र शाब्दत्वम् अभिप्रेतं तर्हि कुत्रचित् संभवेऽपि शाब्दत्वे "गंगायां घोषः" इत्यत्र "भागीरथ्यां घोषः" इत्य् उच्चार्य शब्दपरिवर्तनेऽपि शैत्यपावनत्वरूपव्यंग्यस्य तटे प्रत्यायनेन क्व गतं शब्दस्यपर्यायपरिवृत्त्यसहत्वम् ? इत्य् अपरा विप्रतिपत्तिः। किञ्च— विवक्षितान्यपरवाच्यध्वनौ भवति अभिधा-मूला व्यञ्जना। यतो हि तत्रैव वाच्यार्थम् उपसर्जनीकृत्य व्यङ्ग्यार्थः प्रधानत्वेना-ऽवगम्यते। लक्षणामूलव्यञ्जना त्व् अविवक्षितवाच्यध्वनौ जायते। अत्र वाच्यम् अविवक्षितम् एवावतिष्ठते। वाच्यार्थस्य अविवक्षा चद्विधा, तस्याऽत्यन्तं तिरस्कारेण अर्थात् त्यागेन, तथा अर्थान्तरे तस्य संक्रमणेन च।

तत्राविवक्षितवाच्यस्य ध्वनेर् अर्थान्तरसंक्रमित-वाच्ये प्रयोजनवत्युपादान-लक्षणामूला व्यञ्जना। "त्वामस्मि वच्मि" इत्यादि-पद्ये सम्बोध्यम् उद्दिश्य वक्तव्य-विषय-कथनेनैवसिद्धे पुनस् त्वाम् अस्मि वच्मि इति कथनम् अनुपयुक्तम् इति उपदेश्यं त्वाम् आप्तोऽहम् उपदिशामीत्यर्थो लक्ष्यते तेन च हितसाधनत्वं व्यङ्ग्यम्। अस्यैव ध्वनेर् अत्यन्ततिरस्कृतवाच्ये— 'उपकृतं बहुतत्र किमुच्यते' इत्यादि-पद्ये उपकारादयः शब्दा विपरीत-लक्षणया अपकारादीन् लक्षयन्ति। अपकारातिशयश् च तत्र व्यङ्ग्यः। अत्रोदाहरणेष्व अभिधया शब्दस्य संकेतितार्थे बोधविषयताम् उपगते सति तेषां वाक्यघटकपदार्थान्तरेणान्वयासंभवात् तात्पर्यानु-पपत्त्या लक्षणावृत्यामुख्यार्थसम्बद्धोऽन्योऽर्थोऽवबुध्यते। ततश् च व्यञ्जनया सहृदयानां तत्तदर्थबोध इति शाब्दी-लक्षणा-मूलव्यञ्जना वर्तते। शाब्दत्वञ्चाऽस्याः शब्दपरिवृत्यसहत्वेनैव नान्यथा। न हि त्वाम्-अस्मि, वच्मि, उपकृतादयः शब्दाः कदापि स्वपरिवर्तनं क्षमन्ते। परिवर्तिते तत्र पर्याय-शब्दे नहि तादृश-व्यङ्ग्यार्थ-प्रतीतिर् इति स्वयम् एवानुभूयताम्। न चैवं गंगायां घोषः इत्यत्र कथं पर्याय-परिवृत्तिसहत्वम् इति चेत् लक्षकतावच्छेदकानुपूर्वीगतवैशिष्ट्यस्यैव परिवृत्यसहत्वेन विवक्षणात्। अत एव गंगायां घोषः इति वाक्यत एव शैत्य-पावनत्व-प्रतीतिर् न तु गंगातटे घोषः इत्य् अतोऽपि। वस्तुतस्तु पर्याय-परिवृत्ति-स्थलेऽपि शाब्दया व्यञ्ज-नाया वक्ष्यमाणतया न काप्य् अत्राऽनुपपत्तिः।

विवक्षितान्यपरवाच्यस्य ध्वनेर् असंलक्ष्यव्यङ्ग्ये कीदृशी व्यञ्जना ? शाब्दी आर्थी वा ? तत्रापि शाब्द्याम् अभिधामूला लक्षणामूला वेत्य् एवं संशये न तावद् आर्थी व्यञ्जना। तत्र वाच्यलक्ष्यव्यङ्ग्यानां त्रयाणाम् अप्य् अर्थानाम् प्रथमं प्रतीतिपथम् अवतीर्णानां स्वात्मानम् उपसर्जनीकृत्य क्रमशोऽपरव्यङ्ग्यार्थबोधकत्वेन दृष्टत्वात्। अत्र च केवलं वाच्यार्थस्यैवोपसर्जनीभूतस्य व्यङ्यार्थपरत्वम् इति

आचार्यैः प्रतिपादितत्वात् । नापि लक्षणा-मूलव्यञ्जनाया एव वाऽवसरोऽत्र, तस्या मुख्यार्थाऽनुसन्धानतद्बाध-तत्-सम्बन्धान्वेषणप्रयुक्तमहत् वैकट्यग्रस्तत्वात् । रसस्थले चैतादृश वैकट्यस्य रसपरिपन्थित्वात् । यद्य् अपि दर्पण-कारेण "निः शेषच्युत-चन्दनम्" इत्यादि-पद्ये उत्तम-काव्यत्वं स्वीकुर्वता तत्र लक्षणा-मूल-ध्वनित्वं प्रोक्तं तथाऽपि तत्र विदग्धोत्तमनायिकाया वाक्यानां साधारण्येन वाच्यार्थेऽबाधितत्वात् लक्षणाया अवसर एव तत्र नास्ति । तस्माद् असंलक्ष्य-क्रम-व्यङ्ग्य स्थले अभिधा-मूलैव व्यञ्जना भवतीति निर्विवादम् ।

नन्व् अभिधामूल-व्यञ्जनाया अनेकार्थकशब्द-स्थले यत्र प्रकरणादिभिर् अभिधाया नियन्त्रणं जायते तत्रैवाऽपरार्थस्य बोधनाय स्वीकृतत्वेन, असंलक्ष्यक्रम-व्यङ्ग्य-रसादि-स्थले चाऽनेकार्थक-शब्दानाम् अभावात् कथं स्वीकर्तुम् अर्हा तत्राऽभिधामूल-व्यञ्जनेति चेद् अत्रोच्यते— अभिधामूलव्यञ्जनायाः द्वयी विधा । एका तु यत्राऽनेकार्थकाः शब्दाः स्युः । तत्र प्राकरणिकेऽर्थे नियन्त्रितायाम् अभिधा-याम् अप्राकरणिकस्याऽर्थस्य बोधस् तन्मूल-व्यञ्जनया जायते । नाभिधा तम् अर्थं बोधयितुं क्षमा, तस्या नियन्त्रितत्वात् । "भद्रात्मनो दुरधिरोहतनोः" इत्यादि पद्ये करदानशिली-मुखादयः शब्दाः नानार्थकाः । प्रकरणवशाद् एषाम् अभिधा राज्ञि नियन्त्रिता । परम् एभिर् एव शब्दैः परिवर्तनम् असहमानैस् तथा नियन्त्रिता-भिधैर् अपि सहृदयानां वासनाबलात् गजस्य तद्-अन्वययोग्यस्य चार्थस्य प्रतीतिर् भवत्य् एवेत्यप्राकरणिकोऽयम् अर्थः प्रतीयते अभिधामूल-व्यञ्जनयैव । न चाऽर्थ-भेदेन शब्दभेदः इति-नयात् अत्र शब्द-द्वयम् अस्ति । तच्चैकयत्नोच्चार्यतया न पार्थक्येनानुभूयते इति प्रथमपरवारणादिशब्देन राजाद्यर्थबोधनविरतायाम् अभिधायां द्वितीय-शब्दवृत्त्यभिधया गजरूपोऽर्थो बोधनीय इति कृतम् अत्र व्यञ्जना-स्वीकारेणेति वाच्यम् ? शब्दद्वय-स्वीकारे राजरूपार्थस्यैव प्राथमिको बोधः इत्य् अत्र विनिगमना-विरहात् । द्वयोर् अप्य् अभिधेयत्वेन पूर्वपश्चात् भावस्य वक्तुम् अशक्यत्वात् । किञ्चधर्मिकल्पनातो वरं धर्मकल्पनम् इति द्वितीयार्थ-बुभुत्सया व्यञ्जनाया एवाऽऽवश्यकत्वात् ।

अपरा च विधा वर्तते अभिधामूलव्यञ्जनाया यत्रानेकार्थकाः शब्दा न स्युः किन्तु स्युर् एकार्थका एव शब्दाः । तत्र अभिधया संकेतितार्थे ज्ञाते विभावादीनां साहाय्येन काव्यवृत्ति-व्यञ्जनया जायते रसादिरूपव्यङ्ग्यार्थ-प्रत्यय इतीयम् अप्य् अभिधामूलैव व्यञ्जना । यथा—

शयिता सविधेऽप्यनीश्वरा सफलीकर्त्तुमहो मनोरथान् ।
दयिता दयिताननाम्बुजं दरमिलन्नयना निरीक्षते ॥

अत्राऽलम्बनस्य नायकस्य सविधशयनाक्षिप्तरहः स्थानादेर् उद्दीपनस्य, त्रपौत्सु-क्यादेश् च व्यभिचारिणः सम्प्रयोगाद् वाच्यार्थबोधानन्तरम् एव नायकविषयिण्या नायिका-निष्ठाया रतेर् अभिव्यञ्जनं सहृदयसाक्षिकम् इति वर्तते प्रकारोऽयम्

अभिधामूल-शाब्द-व्यञ्जनायाः । विभावादि-प्रतीतिम् अनु झग् इति जायमानो रस-प्रत्ययः सक्रमोऽपि झटिति जायमानतयाऽसंलक्ष्यक्रम इत्य् उच्यते । न चाऽत्र वर्तन्ते अनेकार्थकाः शब्दाः । नवा शब्दस्य पर्यायपरिवृत्यसहत्वम् एवाऽत्र दृश्यते । सविधदयितादि-शब्दान् अपहाय समीपवल्लभादि-शब्दप्रयोगेऽपि तथैव व्यङ्ग्य-प्रत्ययात् । एवञ्चाऽत्र व्यञ्जनायाः शाब्दत्व-व्यवस्थापकयोर् मध्ये नास्ति कस्याप्य् अवस्थितिर् इति यत्राऽभिधेयार्थ-बोधानन्तरम् एव व्यङ्ग्यार्थ-बोधस् तत्राऽपि अभिधामूला शाब्दी व्यञ्जनेति शक्यते वक्तुं निर्विवादम् । अत एव गतोऽस्तमर्कः इति शब्दे श्रुतिपथम् उपगते वाच्यार्थ-बोधान्तरम् एव तत्तद् व्यङ्ग्यार्थप्रत्ययस् तादृशानां वासनावासितान्तःकरणानां जायते इति प्रसिद्धम् एव । नह्य् अत्राप्य् अनेकार्थकाः शब्दाः न वा पर्यायपरिवृत्यसहत्वम् एव "सूर्योऽस्तं गतः इत्युदीर्यमाणेऽपि तथैव व्यङ्ग्यबोधस्याऽनुभाविकत्वात् ।

विवक्षितान्यपरवाच्यस्य संलक्ष्यक्रमध्वनिस्थले शब्दशक्तिमूलके ध्वनौ अभिधामूलैव व्यञ्जना शाब्दी । तत्र शब्द-शक्त्युत्थवस्तु-ध्वनौ "पथिक नात्र संस्तरमस्ति" इत्यादिपद्ये प्रयुक्ताः पयोधरसंस्तरादयः शब्दा अनेकार्थकाः । तत्र प्रकरणवशात् पयोधरादीनाम् अभिधा मेघाद्यर्थे नियन्त्रिता । अनन्तरं परिवृत्य-सहैः पयोधरादिशब्दैर् अत्र शास्त्र-ज्ञानरहितेङ्गितानभिज्ञजन-वहुले ग्रामे स्वैर-विहारार्थिनीति शाब्दव्यञ्जनया प्रत्याय्यते । संलक्ष्यक्रमीयार्थशक्तिमूलकध्वनिस्थले त्व् आर्थी व्यञ्जना भवति । तादृशस्थले वक्तृबोधव्यकाकूनां मध्ये यस्य कस्यापि नान्तरीय-सत्ताकत्वेन तद्-वैशिष्ट्याद् वाच्य-लक्ष्यव्यङ्ग्याद्यन्यतरस्यार्थान्तरव्यञ्जक-तयाऽर्थी व्यञ्जनायास् तत्र सूपपादनीयत्वात् । यथा—

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वति ॥

अत्र शब्दव्यापारं विनैव नतवदनायाः पार्वत्या लीलाकमलगणन-रूपोऽर्थो लज्जारूपं सञ्चारिणं व्यनक्तीत्य् अर्थशक्तिमूलो ध्वनिर् अत्र ।

एवञ्च शाब्दी-व्यञ्जनाऽनेकार्थक-शब्द-स्थले, शब्दपरिवृत्यसहस्थले, तत्-परिवृत्तिसहस्थले चैतत् स्थलत्रयेऽपि भवतीति वक्तुं शक्यम् । यद्यपि व्यञ्जना शब्द-तद्-अर्थपदपदैकदेश-वर्ण-रचनाचेष्टादिषु सर्वत्रैवतिष्ठति तथाप्य् अत्र काव्यस्य शब्दार्थरूपतया तद्-गतत्वनैव विवेचनं प्रामुख्यम् आवहति । यद्यपि शाब्द्यां व्यञ्जनायाम् अर्थस्य, आर्थ्यां च शब्दस्य नान्तरीयकतया व्यञ्जकत्वम् आपतति तथापि शाब्द्याम् अर्थस्य गौणत्वम् शब्दस्य प्राधान्यम् आर्थ्यां च अर्थस्य प्राधान्यं शब्दस्य च गौणत्वम् अभ्युपेयम् । तथा चोक्तम्— "एकस्य व्यञ्जकत्वे ह्यन्यस्य सहकारिता" ।

एवं स्थिते अत्र केचित् विप्रतिपद्यन्ते यत् व्यञ्जना अर्थव्यापार एव न शब्दस्येति । तेषाम् इदम् अत्राकूतम्— कार्य-नियतपूर्ववर्तिकारणम् । न हि शब्दस्यनियतपूर्ववर्तिता वर्तते व्यङ्ग्यार्थप्रतीतिकाले । अतो व्यङ्ग्यार्थस्य शब्देन सह प्रत्यक्ष-कार्य-कारणाभावाद् व्यङ्ग्यार्थः अर्थबोध्य एवाऽर्थः । अर्थश् च व्यापार-द्वारैव व्यङ्ग्यार्थं प्रत्याययति । स च व्यापारो नाभिधा, प्रथमार्थस्य द्वितीयार्थे संकेताभावात् । मुख्यार्थबाधाद्यभावाच् च नाऽत्र लक्षणाया अवसरः । अतः परिशेषात् तत्र व्यञ्जनैव व्यापारः । व्यापारश् चायं प्रत्यक्ष-संबन्धाभावात् अर्थस्यैव संभवति, न शब्दस्येति ।

अत्रोच्यते— व्यङ्ग्यार्थस्य शब्देन सह प्रत्यक्ष-कार्यकारणाभावात् व्यञ्जना न शब्दव्यापार इति कथनं सर्वथैवासंगतम् । न हि शब्दाऽर्थयोः कार्य-कारणभावः कुत्राऽपि स्वीकृतो मानान्तरसिद्धो वा । शब्द-निष्ठकारणतानिरूपित कार्यतावच्छेदकम् अर्थ-विषयक-शाब्द-बुद्धित्वम् एव भवति । एवञ्चार्थनिष्ठकार्यतानिरूपित-जनकतायाः शब्दे वक्तुम् अशक्यतया तद्-द्वारा व्यञ्जनायाः शाब्दत्व-निराकरणं दुष्प्रयास-मात्रम् । किञ्च-व्यङ्ग्यार्थ-प्रतीतेर् अव्यवहितपूर्वं शब्दस्याऽनुपस्थितेस् तथा कस्यचनाऽर्थस्य च तत्र नियमतः समुपस्थितेः व्यञ्जना आर्थी इति कथनम् अपि नालम्बते मनोग्राहिताम्, यतो हि न हि व्यङ्ग्यार्थाव्यवहितत्पूर्वक्षणवृत्तित्वं व्यञ्जनायाः शाब्दत्वार्थत्वनियामकम् अपि तु अन्वयव्यतिरेकाव् एव तन्नियामकौ । पर्यायपरिवृत्तिसहत्वासहत्वाभ्याम् एव व्यञ्जनायाः शाब्दत्वं वक्तुं शक्यते नान्यथा । न चाभिधामूलव्यञ्जनायाः पर्यायपरिवृत्तिस्थलेऽपि पूर्वं वक्तव्यतया कथं तत्र शाब्दत्वम् इति वाच्यम् ? तस्य नियन्त्रितार्थधीजनकत्वातिरिक्तस्थले विशेषतोऽसंलक्ष्यक्रमव्यङ्ग्यस्थले एव स्वीक्रियमाणत्वेनाऽदोषात् । किञ्च अविवक्षितो वाच्योऽभिधेयार्थो यत्रेत्य् अन्वर्थ-संज्ञयाऽभिधामूल-शाब्दी-व्यञ्जनायां केवलं वाच्यार्थ एवान्यपरो भवति । आर्थ्यां पुनः वाच्य-लक्ष्य-व्यङ्ग्यानां समेषाम् एवान्यपरत्व-प्रसिद्धतयाऽभिधामूलव्यञ्जनायाः शाब्दत्वं को नाम निवारयितुम् इष्टे ।

किञ्च—यत्र शब्द-प्रतीत्यनन्तरम् एव व्यङ्ग्यार्थ-प्रतीति र्यथा—

"चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीम्" इति शाकुन्तल-पद्ये हता इत्य् अत्र हन् प्रकृत्या दुखातिशयस्य व्यञ्जनम् तथा "तत्रैव मुहुरङ्गुलिसंवृता-धरोष्ठमित्यादि" पद्ये तु इति निपातस्यानुतापव्यञ्जनं शाब्दी व्यञ्जनाम् अन्तरोपपादयितुम् अशक्यम् एव । किं बहुना–'न्यक्कारो ह्ययमेव मे यदरयःइति प्रसिद्ध-पद्ये "अरयः" इति बहुवचनस्य तापसः इत्येकवचनस्य अत्रैव इति निपातस्य 'जीवति' इत्यत्र तिङः ग्रामटिका इत्यत्र कप्रत्ययस्येत्येवं भूयसां शब्दानां वर्णरूपाणां रावण-निष्ठनिर्वेदादिव्यञ्जकत्वं कथम् इवापलपितुं शक्यते । नो चेद् अत्र शाब्दीव्यञ्जनायाः कृते कोनु विप्रतिपद्येत ।

यदपि— शब्द-शक्तिमूलक-ध्वनि-विषये उच्यते यत् सा तत्रैव जायते यत्राऽनेकार्थकाः शब्दाः प्रयुज्यन्ते। तादृशस्थले अभिधाया एकत्रार्थे नियन्त्रणात् द्वितीयार्थोपस्थापने तदशक्तेः। अतो द्वितीयार्थस्य प्रतीतिर् व्यञ्जनयैव। स च व्यङ्ग्यो वस्तुरूपोऽलंकाररूपो वा संभवेत्। ध्वनिकारमते पुनर् अयं विशेषो यद वस्तुना सह अलंकारोऽपि शब्दशक्त्या प्रकाशते। यत्र तु नैवं तत्र न शब्दशक्तिमूलकध्वनेः सम्भवः।

अत्रेदं वक्तव्यम्— वस्तुना सह अलंकार-व्यञ्जन-स्थले शब्दशक्तिमूलो ध्वनिः न स्वीकृतो ध्वन्यालोककारेणाऽपि तु केवलम् अलंकारव्यञ्जनस्थले एव शब्दशक्तिमूलो ध्वनिः। वस्तुद्वये च प्रतीयमाने श्लेष इति ध्वनिकारः। उक्तञ्च तेनैव—

> आक्षिप्त एवालंकारः शब्दशक्त्या प्रकाशते।
> यस्मिन्ननुक्तः शब्देन शब्दशक्त्युद्भवो हि सः॥[1]

यथा— "अत्रान्तरे कुसुमसमययुगमुपसंहरन्नजृम्भत ग्रीष्माभिधानः फुल्लमल्लिकाधवलाट्टहासो महाकालः।[2]

अत्र ऋतुवर्णन-प्रकरणेन ग्रीष्म-पक्षीयेऽर्थेऽभिधायां नियमितायां शिवपक्षीयोऽर्थस् तेन सह ग्रीष्मस्योपमानोपमेयभावसम्बन्धप्रयुक्तोपमा चाभिधामूलव्यञ्जनयैव प्रतीयते। एतेन ध्वन्यालोककारेण शब्दशक्तिमूलकध्वनिपदेन यत् मन्यते तत् श्लेषरूपालंकारेणालंकारान्तरव्यञ्जनस्योदाहरणम् इति कथनम् अपास्तम्। नह्य् अत्र श्लेषस्य विषयः। तत्र श्लिष्टपदैर् अनेकार्थस्याभिधयैव भानम्। अत्र त्व् अप्राकरणिकस्याभिधामूलव्यञ्जनयेति भेदस्य जागरूकत्वात्। किञ्च-यद्येतादृशस्थलेऽलंकारव्यञ्जको द्वितीयार्थोवाच्यो न मन्यते तदाद्वितीयार्थवस्त्वलंकारव्यञ्जनाया उदाहरणम् इदम्। उभयार्थेऽपीदम् अर्थशक्तिमूलकध्वनि-क्षेत्रेऽन्तर्भवति। अतोऽस्य शब्दशक्तिमूलकध्वनि-कथनं नूनं भ्रम इत्य् अपि कथनं भ्रान्तिमात्रम् एव। नह्य् अत्रार्थ-शक्तिमूल-ध्वनेर् अवसरः। न हि महाकालादिशब्दाः पर्यायपरिवर्तनं क्षमन्ते। न वा वक्तृबोधव्यकाक्वादिवैशिष्ट्यात् वाच्य-लक्ष्य-व्यङ्ग्याद्यन्यतरार्थस्यार्थान्तरव्यञ्जकत्वं, येनार्थी व्यञ्जनात्वम् अभ्युपगन्तुं शक्येताऽपि।

अभिनवगुप्तपादास् त्व्-अत्र विषये ध्वनिकाराद् विभिन्नम् एवाऽमनन्ति। तन्-मते अनेकार्थकशब्दस्थले प्रकरणादिवशाद् अभिधाया एकस्मिन्न् अर्थे नियन्त्रणे जाते द्वितीयार्थप्रतीतिर् अभिधामूलव्यञ्जनया। स चार्थः स्वातन्त्र्येण क्वचित्

1. ध्वन्यालोके पृष्ठे 235।
2. तत्रैव पृष्ठे 235।

वस्तुरूपः, क्वचिच्चालंकाररूपः । अत एवोक्तम् अपि—

अलंकारोऽथ वस्तु वा शब्दाद्यत्रावभासते ।
प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ॥[1]

परवर्तिभिः दर्पणकारादिभिश् चेदम् एव मतं गृहीतम् । अभिनवगुप्तपादैश् च ध्वन्यालोकलोचन अभिधामूलव्यञ्जनाविषये चत्वारिमतान्य् उपक्षिप्तानि । तत्र प्रथमं यथा—

"एतेषां शब्दानां पूर्वमर्थान्तरेऽभिधान्तरं दृष्टं ततस्तथाविधाऽर्थान्तरे दृष्टतदभिधाशक्तेरेव प्रतिपत्तुर्नियंत्रिताभिधाकेभ्य एतेभ्यः प्रतिपत्तिर्ध्वननव्यापाराद् एवेति शब्दशक्तिमूलत्वं व्यङ्ग्यत्वं चेत्यविरुद्धम्" ।[2] अयं भावःनानार्थक-शब्दानां तत्-तद्-अर्था गृहीत-संकेतैर् एव पुरुषैः ज्ञातपूर्वा भवन्ति, नागृहीतशक्तिकैः । पश्चाच् च कुत्रचिद् अभिधानियामकैर् नियंत्रितायाम् अभिधायां दृष्टतदभिधाशक्तेर् एव प्रतिपत्तुर् अप्राकरणिकस्याऽर्थस्य बोधः । स च नाभिधया, तस्या नियन्त्रणात् । तस्माद् ध्वननम् एव तत्र व्यापारान्तरम् इति शब्दशक्तिमूलकव्यङ्ग्यत्वं तत्र, शब्दस्य पर्यायपरिवृत्यसहत्वात् । इदम् एव मतं काव्यप्रकाशकारादि-स्वीकृतम् इति प्रकाशतो विज्ञेयम् ।

अत्र केचित्— यदि वस्तुतो द्वितीयार्थो व्यङ्ग्यार्थो भवेत् तदा स न केवलं तेषाम् एव प्रतीयेत येषां द्वितीयार्थेऽपि संकेतग्रहः स्यात् । व्यञ्जना-व्यापारेणार्थ-प्रतीतौ संकेत-ग्रहस्याऽनावश्यकत्वात् । अतो द्वितीयार्थे संकेत-ग्रहविरहितस्य आवश्यकी व्यङ्ग्य-प्रतीतिर् यतो न भवति इति न शक्यते वक्तुं द्वितीयार्थस्य व्यङ्-ग्यत्वम् इति ।

अत्रोच्यते— व्यङ्ग्यार्थ-प्रतीतौ संकेत-ग्रहस्याऽनावश्यकत्वं तत्र भवति यत्र न भवेयुर् अनेकार्थकाः शब्दाः । यथा 'गतोऽस्तमर्कः; शून्यं वासगृहम् इत्यादौ च । तत्र तत्राऽभिधया वाक्यार्थ-बोधे वृत्ते सहृदयानां स्वस्ववासनानुसारं व्यङ्यार्थः प्रतीयते इति निश्चप्रचम् । यत्र पुनर् अनेकार्थकाः शब्दाः, नियन्त्रिता चाऽभिधा परार्थोपस्थापनेऽक्षमा तत्रागत्यागृहीत-संकेतस्यैवापरार्थवोधो व्यञ्जनया न त्व् अगृहीत-संकेतस्येति कथं खलु संशीतिलेशः । प्रकरणादीनां विशेष-स्मृतिहेतुत्वं चेदम् एव यत् ते अन्यतरार्थोपस्थापिकाम् अभिधाम् अवरुध्य केवलं प्राकरणिकम् एवार्थम् उपस्थापयन्ति । अन्यथा प्राकरणिकाप्राकरणिकयोर् एककालाधिकरण्यं कथम् इव वार्यताम् । यतो नास्ति तयोः सामानाधिकरण्यम् इति व्यञ्जनम् एव तत्रार्थान्तरोपस्थापकम् इति निर्विवादम् ।

---

1. काव्यप्रकाशः ।
2. ध्वन्यालोकः सं पट्टाभिरामशास्त्री पृष्ठे 241 ।

द्वितीयं मतम्— 'साभिधैव द्वितीया अर्थसामर्थ्यं ग्रीष्मस्य, भीषणदेवता-विशेषसादृश्यात्मकं सहकारित्वेन यतोऽवलम्बते ततो ध्वननव्यापार रूपोच्यते।[1] अस्येदं तात्पर्यं— गृहीतपूर्वा द्वितीयार्था अभिधैव ध्वननव्यापाररूपोच्यते। परम् इयान् विशेषो यत् प्रथमाभिधा संकेतमात्रसहाया प्राकरणिकार्थप्रत्यायिका। इयं त्व् अप्रस्तुतार्थबोधिका संकेत-ग्रहणातिरिक्तम् अर्थसामर्थ्यादिकं सहकारित्वेनापेक्षते इति द्वितीयाऽभिधैव साहाय्यान्तरेण बोधिकौपचारिकी व्यञ्जनेति तथ्यम्। अभिधादयो व्यापारा अर्थबोधानुकूल-शक्तिविशेष-रूपाः सन्ति। सहकारिभेदेनैवैषां भेदः सम्पद्यते। कुसुम-समययुगम् इत्युदाहरणे महाकालादिशब्दा अभिधया प्राकरणिकग्रीष्मर्तुरूपम् अर्थम् अभिदधति। ततः शिवापरपर्यायस्य महाकालस्य बोधिकाभिधा ग्रीष्ममहाकालयोर् उपमानोपमेयभावं प्रकाशयितुं प्रवर्तते इति तस्या औपचारिकं नाम व्यञ्जना। परं मतम् इदम् अत एव शिथिल-प्रायं यद् अत्र भविष्यति व्यज्यमानोऽलंकारोऽभिधायाः सहकारिरूपेणागृहीतो यश्चाऽप्राकरणि-कार्थप्रतीतिफलीभूतोऽस्ति। न च कार्यताम् अङ्गीकृतस्य स्वोत्पत्तौ कारणता क्वचित् दृष्टा श्रुता वा। अत्र मते वस्तुना सहालंकारव्यञ्जनाप्य् अभिमतेति हृदयम्

तृतीयं मतम्— एके तु शब्द-श्लेषे तावद् भेदे सति शब्दस्य, अर्थश्लेषेऽपि शक्ति-भेदात् शब्दभेद इति दर्शने द्वितीयः शब्दस् तत्रानीयते। स च कदाचिद् अभिधाव्यापाराद्। यथोभयोर् उत्तरदानाय श्वेतोधावतीति प्रश्नोत्तरादौ वा तत्र वाच्यालंकारता। यत्र तु ध्वनन-व्यापाराद् एव शब्द आनीतस् तत्र शब्दान्तरबलाद् अपि तद् अर्थान्तरे प्रतिपन्नं प्रतीयमानमूलत्वात् प्रतीयमानम् एव युक्तम्। अत्रायम् अभिसंधिः— अत्रैकप्रयत्नोच्चार्यतयाऽभिन्नत्वेनाऽनुभूयमानभिन्नार्थक-सदृशनाना-शब्दत्वं तत्र श्लेष इति लक्षण-लक्षितस्य श्लेषस्य शाब्दे भेदे यथा भिन्नार्थ-प्रतिपादकं शब्द-द्वयं, तथैव अर्थश्लेषेऽपि तत्तदर्थबोधानुकूल-शक्ति-भेदात् शब्दभेद इति स्वीक्रियते। तत्र पदार्थ-द्वयेऽपि प्रकरणादिकम् अवतरति तत्रार्थद्वयम् अभिधेयम् एव भवति। को धावति? कीदृशं च तदीयं रूपम् इति प्रश्ने प्रोच्यते श्वेतो धावतीति। अत्र श्वेत-पदे सन्धिविच्छेद-द्वारा श्वा इतो धावतीति प्रथमस्यो-त्तररूपेण तथा श्वेतो धावतीति द्वितीयस्य उत्तररूपेण गृह्यते। अत्रोभाव् अप्य् अर्थौ प्राकरणिकौ। इयं व्यवस्थाऽविशेषेण शब्दार्थयोर् उभयोर् अपि श्लेषयोः कृतेऽवतिष्ठते। यत्र पुनः प्रकरणादिवशात् अभिधाया एकत्रार्थे नियमनं भवति तत्र परिकल्प्यमानोऽपि द्वितीयः शब्दो नाभिधया अप्राकरणिकम् अर्थं प्रत्याययति, अपि तु व्यञ्जनाव्यापारेणैवेति ध्वननात् प्रतीयमानो गम्यमानः शब्दो मूलं यस्य

1. ध्वन्यालोक:, सं. पट्टाभिरामशास्त्री पृष्ठे 242।

1. ध्वन्यालोकलोचनम्, पट्टाभिरामशास्त्रि-सम्पादित पृष्ठे 243।

तत्त्वात् अपरोऽर्थः प्रतीयमान एव। अत्र मते इदम् एव वैशिष्ट्यं यत् द्वितीयार्थ-बुभुत्सयाऽपरः शब्दः कल्प्यते। अन्यत् सर्वं प्रथममततुल्यम् एव। अत्रापि वस्तुना-सहालंकारध्वननम् अतिनिगूहितोऽर्थः। अस्तु यद् वा तद् वा, किन्तु व्यञ्जना त्व् अत्र शाब्दी एवेति नाऽत्र विसंवादः। श्वेत-शब्दस्य पर्याय-परिवृत्यसहत्वात्। एतेन व्यञ्जना सर्वत्र आर्थी एव भवतीति कथनं पराकृतम् एव वेदनीयम्।

अत्र चतुर्थं मतम्— द्वितीय-पक्ष-व्याख्याने यदर्थसामर्थ्यं तेन द्वितीयाभिधैव प्रतिप्रसूयते। ततो द्वितीयोऽर्थोऽभिधीयत एव, न ध्वन्यते। तदनन्तरं तु तस्य द्वितीयार्थस्य प्रतिपन्नस्य प्रथमार्थेन प्राकरणिकेन साकं या रूपणा सा तावद् भवत्येव न चान्यतः शब्दाद् इति सा ध्वनन-व्यापारात्। तत्राभिधाशक्तेः कस्याप्य् अनाशंकनीयत्वात्। तस्यां च द्वितीया शब्दशक्तिर्मूलं तया विना रूपणाया अनु-त्थानात्[1]।

अत्रेदं रहस्यम्—अस्य मतस्यानुसारं द्वितीयमते अर्थ-सामर्थ्यरूपसहकारितया अपरार्थ-बोधिका अभिधा औपचारिकी व्यञ्जनेत्य् उक्तम्। तत्र वस्तुतः सा अभिधैव न तु व्यञ्जना। ततश् च शब्दस्य येषु येषु अर्थेषु संकेतो गृहीतस् ते सर्वेऽप्य् अर्था अभिधयैव बोध्यन्ते न तु व्यज्यन्ते। न च प्रकरणादिज्ञानं तदधीनं तात्पर्य-ज्ञानं वा परार्थोपस्थापने प्रतिबन्धकम् इति शक्यं वदितुम्। संस्कार-तदुद्-बोधकयोः सत्वे स्मृतेः प्रतिबन्धस्य क्वाप्यदृष्टत्वात्। अपरार्थोपस्थापक-सामग्रयाः पदज्ञानस्य सत्त्वेन तदुपस्थितेर् अप्य् औचित्यात्। अभिधयैव-द्वितीयार्थोपस्थितौ तस्य प्राकरणिकेनाऽर्थेन सह नूनं कश्चन सम्बन्धोऽङ्गीकार्योऽन्यथा असम्बद्धार्थाभिधा-यित्वं प्रसज्येतेति प्राकरणिकाऽप्राकरणिकयोर् अभेदारोपरूपणा एव व्यक्तिवेद्या। अयम् अभेदारोपः उपमादेर् अप्य् उपलक्षणम्। द्वितीयार्थोपस्थापिका शब्द-शक्तिर् एवात्र रूपकोपमाद्यलंकारध्वनौ मूलम् इति शब्द-शक्त्युत्थाभिधामूलोऽयं ध्वनिः।

इदम् एव मतं पण्डितराज-जगन्नाथेन स्वीकृतम्। उक्तं च तेन— "तस्मान्ना-नार्थस्याप्राकरणिकार्थे व्यञ्जनेति प्राचां सिद्धान्तः शिथिल एव। प्राकरणिकाऽप्राक-रणिकयोरर्थयोरुपमायां तु कदाचिद् स्यादपीत्यस्माकं प्रतिभाति इति।[2]

एवं प्रतिपादयताऽपि जगन्नाथेनोक्तं यद् नानार्थकशब्दस्थले शब्दशक्तिमूलक-व्यञ्जनोदाहरणाऽसंभवेऽप्य् अभिधावृत्तिविशेषभेदे योगरूढिस्थले 'रूढिर्योगा-पहारिणी'ति न्यायात् रूढ्यर्थस्यैव वाच्यवृत्या बोधो न तु योगार्थस्य। परन्तु तत्र

1. ध्वन्यालोकलोचनम् पृष्ठे 243।
2. रसगंगाधरः, प. मदनमोहनझा पृ. 32-41 द्वितीयमाननम्।

रूढ्यर्थ-प्रतीत्यनन्तरं योगार्थस्यापि प्रतीतिर् जायते । सा च व्यञ्जनयैवोपपादयितुं शक्यते नान्यथेति तादृशस्थलं शब्दशक्तिमूलकध्वनेर् निपुणम् उदाहरणम्। उक्तं च—

योगरूढस्य शब्दस्य योगे रूढ्या नियन्त्रिते ।
धियं योगस्पृशोऽर्थस्य या सूते व्यञ्जनैव सा ।।[1]

एतेन वस्तुतोऽत्रार्थी व्यञ्जनेति कथनम् अविचारितरमणीयम्। तद् इत्थं व्यञ्जना यथा अर्थव्यापारस् तथा शब्द-व्यापारोऽपीति न शक्यतेऽन्यथयितुं तथ्यम् इदं यत्न-सहस्रेणापि ।

1. रसगंगाधरः; प. मदनमोहनझा पृ. 32--41 द्वितीयमाननम् ।

रसस्य दार्शनिकभूमिका

यद्यपि रसशब्दो विभिन्नेषु शास्त्रेषु विभिन्नार्थेषु प्रयुक्तस्तथाप्यत्र वेद्यान्तर-स्पर्शशून्यः स्वप्रकाशानन्दस्वरूपोऽलौकिकः साहित्यशास्त्रीयो रसो विवेचनीयत्वे-नोपात्तः । एतादृशस्य विलक्षणलक्षणलक्षितस्यास्वादनादनतिरिक्तस्य रसस्य किमस्ति दार्शनिकं प्रेरणास्त्रोत इति इति जिज्ञासायां तत्त्वबुभुत्सया प्रस्तूयते समासतः ।

सन्ति हि वैचित्र्योपेतेऽत्र जगज्जाले ऐकान्तिकानि दुःखत्रयाणि यद्वशा-दकामं परिक्लान्तास्तातप्यमानाः प्राणिनो दुखं परिजिहासवः, आनन्दं कामयमाना-स्तदर्थं भृशं प्रयतमानाश्चावतरन्ति दृष्टिपथम् । तत्र भवति जिज्ञासा—कोऽयमानन्दः ? यदीया समीहा समुद्वेजयति प्राणिनः । यदर्थं नक्तंदिवमेकीकृत्य परितो बंभ्रम्यमाणा अपि नोपयान्ति परां शान्तिम् । तत्र न तावत् स्त्रीपुत्रधन-धान्ययानप्रासादाट्टालिका हर्म्योपवनोपलब्धिरेव सुखमिति शक्यते वक्तुम् । एतेषां फलान्तरेच्छाधीनेच्छाविषयत्वेन गौणत्वात्, निरतिशयानन्दरूपत्वाभावात् प्रातिकूल्यदशायां सुखवैपरीत्याच्च । दृश्यते हि स्त्रीपुत्रादौ तावदेव प्रेमा, यावद् वर्तेरन् तेऽनुकूलताम् । प्रतिकूलतामुपगतेषु तेषु वैरस्यं स्वाभाविकं, प्रत्यक्ष-सिद्धञ्च । एवञ्च यत्र कादाचित्कः स्नेहः कादाचित्कश्च द्वेषो नासौ सुखपदा-भिलाप्यो, न वा आनन्दपदाभिधेय एव भवितुमर्हति इति शक्यते वक्तुं निर्विवादम् । अत एव लोके सुखत्वेन व्यपदिश्यमानस्य वास्तविकसुखरूपत्वाभावेन, किं बहुना विनाशित्वेन दुखाधायकतया च "परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च सर्वमेव दुखं विवेकिनः" इति पतञ्जलिचरणाः प्रत्यपीपदन् ।

एवञ्चेत् कस्तावत् आनन्दपदार्थः ? इति जिज्ञासायां प्रोच्यते-यत्-अभिलषितपदार्थप्राप्तौ तृष्णायां क्षणिकप्रशान्तिमुपगतायां योऽसौ शान्ते स्वान्ते सुखस्याभासः पतति, तस्याभासस्य प्रतिबिम्बस्य वा निदानं बिम्बभूतः शुद्धान्त-रात्मा एवानन्दः । यथा सर्वाणि वस्तूनि आनन्दायैव प्रियाणि भवन्ति, आनन्दस्तु न कस्यापि कृते प्रियो भवति, तथैव सर्वाणि भूतानि आत्मनः कृते प्रियाणि भवन्ति, न तु आत्मा कस्यापि कृते प्रियोभवति । अत एव श्रूयते 'आत्मनस्तु कामाय सर्वं प्रियं भवतीति ।' एवञ्च तदभिन्नाभिन्नस्य तत्स्वरूपत्वमिति रीत्या आत्मनः, आनन्दस्य चैक्यं सुतरां सम्पद्यते । अर्थात् आत्मा एव आनन्दः, आनन्द एव चात्मा । 'आनन्दादेव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति,

आनन्दं प्रयन्ति, अभिसंविशन्ति' इति श्रुत्या सच्चिदानन्दस्वरूपस्य ब्रह्मणो विवर्त इदं जगदिति कृत्वा जागतिका विषया अपि सिन्धोर्बिन्दुरिव आनन्दांशस्वरूपा एव सन्ति ।

सर्वाधिष्ठानस्य परमानन्दस्वरूपस्य भगवतो रसरूपत्वं "रसो वै सः' 'रसं ह्येवायं लब्ध्वा आनन्दीभवति' 'एष एवानन्दयति' 'आनन्दं ब्रह्मणो विद्वान्' 'तस्यैवानन्दस्य मात्रामुपजीवन्ति" इत्यादिश्रुतिभिः प्रसिद्धमेव । अतएव लौकिकेष्वपि विषयेषु तस्यैव रसरूपस्य भगवत आंशिकी अभिव्यक्तिर्जायते । एवञ्चात्मस्वरूपघटकतया दुःखकालुष्याद्यसंसृष्टतया चात्मस्वरूपावगतिरेवानन्दोपलब्धिः, रसोपलब्धिर्वा वक्तुं युज्यत इत्यौपनिषदपथाध्वनीनाद्वैतविशिष्टाद्वैतशुद्धाद्वैतद्वैताद्वैतादिसम्प्रदायानुसारं सम्प्रतिपन्नम् । एषु मतेषु स्यान्नाम विवेचनपार्थक्यं, परन्तु आत्मनो नित्यत्वे आनन्दस्वरूपत्वे चैकमत्यमेवेति प्रथितमेव तत्त्वविदाम् । यद्यपि चार्वाकमते आत्मनोऽभावः बौद्धमते च तस्याशाश्वतिकता, जैनमते च स्याद्वादसरण्या आत्मनः कथञ्चिन्नित्यत्वेऽपि अनानन्दात्मतया तस्य रसरूपत्वं नोपपादयितुं शक्यम्, तथापि अखिलान् अपि इमान् पक्षान् पूर्वपक्षीयत्वेन निराकृत्य सुस्थिरेषु अद्वैतादिवादेषु तत्त्वं सूपपादितमिति निरतिशयानन्दस्वरूपस्य ब्रह्मणो रसरूपत्वे नास्ति मनागपि संशीतिलेशः ।

स चायं रसः प्राकृताप्राकृतभेदेन द्विविधः । यत्र प्राकृतकान्ताद्यवच्छिन्नविषयमवलम्ब्य रसाभिव्यक्तिः स प्राकृतो रसः । अप्राकृतभगवदालम्बनत्वाच्च भवति अप्राकृतो रसः । उक्तञ्च भगवता मधुसूदनसरस्वतीपादेन— "निखिलमपि विषयनिष्ठं प्रेमाणं भगवत्येव प्रतिष्ठापयतः सकलविषयविमुखमनसः कस्यचिद् महाभागस्य विगलितायां चित्तवृत्तौ सर्वसाधनफलभूतायां गृहीतायां भगवदाकाराकारितायां विभावानुभावव्यभिचारिसंयोगेन रसरूपतयाऽभिव्यक्तो भगवदाकारतारूपो रत्याख्यः स्थायिभावः परमानन्दसाक्षात्कारात्मकः प्रादुर्भवतीति ।

किञ्च— भगवान् परमानन्दः स्वरूपः स्वयमेव हि ।
मनोगतस्तदाकारो रसतामेति पुष्कलम् ।। भक्तिरसायनम् ।।

अयंभावः— विषयाकारतानिराकरणपूर्वकं चित्तस्य भगवदाकारता—सम्पादनमेव सर्वशास्त्रोद्देश्यम् । चित्तस्य भगवदाकारता स्वाभाविकी, चित्तकारणीभूतसूक्ष्मभूतकारणानिर्वचनीयविचित्रानेकशक्तिमन्मायाधिष्ठानस्य नित्यविभोः सर्वत्रानुस्यूतत्वात् । आकाशपूर्णतेव घटस्य । चित्तस्य विषयाकारता तु जलपूर्णतेव घटस्य कारणसाध्या । तथापि अन्याकारताविरोधिभगवदाकारतासम्पादने शास्त्राणां सार्थक्यं जायते ।

नचैवं वेदान्तशास्त्रेणैव सिद्धेरसशास्त्रप्रणयनं व्यर्थमेवेति वाच्यम् ? प्रयोजनभेदस्य प्रस्थानभेदप्रयोजकत्वेन ये संसारिणः सुकुमारमतयो विवधवासनावासितान्तः-

करणाः काव्यार्थानुशीलनपरायणा अपि परमपुरुषार्थपद्धतिपरिशीलनाऽपटवस्तान् 'असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते" इतिरीत्या प्रथमतः अप्राकृतरसे प्रवर्तयितुमशक्यतया गुडजिह्विकान्यायेन प्रथमं प्राकृतरसमास्वादयन्ति रसाचार्याः। यतो यावन्नानुभवपथगोचरीक्रियेत प्राकृतो रसस्तावदप्राकृतरसोपभोगसमीहैव कुतः समुदियात्। अतः प्राकृतरसमीमांसा सचेतसां चेतोऽवतारायाप्राकृतरसे महत्त्वपूर्णां भूमिकां निर्वाहयन्ती प्राथम्यमर्हति। अत उक्तं रससिद्धान्तप्रतिष्ठापनपरमाचार्यैः—"विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिरिति।"

इदमत्र तत्त्वम्—विविधवैचित्र्योपेतेऽत्र जगज्जालेऽनादिकालतोऽटाट्यां कुर्वतः प्राणिनो दृष्टिपथमवतरन्ति विभिन्नाः स्थितयः। स कदाचित् कुत्राप्यनुरज्यति, कुत्रापि कुप्यति, इतरत्रासूयति, विरज्यते चान्यत्र, बिभेति च कुतश्चित्। आपनीपद्यमानायामेतादृश्यां स्थितौ स्वभावात् कठिनात्मकं चित्तद्रव्यं द्रवत्वं प्रतिपद्यते तापकैर्विषयैर्योगे जतुवत्। लाक्षा हि स्वभावतः कठिना,तापकाग्निद्रव्यादिसमवधानाज् जलवत् द्रवीभावमापद्यते। तत्र च निक्षिप्तो रङ्गो लाक्षायाः सर्वांशे प्रविष्टः सन् यथा लाक्षां स्वाकारतामानयति, तथैव विषयसम्प्रयोगे द्रवावस्थापन्ने चेतसि वस्तुस्वरूपं प्रविष्टं सत् काठिन्यदशायामपि तत्र सूक्ष्मरूपेणावतिष्ठते। एवञ्च शीततेव तोयस्य, उष्णतेव दहनस्य, संचरिष्णुतेव पवनस्य अनादिकालात् द्रवच्चित्तप्रविष्टतत्तदिष्टानिष्टविषयकोटिसंकीर्णता चित्तस्य स्वाभाविकी। तत्र चान्तःकरणसंभिन्नाः सूक्ष्मविषया एव वासना भावभावनादिभिर्विभिन्नैः शब्दैरभिलप्यन्ते। तदुक्तम्—

> द्रुते चित्ते विनिक्षिप्तः स्वाकारो यस्तु वस्तुना।
> संस्कारवासनाभावभावनाशब्दभागसौ॥ भक्तिरसायनम्॥

मानवानामन्तःकरणेषु अवस्थिता इमा भावना एव काव्यक्षेत्रमवतीर्णाः रत्यादिस्थायिभावपदाभिधीयमानतामुपयान्ति। समुचितललितसन्निवेशचारुणा काव्येन समुपस्थाप्यमानेषु विभावादिषु, अभिनयादिप्रकारान्तरेण वा प्रत्यक्षीक्रियमाणेषु तेषु पुनः पुनरनुसन्धानात्मिकया काव्यार्थभावनया जायते तेषां साधारणीकरणं, भवति च सहृदयानामन्तःकरणस्य तदाकाराकारात्मिका चित्तवृत्तिरपि। चित्तवृत्त्यानयाविषयीक्रियते विषयावच्छिन्नं चैतन्यमेव। पश्चाच्च विभावादिभिः सम्भूय प्रादुर्भावितेनालौकिकेन व्यापारेणानन्दांशतिरोधायकेऽज्ञानावरणेऽपाकृते सति द्रवावस्थापन्नायामन्तःकरणवृत्तावुपारूढं विषयावच्छिन्नचैतन्यमेव पूर्वं भावरूपतामापद्य विगलितवेद्यान्तरसम्पर्कशून्येनानन्दस्वरूपेण वृत्त्यनवच्छिन्नप्रमातृचैतन्येन सहैकीभावमापद्यते। एकीभावमापन्नयोरनयोः वृत्त्यवच्छिन्नानवच्छिन्नचैतन्ययोराभासेन स्फुरितोऽथवा तेनैव सहास्वाद्यतां नीयमानो रत्यादिस्थायिभाव एव रसतामञ्चति। तदुक्तम्—

> "व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः।" इति।

अत्र व्यक्त इत्यस्यार्थो व्यक्तिविषयीकृतः। व्यक्तिश्च भग्नावरणा चित् तदास्वादौपयिकभूतव्यञ्जनव्यतिरिक्ता। स च रसश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः काव्यार्थमात्रसंभेदादात्मानन्दसमुद्भवः। चर्वणा चानन्दांशाभिव्यक्तिः। लौकिकज्ञानान्तरं तु न तथा, तत्रावरणभंगस्य वक्तुमशक्यत्वात्। अन्यो हि मोदकस्यास्वादोऽन्यश्च प्रत्ययो रसस्य। अतोऽयमतिरिच्यते लौकिकविषयास्वादात् लौकिकसुखसाक्षात्कारे रजस्तमसोरनभिभवात् तत्र सुखदुःखभानं नैसर्गिकम्। काव्यरसास्वादे तु रजस्तमसोः निगीर्णतया सुखास्वाद एव केवलमिति विशेषः। तदुक्तं पण्डितराजेन— "आनन्दो ह्ययं न लौकिकसुखान्तरसाधारणः अनन्तःकरणवृत्तित्वात्। अस्यायं भावः— घटादिलौकिकविषयप्रत्यक्षस्थले इन्द्रियप्रणालिकया बहिर्गतस्यान्तःकरणस्य विषयाकारता सम्पद्यते। विषयाकारेण परिणतमप्यन्तःकरणं शरीराभ्यन्तरे वर्तमानं सत् शरीरविषययोर्मध्ये मानमिवावतिष्ठते। अयं दण्डायमानो मध्यभागो वृत्तिज्ञानमित्युच्यते। एतत् भागत्रयावच्छिन्नेऽन्तःकरणे अतिस्वच्छकाचोपरि सौरप्रकाश इव आत्मचैतन्याभासः पतति। अत्र नेदं विस्मर्तव्यं यदत्रौपाधिकं चैतन्यद्वयं वर्तते। एकन्तु अन्तःकरणावच्छिन्नं प्रमातृचैतन्यम्, अपरञ्च विषयावच्छिन्नं चैतन्यम्। अनयोश्चैतन्ययोर्वृत्तिज्ञानद्वारा ऐक्यं सम्पद्यते। यथा घटमठयोः सम्मेलने घटाकाशमठाकाशयोरेकीभवनं सम्पद्यते, तथैव विषयप्रदेशे इन्द्रियप्रणालिकया गतेऽन्तःकरणे विषयान्तःकरणयोरुपाध्योरेकत्रीभवने अन्तःकरणावच्छिन्नचैतन्यं विषयावच्छिन्नचैतन्यञ्चैक्यमापद्यते एव। ततश्च विषयावच्छिन्नचैतन्येऽध्यस्ता विषयाः, विषयावच्छिन्नचैतन्याभिन्नान्तःकरणावच्छिन्नप्रमातृचैतन्येप्यध्यस्ता भवन्ति। अत एव प्रमातृचैतन्यद्वारा भवति विषयस्यापरोक्षज्ञानम्।

लौकिकसुखादिविषयाणां प्रत्यक्षे उपर्युक्तप्रक्रियाया नान्तरीयकतया तत्रान्तःकरणवृत्त्यवच्छिन्नचिद्रूपता स्वयं सिद्धा। रसरूपानन्दस्तु शुद्धचैतन्यस्वरूपः। तदीयानुभवे तु चित्तवृत्तिरानन्दरूपतयैव परिणमते। नात्रान्तःकरणरूपमवच्छेदकमवतिष्ठते इति निरवच्छिन्नतया रसरूपानन्दस्यानन्तःकरणवृत्तिरूपत्वमुक्तम्। रज्जौ सर्पाध्यास इव, चेतने ब्रह्मणि प्रपञ्चस्याध्यासो वर्तते। तेनैव चेतनेन भवति प्रकाशः प्रपञ्चस्य। परन्तु चैतन्यं तत् आवृतमविद्यया। अतोऽज्ञानावरणमपाकर्त्तुं यथा भवत्यावश्यकता श्रवणमननादीनां तथैव काव्यक्षेत्रे साधारणीकृतविभावादिभिरुत्पादितेन भावकत्वापरपर्यायेणालौकिकव्यापारेण व्यञ्जनध्वननप्रत्यायनादिशब्दव्यवहार्येणापाकृत्याज्ञानावरणं रसश्चर्व्यते। अतएव भग्नावरणचिद्विशिष्टस्य स्थायिनः, स्थायिविशिष्टभग्नावरणचैतन्यस्य वा रसत्वं प्रत्यपीपदत् पण्डितराजो जगन्नाथः।

इदमत्र तत्त्वम्— अनावृतात्मचैतन्यप्रकाशितः स्थायिभावो रसः। यद्यपि वासनारूपतया स्थितस्य स्थायिनश्चैतन्यभास्यत्वमयोग्यतया न संभवति, तथापि

विभावादिसमवधाने सूक्ष्मरूपस्य तस्य स्थूलरूपत्वं भवतीति कल्पनीयम् । अतएव व्यक्तो दध्यादिन्यायेन रूपान्तरं परिणत इत्यवोचत् दर्पणकारो विश्वनाथः । यथा शरावादिना पिहितो दीपोऽपसारिते आवरणे स्वभासा घटपटादीन् प्रकाशयति स्वयं च प्रकाशते, एवमात्मचैतन्यमपगतेऽज्ञानावरणे विभावादिसम्बद्धान् रत्यादि-स्थायिभावान् चर्वणागोचरीकुर्वन् स्वयं चास्वादविषयो भवति । न च रत्यादि-स्थायिभावाः, अन्तःकरणधर्मत्वेन भासन्तां साक्षिभासा, किन्तु ये खलु विभावादयो-ऽनन्तःकरणधर्मास्ते कथं भासिष्यन्ते साक्षिणो भासा इति चेदत्रोच्यते— यथा स्वप्नदशायां प्रत्यक्षीक्रियमाणास्तुरगादयो बाह्यपदार्थाः कल्पनापोढास्तदानी-मिन्द्रियव्यापारविगमेऽपि साक्षादात्मना भास्यन्ते तथैव नायिकादयोऽपि बाह्यपदार्था भावनालम्बिताः साक्षादात्मभासा भास्या इति न कोऽपि विरोधः ।

नन्वेवमात्मचैतन्याभिन्नश्चेत् रसस्तदा तस्य नित्यत्वे निर्बाधे, उत्पन्नो रसः विनष्टो रसः इत्यादयो व्यवहाराः कथं सम्पाद्यन्तामिति चेदत्रोच्यते— रसस्य व्यञ्जिका विभावादिचर्वणा । सा च जायते आवरणभंगात् । एवञ्च चर्वणायाम्, आवरणभंगे चोत्पत्तिविनाशौ तु वर्तेत एव, तावेव रसे समारोप्य जायते उपर्युक्तो व्यवहारः । यथा वर्णानां नित्यत्वं व्याचक्षाणा वैयाकरणाः कण्ठताल्वादिव्यापार-गतमनित्यत्वं वर्णेष्वारोप्य उत्पन्नो गकारो विनष्टो गकार इति ब्रुवते । वस्तुतस्तु चर्वणा अपि रसानतिरिक्ता इति तत्राप्युत्पत्तिविनाशयोः प्रतिपादनमसाम्प्रतमेव तथापि घटादिकार्येषु दृष्टिं गतावुत्पत्तिविनाशौ कादाचित्कत्वसाधर्म्येण रसा-दिचर्वणायां समारोप्य पश्चात् तद्विषयतया रसेऽप्यारोप्येते इति इति न काप्य-नुपपत्तिः ।

अथवैवं वाच्यम्— भग्नावरणचिद्विशिष्टो रत्यादी रसः । किंवा— 'रसो वै सः' इति श्रुतिस्वारस्येन रत्याद्यवच्छिन्नभग्नावरणा चिदेव रसः, इति विशेष-णविशेष्यभावव्यत्यासमादाय "चित् स्थायी" चेति रसस्यांशद्वयम् । तत्र चिदंशमा-दाय रसस्य नित्यत्वं स्वप्रकाशत्वञ्चास्ति । रत्याद्यंशमादाय तु तस्यानित्यत्वमितर-भास्यत्वञ्च वेदनीयम् ।

इयं रसचर्वणा समाधावनुभूयमानपरब्रह्मास्वादात् विलक्षणा । तत्र चायं हेतुः— परब्रह्मास्वादो विषयासम्पृक्ततया विशुद्धब्रह्मविषयकः श्रवणमननाद्युपाय-साध्यश्च, रसास्वादस्तु विभावादिसम्बलितत्वात् विशिष्टरसविषयको व्यञ्जना-व्यापारवेद्यश्चेति विषयकारणयोः पार्थक्यम् । न चैवं "रसो वै सः, ब्रह्मैव रसः" इति श्रुतिविरोध इति वाच्यम् ? "आदित्यो यूपः" इत्यादाविवास्य प्रयोगस्य स्वीकारेणादोषात् । यथा आदित्यार्थं यूपा अपि आदित्यपदेनोच्यन्ते तथैवाप्राकृत-रसोपायभूतो लौकिकोऽपि रसः "रसो वै सः" इति श्रुत्योच्यत एव । सर्वेषां शास्त्राणां महातात्पर्ये परमात्मनि सच्चिदानन्दादिरसानन्दादिशब्दानां साक्षात्प्रवृत्ति-

सत्त्वेऽपि विषयविशेषेऽपि यथा प्रयुज्यते सत्ताशब्दः, चैतन्यशब्दश्च, तथैव रसानन्दादिशब्दानां विषयविशेषे प्रयोगे न काप्यनुपपत्तिः ।

'सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियमिति भगवदुक्तिमनुसृत्य समाधौ सुखोपलब्धिवत् 'रसं ह्येवायं लब्ध्वा आनन्दी भवतीति'-श्रुतिप्रामाण्यात् सकलविदग्धजनानुभवप्रामाण्याच्च रसचर्वणायामपि आनन्दोपलब्धौ नास्ति कश्चन प्रत्यवायः । इयं खलु या रसचर्वणा सा काव्यशब्दव्यापारभाव्यत्वात् शाब्दी, तथा प्रत्यक्षविषयीभूतं यत् सुखमानन्दात्मकं तदालम्बनत्वाच्चापरोक्षात्मिका च भवति । न चैवमेकत्र शाब्दत्वं प्रत्यक्षत्वं चेति ज्ञानद्वयं विरुद्धमिति वाच्यम् ? भवेन्नाम न्यायादिनये शाब्दत्वप्रत्यक्षत्वयोर्विरोधः, किन्तु वेदान्तनये यथा तत्त्वमसीति महावाक्याज्जायमानायां जीवब्रह्मैक्यप्रतीतौ शब्दजन्यत्वात् शाब्दत्वम्, अपरोक्षब्रह्मविषयकत्वाच्च प्रत्यक्षत्वं स्वीकृतं तथैव अत्रापि शाब्दत्वप्रत्यक्षत्वयोर्न विरोधः । न चैवं प्रपौत्रं प्रति (प्र) पितामहस्य घटं प्रति रासभस्य च कारणत्वं यथा नोपपद्यते अन्यथासिद्धत्वात्, तथैव काव्यशब्दस्यापि रसास्वादं प्रतीति वाच्यम् ? नहि घट इव रसः कार्यते, न वा प्रपौत्र इव रसोऽपि बाह्यसत्तासमाविष्टत्वेनोत्पाद्यते । चित्तवृत्तिविशेषस्य केवलं प्रतीतिपथगोचरीक्रियमाणस्य रसस्य काव्यनिष्ठोत्थापकतानिरूपितोत्थाप्यैकमात्रत्वात् । उत्थापकतोत्पादकतयोश्च दूरं विभेदसत्त्वेन दृष्टान्तदार्ष्टान्तिकभावस्यात्र शिथिलप्रायत्वात् । शब्दश्रुतेरनन्तरं जायमानबोधस्य शाब्दत्वे 'चैत्र पुत्रस्ते जातः' इत्यादौ हर्षशोकादीनामपि शाब्दत्वाशंकनं भ्रान्तिरेवास्थाने । उच्चारिते तस्मिन् वाक्ये जायमानश्चैत्रनिष्ठो बोधस्तु शाब्द एव । शाब्दज्ञानान्तरं तत्र जायमाना हर्षादयश्चेष्टादिलिंगैरनुमीयमानाः 'चैत्रः सहर्षः सशोकश्च मुखप्रसन्नतामुखमालिन्याभ्याम् । अत्र शाब्दं ज्ञानं चैत्रनिष्ठं प्रहर्षाद्यनुमितिस्तु अनुमातरि इत्याश्रयभेदाद्भिन्नयोर्ज्ञानयोरैक्यापादनं नातिरिच्यतेऽन्यदा काशकुसुमान्वेषणात् ।

स चायमलौकिकरसास्वादो विभावादिचर्वणाप्राणः, प्रपाणकरसन्यायेनास्वादपदवीं नीयमानः स्वप्रकाशात्मानन्दमहोदधौ संभिन्न इव ततः पार्थक्येनाननुभूयमानः ख्यापयति स्वकीयां सुखात्मकताम् । तदुक्तं श्रीमधुसूदनसरस्वतीपादैः—

> नित्यं सुखमभिव्यक्तं रसो वै स इति श्रुतेः ।
> प्रतीतिः स्वप्रकाशस्य निर्विकल्पसुखात्मिका ।।

न च एवं रसस्य स्वप्रकाशत्वे आवरणभंगादेवानन्दोपलब्ध्या रसं लब्ध्वा आनन्दी भवतीति कथनं व्यर्थमिति वाच्यम् ? अनवच्छिन्नचैतन्यस्यावरणभंगात् रसरूपतां गतेऽपि कान्तादितत्तदवच्छेदकगतदोषगुणानां सम्मिश्रणेनावरणभंगमात्रादेव न भवितुमर्हति आनन्दोपलब्धिरत आनन्दोपलब्धये रसोपलब्धेर्नान्तरीयकत्वं प्रत्यपीपदत् श्रुतिः । न चैवमपि रसं ह्येवायं लब्ध्वा आनन्दी भवतीति श्रुत्या अयंपदार्थ-

कर्तृकलाभकर्मैव रसपदेनोक्तम्। तत्र भग्नावरणचैतन्यमेवायंपदार्थः, स एव च कर्मापीति कर्तुः कर्मणश्चैक्यमेव सम्पन्नं, तच्च सर्वथैव विप्रतिषिद्धमिति वाच्यम् ? सावरणचैतन्यमयंपदार्थो, निरावरणचैतन्यञ्च कर्मपदार्थ इत्यौपाधिकभेदस्वीकारेणा-दोषात्। तथा च रससिन्धुबिन्दुस्थानीयः सोपाधिको जीवः रससिन्धुस्थानीयमनवच्छिन्नं परमात्मानमवाप्यानन्दीभवतीत्यर्थः सम्पद्यते। अत्रैव च एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति। एष एवानन्दयतीत्यादिश्रुतीनां महातात्पर्यमवतिष्ठते। इमां दार्शनिकपृष्ठभूमिमवलम्ब्य निरतिशयसुखोन्मुखीकरणपरायणमलंकारशास्त्रं जागतिकबिम्बानि विभावादिरूपेणोपकल्प्य, विभावानुभावव्यभिचारिसंयोगात् अभिव्यक्तः स्थायिभावः सभ्याभिनेयभेदमपाकृत्य सभ्येष्वेव तिष्ठन् परमानन्दसाक्षात्कारद्वारा रसस्वरूपतामञ्चतीति प्रतिपादयति। तदर्थञ्च हृदयसंवादापरपर्यायसहृदयत्वभावनयाऽपाकृत्य रजस्तमसी शुद्धसत्वोद्रेक एव सरणिरिति तत्त्वविदामाकूतम् इत्यलं पल्लवितेन।

रसस्य शाब्दत्वमीमांसा

अत्र शाब्दत्वोक्त्या वैवक्षिकः काव्यरसः। विवेच्यविषयोद्देश्यतावच्छेदकाक्रान्तत्वात्तद्विवेचनं नान्तरीयकतामापद्यते इति प्रस्तूयते पूर्वं कोऽसौ रस इति! विविधवैचित्र्योपेतेऽत्र जगज्जालेऽनादिकालतोऽटाट्यां कुर्वतः प्राणिनो दृष्टिपथमवतरन्ति विभिन्नाः परिस्थितयः। स कदाचित् कुत्राप्यनुरज्यति, अपरज्यत्यपरत्र, कुत्रापिकुप्यति, इतरत्रासूयति, विरज्यते चान्यत्र, बिभेति च कुतश्चित्। आपनीपद्यमानायामेतादृश्यां परिस्थितौ स्वभावात् कठिनात्मकं मानवानां चित्तद्रव्यं द्रवत्वं प्रतिपद्यते तापकैर्विषयैर्योगे जतुवत्। लाक्षा हि स्वभावतः कठिना, तापकाग्निद्रव्यादिसमवधानात् जलवत् द्रवीभावमापद्यते। तत्र च निक्षिप्तं रङ्गं यथा लाक्षायाः सर्वांशे प्रविष्टं सल्लाक्षां स्वाकारतामानयति तथैव विषयसम्प्रयोगात् द्रवावस्थापन्ने चेतसि वस्तुस्वरूपं प्रविष्टं सत् काठिन्यदशायामपि तत्र सूक्ष्मरूपेणावतिष्ठते। एवञ्च शीततेव तोयस्य उष्णतेव दहनस्य, संचरिष्णुतेव पवनस्य, अनादिकालात् द्रवच्चित्तप्रविष्टतत्तदिष्टानिष्टविषयकोटिसंकीर्णता चित्तस्य स्वाभाविकी। तत्र चान्तःकरणसंभिन्ना सूक्ष्मविषया एव वासनाभावभावनादिविभिन्नशब्दैरभिलप्यन्ते। तदुक्तम्—

> द्रुते चित्ते विनिक्षिप्तः स्वाकारो यस्तु वस्तुना।
> संस्कारवासनाभाव – भावनाशब्दभागसौ॥

भक्तिरसायनम् । 1.6

मानवानामन्तःकरणेष्ववस्थिता इमा भावना एव काव्यक्षेत्रमवतीर्णा रत्यादिस्थायिभावपदाभिधीयमानतामुपयान्ति। समुचितललितसन्निवेशचारुणा काव्येन समुपस्थाप्यमानेषु विभावादिषु प्रकारान्तरेण वा प्रत्यक्षीक्रियमाणेषु तेषु पुनः पुनरनुसन्धानात्मिकया काव्यार्थभावनया जायते तेषां साधारणीकरणम् भवति च सहृदयानामन्तःकरणस्य तदाकाराकारात्मिका चित्तवृत्तिरपि। चित्तवृत्त्यानया विषयीक्रियते विषयावच्छिन्नचैतन्यमेव। पश्चाच्च विभावादिभिः सम्भूय प्रादुर्भावितेनालौकिकेन व्यापारेणानन्दांशतिरोधायकेऽज्ञानावरणेऽपाकृते सति द्रवावस्थापन्नायामन्तःकरणवृत्तावुपारूढं विषयावच्छिन्नचैतन्यमेव पूर्वं भावरूपतामापद्य विगलितवेद्यान्तरसम्पर्कशून्येनानन्दस्वरूपेण वृत्त्यनवच्छिन्नचैतन्येन सहैकीभावमापद्यते। एकीभावमापन्नयोरनयोः वृत्त्यवच्छिन्नानवच्छिन्नचैतन्ययोराभासेन स्फुरि-

तोऽथवा तेनैव सहास्वाद्यतां वा नीयमानो रत्यादिस्थायिभाव एव रसतामञ्चति। तदुक्तम्—

व्यक्तः स तैं विभावाद्यैः स्थायी भावो रसः स्मृतः।

अत्र व्यक्त इत्यस्यार्थो व्यक्तिविषयीकृतः। व्यक्तिश्च भग्नावरणा चित् तदास्वादौपयिक-भूतव्यञ्जनव्यतिरिक्ता। स च रसश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः काव्यार्थमात्रसंभेदादात्मानन्दसमुद्भवः। चवर्णा चानन्दांशाभिव्यक्तिः। लौकिकज्ञानान्तरं तु न तथा तत्रावरणभंगस्य वक्तुमशक्यत्वात्। अन्यो हि मोदकस्यास्वादोऽन्यश्च प्रत्ययो रसस्य। अतोऽयमतिरिच्यते लौकिकविषयास्वादात्। लौकिकसुखसाक्षात्कारे रजस्तमसोरनभिभवात् तत्र सुखदुःखमोहात्मकं भानं नैसर्गिकम्। काव्यरसास्वादे तु रजस्तमसोः निगीर्णतया सुखास्वाद एव केवलमिति विशेषः।

अथ चैतस्य चर्व्यमाणतैकप्राणस्य रसस्यास्वादने किं कारणमिति चेत् काव्यनाट्यश्रवणदर्शन-महिम्ना सहृदयसामाजिकनिष्ठरत्यादेरुद्बोधनपुरःसरमास्वादनस्याभिमततया शब्द एव कारणमिति शक्यते वक्तुं निर्विवादम्। न चैवं प्रपौत्रं प्रति पितामहस्य कारणत्वं, घटं प्रति रासभस्य च कारणत्वं यथा नोपपद्यते ऽन्यथासिद्धत्वात्, तथैव काव्यशब्दस्याप्यन्यथासिद्धत्वमेव रसास्वादं प्रतीति वाच्यम्? नहि घटइव रसःसमुत्पाद्यते, न वा प्रपौत्रइव रसोऽपि बाह्यसत्तासमाविष्टत्वेनोत्पाद्यते। चित्तवृत्तिविशेषस्य केवलं प्रतीतिपथगोचरीक्रियमाणस्य रसस्य काव्यनिष्ठोत्थापकतानिरूपितोपस्थाप्यैकमात्रत्वात्। उत्थापकतोत्पादकतयोश्च दूरं विभेदसत्त्वेन दृष्टान्त-दार्ष्टान्तिकभावस्यात्र शिथिलप्रायत्वात्।

शब्दश्रुतेरनन्तरं यः खलु जायते बोधस्तस्य शाब्दत्वे न कस्यापि संशीतिलेशोऽपि। चैत्र पुत्रस्ते जात इति शब्दे समुच्चारिते सति चैत्रस्य यो बोधस्तस्य शाब्दत्वे नास्त्यवकाशो विपर्ययस्य। शाब्दज्ञानानन्तरं तत्र जायमाना प्रसन्नता शाब्दबोधफलीभूता चेष्टादिभिरनुमीयमानैव चैत्रः सहर्षः शाब्दबोधानन्तरं प्रसन्नमुखत्वेनोपलक्ष्यमाणत्वात्। अत्र शाब्दबोधः चैत्रनिष्ठः, प्रहर्षानुमितिस्तु अनुमातरि इत्याश्रयभेदाद्भिन्नयोर्ज्ञानयोरैक्यमापादयितुं कोऽयं शिथिलः क्रमः? रसस्थले च नैतादृशी स्थितिः। अत्र तु यस्य श्रोतुः काव्यशब्दात् विभावाद्यवगमस्तस्यैव पुनरनुसन्धानपरम्परया रसानुभूतिरपि। न चानुभूतिः शब्दवाच्या। मधुरादिपदार्थस्य माधुर्यमिव तस्याः शब्दावाच्यत्वमेवेति रसस्य शब्दोपस्थाप्यत्वेऽपि शब्दप्रतिपादनाविषयत्वमेव। देदीप्यतेऽत्र रौद्रः, विभ्राजते तत्र वीरः संलक्ष्यते तत्र शान्तः, इत्याद्युक्त्या न रस-संप्रत्यः काव्योपस्थाप्यतदभिव्यञ्जकविभावादिविरहस्यात्र तन्त्रत्वात्।

"अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते" इत्युक्त्या काव्यशब्दैः ज्ञायमानानां विभावादीनां शब्दानुविद्धताया नान्तरीयकतया प्रत्यक्षानुमानयोरप्युच्छेदभीतिः

मिथ्यैव । सर्वं ज्ञानं शब्दानुविद्धं न तु शब्दजन्यम् । अन्यद् हि शब्दनिरूपित-जन्यत्वम् अन्यच्च शब्दानुविद्धत्वम् । ज्ञाता च सर्वस्मिन्नपि ज्ञानेऽनुभवति शब्दम् । न चात्र प्रमाणाभावः, स्वानुभवस्यैवात्र प्रमाणायमानत्वात् । शब्दजन्यमेव ज्ञानं शाब्दम् । न च प्रत्यक्षानुमाने शब्दजन्ये । एवंस्थिते शब्दजन्यताशब्दानुविद्धतयो-रैक्यमवबुद्धय प्रत्यक्षानुमानयोरुच्छेदभीतिरसंगतैव । एतेन शब्दानुवेधपक्षे शब्दो-पस्थितार्थजन्येऽपि विषये शब्दजन्यत्वस्यैवोपगमेलाघवमिति कथनमपि पराकृतमेव वेदनीयम् ।

अलंकाराश्च स्वरूपतः शब्दार्थयोर्वर्त्तमाना रसाद्यभिव्यञ्जकविभावाद्युत्कर्षा-धायकाः कथं साक्षादुपकुर्वीरन् रसम् ? न चान्यस्योत्कर्षकोऽपरमप्यलंकुर्यात् साक्षात्सम्बन्धेनेति परम्परीणस्तेषां क्वाचित्कः सम्बन्धः रसेन । किञ्च शब्दानुवि-द्धतापक्षे शब्दबुद्धिकर्मणां तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वगाथापि नान्यथासिद्धा । शब्दानुविद्धानि ज्ञानानि तृतीयक्षणे नश्यन्ति चेत् किमपराद्धं तत्र शब्दानुविद्धतया । वस्तुतस्तु "इदानीं जानामि" इदानीमुच्चारिताः इत्यादिव्यवहारे अस्मदभिन्नकर्तृ-वृत्ति वर्तमानकालिकैतत्क्षणावच्छिन्नावरणभंगानुकूलो व्यापारः" इत्यर्थस्याभिम-ततया तथा "सोऽयं गकारः" इति प्रत्यभिज्ञायमानत्वेन च "शब्दबुद्धिकर्मणां क्षणिकत्वं वक्तुमशक्यम् ।

काव्यरसोद्बोधं प्रति काव्यशब्दस्य करणत्वे व्यञ्जनमेव व्यापारः । न चेदं व्यञ्जनं कुत्रापि श्रुतं दृष्टं वेत्युच्यते चेत्– विनष्टं निखिलं वैयञ्जनिकं विवरणं, विलुप्ता खलु प्रौढमर्यादा । यत्र श्रुता इतरेतराध्यासरूपतादात्म्यग्राह्या वाच्यवाचकभावापरपर्याया, संकेतितार्थबोधजनिका प्राथम्यमुपगता अभिधा, यत्र च श्रुता शक्यार्थातिरिक्तार्थबुबोधयिषया तात्स्थ्यात्, तत्सामीप्यात् तद्धर्म्यात् तत्साहचर्यादतस्मिन् तत्त्वसम्पादिका शक्यतावच्छेदकारोपरूपा लक्षणा, तत्रैव शास्त्रे निपातानां वाचकत्वद्योतकत्वविवदिषाप्रयोजिका मुख्यार्थ-सम्बद्धासम्बद्धप्रसिद्धा-प्रसिद्धार्थाभिव्यञ्जिका ध्वननद्योतनप्रत्यायनादिविभिन्नपदव्यपदेशविषया व्यञ्जनापि वर्तते परां ख्यातिमुपगता । "स्वायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयोक्ष्यामहे" इति नियमात् "गंगातटे घोषः" इत्यस्यैव प्रयोक्तव्ये "गंगायां घोषः" इत्याकारकः प्रयोगो घोषाधिकरणकशैत्यपावनत्व-प्रतिपिपादयिषयैव कृतः । न च शैत्यपावनत्व-मभिधावेद्यम्, तत्र गंगाशब्दस्यासंकेतितत्वात् । नापि लक्षणयाऽनुमानाद् वा व्यङ्ग्य-प्रत्ययः मुख्यार्थबाधाद्यभावे व्याप्त्याद्यप्रतिसन्धाने पक्षतोपरागं विना च तत्प्रतीतेः । किञ्च "अनुमिनोमि न साक्षात्करोमि" इत्यनुव्यवसायबलात् यथा प्रत्यक्षादनुमान-मतिरिच्यते तथैव "अनेनेदं नोक्तं नापि लक्षितं किन्तु व्यञ्जितमिति प्रतीत्या अभि-धालक्षणाभ्यामतिरिक्ता व्यञ्जना । सा च काव्यजीवातुभूतार्थबुभुत्सयोपास्यैवेति विकल्पातीतोऽर्थः ।

यदप्युच्यते--लक्षणारोपिता क्रिया। स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणेति मम्मटोक्त्या लक्षणाया मुख्यार्थवृत्तित्वं, तदाश्रितत्वाच्च व्यंजनाऽपि अर्थव्यापार एव न तु शब्दव्यापार इति। तत्र प्रोच्यते—सान्तरार्थनिष्ठ इत्यत्र निष्ठत्वं विषयत्वरूपम्। मुख्यार्थव्यवहितलक्ष्यार्थ-विषयकत्वादेव लक्षणात्मकः शब्दव्यापारः सान्तरार्थनिष्ठ इत्युच्यते। नैतावता तस्यार्थव्यापारत्वं साधयितुं शक्यम्। वस्तुतस्तु शक्यतावच्छेदकारोपद्वाराऽप्रसिद्धशक्त्याबोधस्थले लक्षणेतिव्यवहारस्य प्रथिततया तस्य शब्दव्यापारत्वे को नु सन्दिहीत। एवञ्च लक्षणाया निराकृतेऽर्थव्यापारत्वे अर्थव्यंजनया सह तस्याः साम्यप्रदर्शनं मुधैव। किञ्च—व्यंजनाया अभिधालक्षणोभयमूलतया लक्षणा अर्थव्यापार इत्यसत्पक्षमुररीकृत्य तस्या अर्थव्यापारप्रसाधनपरो व्यापारोऽप्यपार्थ एव। लक्षणाश्रयाया अर्थव्यापारत्वे, अभिधाश्रयायाः का गतिः? न च समुपेक्ष्या सेति वाच्यम्? हेतुमन्तरा समुपेक्षमाणत्वस्यासाध्यत्वात्। तस्माच्चिन्तनीय एवायं पन्थाः। तथा हि—अभिधावत् लक्षणापि शब्दव्यापार इति तदुभयमूलव्यंजनायाः शाब्दव्यंजनात्वम्। न ह्यत्रान्वयव्यतिरेकावुपयुज्येते तस्याः शब्दार्थगतत्वव्यवस्थापने। गंगायां घोषः "इत्यस्य स्थाने भागीरथ्यां घोषः" इत्युच्चार्यमाणेनापि शैत्यपावनत्वप्रतीतिः सर्वानुभवगोचरा पुष्णातीदमेव तथ्यम्। एवञ्च काव्यात्मकशब्दार्थावाम्रेडनेन भवति रसचर्वणा व्यङ्ग्यार्थप्रत्ययो वेति प्रयोजनसम्पत्तयेऽभिमतव्यापारस्य शब्दार्थगतत्वमेवादरणीयम्। तत्रापि मुख्यत्वं शब्दव्यापारत्वे, अर्थस्यापि शब्दायत्तस्थितिकत्वात्।

अर्थव्यंजनन्तु वक्त्रादिवैलक्षण्यप्रयोज्यमर्थस्यान्यार्थधीहेतुःप्रतिभाजुषाम्। काव्यवासनापरिपक्वबुद्धय एव वाच्यलक्ष्यव्यतिरिच्यमानमर्थमवबोद्धुं प्रभवः। प्रतिभाहीनाः काष्ठकुड्यकल्पाः पृथक्भूता व्यङ्ग्यार्थावधारणात्। न चैवं गङ्गायां घोषः "इत्यत्रापि तीररूपार्थप्रतीत्यनन्तरं शैत्यादेः प्रतीतेरत्राप्यर्थव्यंजनाक्रान्तत्वमाशंकनीयम्? प्रवाहसमवेतशैत्यादेरेव घोषे व्यंजनात्। तीरस्यापि आरोपितशक्यतावच्छेदकप्रकारकभानाभ्युपगमात्। न चार्थीव्यंजनायाः प्रतिभावतां प्रकरणज्ञानां कृते सुरक्षिततया स्वार्थानुमानादस्या भेदो नास्तीति शंक्यते चेर्तांह अस्थाने खल्वियं विप्रतिपत्तिः। न हि कोऽपि सचेताः गतोऽस्तमर्कः" इति शब्दं संश्रुत्य सान्ध्यो विधिरूपक्रम्यतामित्यर्थमनुमिनोति अपित्ववगच्छति। न चावगमनं व्यंजनादतिरिच्यते। प्रमाकरणं प्रमाणमिति व्युत्पत्त्या अनुमानस्य यथार्थज्ञानकरणत्वं न तु यथाकथञ्चिद् व्यवहारोपपादनं युक्तम्। अतस्तत्र सिषाधयिषाविरहविशिष्टसिद्धयभावाधिकरणे व्यापकवदन्यावृत्तित्वविशिष्टेन हेतुनानुमीयते किमपि तथ्यं प्रमेयात्मकम्। एतद्विपरीतमनुमानन्तु यात्युपहास्यताम्। लोकव्यवहारे कस्यापि विशिष्टं कृत्यं संदर्श्य यतो ह्ययमेतादृशः, अत एवंविध इति यत्किमप्यवबुध्यते तदपि नातिक्रमते सीमानं व्यंजनायाः। चेष्टाया अपि अर्थव्यंजनमध्ये परिगणित-

प्रायत्वात् । यद्येतादृशस्थलेऽनुमानमिति नामान्तरेण तोषस्तर्हि अलं रोषप्रदर्शनेन व्यंजनोपरि । किञ्च, नहि नापितोऽन्ध आरण्यको जन्तुविशेषो वा येनासावनुमानशरणीकरणमन्तरा केशकर्तनेन समं कर्णकर्तनमपि विदध्यात् । न हि प्रत्यक्षसिद्धे वस्तुनि अधिकारोऽनुमानस्य । किञ्चानुमानेन व्यजनां गतार्थयता शब्दस्यापि प्रामाण्यं विच्यावितमेव स्यात् । ग्रामं गच्छतीत्यत्र कर्मत्वं ग्रामनिष्ठं, ग्रामनिरूपिताकांक्षायोग्यतादिमत्पदस्मारितत्वादित्यनुमानेन शाब्दसमानाकारज्ञानसंभवात् । किञ्च अनुमानेन व्यंजनामन्यथासिद्धयितुमाग्रहो न मुञ्चति चेत् व्यंजनयैवानुमानस्य वैयर्थ्यं को नु दूरीकुर्यात् । व्यंजकानां यथाकथञ्चित् सत्ता व्यङ्ग्यबोधनक्षमा न तु अनुमानवद्व्याप्तिपक्षधर्मतोपसंहारप्रपञ्चस्याडम्बरो ऽपेक्ष्यतेऽत्रेति लाघवमपि । किंचैवं तद्बीजनकत्वस्यैव व्यंजनात्वमभ्युपेत्य लक्षणायाः कृतेऽपि दत्तांजलिरेव स्यात्। तस्मात् व्यक्तिव्यतिभेदे कुण्ठितोऽनुमानप्रहारः ।

यच्चोच्यते— विभावादीनां शब्दसमर्पितानां समूहालम्बनात्मकेन ज्ञानेन निराकृतेऽज्ञानावरणे यदिदमात्मचैतन्यं प्रकाशते, तत्र नहीयमलौकिकी काचित् व्यक्तिः अपि तु लौकिक्येव । अत्रेयमभिसन्धिः— नहीयं व्यक्तिर्लोकसाधारणी नहि घटादिवत् सिद्धः पूर्वतो रसः । अनुभवकालमात्रजीवनस्य घटेन सह साम्यस्याशक्यवक्तव्यत्वात् । व्यक्तश्चायं रसादिध्वन्यमानो दध्यादिन्यायेन न तु दीपेन पूर्वसिद्धः । न च दध्यादिन्यायेनाभिव्यक्तौ दधीव रसस्यापि चाक्षुषप्रत्यक्षत्वं स्यादित्युच्यते चेत् मानसप्रत्यक्षविषयस्य सुखदुःखादेश्चाक्षुषत्वं कथमिव वार्यते । चित्तवृत्तिविशेषो ऽमूर्तो रसः कथं स्थूलायितः स्यात् दधीव । सुखाद्युपलब्धिसाधनमिन्द्रियं मन एव न तु चक्षुरिति रसस्य चाक्षुषप्रत्यक्षाभिलाषा व्यामोहजनिता ।

अर्थव्यंजने वाच्यार्थस्य व्यंजकतायाम् "स्वरूपं प्रकाशयन्नेव परार्थविभासको व्यंजकः" इतिलक्षणलक्षितव्यंजकत्वं वाच्यार्थे निपुणतया सुस्थिरम् । स्वं प्रकाशयन् वाच्यार्थो व्यङ्ग्यार्थमपि पश्चात् प्रकाशयत्येव । न चैतादृशस्थले प्रकाश्यप्रकाशकयोः समानकालिकप्रतीतिरुचिता, अनुभवविरोधात् । लोकसिद्धं हि तयोः पौर्वापर्यम् । सहैव तयोर्भाने तु प्रकाश्यप्रकाशकभाव एव नोपपद्येत । वैपरीत्यमेव वा सम्पद्येत ।

अथ कोऽयं लौकिको रसः? मधुराम्ललवणादिभेदाद् भिन्नः ? किं वा लौकिकदुष्यन्तादिनिष्ठः शाकुन्तलदर्शनजो ऽपरपर्यायः प्रेम्णः ? न चैतत्कल्पः काव्यरसः, वेद्यान्तरसम्पर्कशून्यत्वेनानुभूयमानस्य तस्य विषयवासनासम्पृक्तेन क्षोदीयसा लौकिकमाधुर्येण सहैक्याभावात् । नाप्यनुकार्यदुष्यन्तादिगतलौकिकानन्दकल्पः काव्य-शब्दजानन्दः । तस्य परिमितत्वसान्तरायत्वलौकिकत्वसमानाधिकरणहेयोपादेयशंकातंकाकुलत्वेपि अस्य सर्वथैव युष्मदस्मद्प्रत्ययविरहितासामान्यदृशा सत्त्वोद्रेकविधिना साक्षात्क्रियमाणत्वात् । न च लौकिकरसास्वादे रजस्तमसोरनुद्रेकः,

न वा तत्र भग्नावरणचिद्भासाभासनम्। किं बहुना भोज्यभोजकयोः लौकिकयोः सम्प्रयोगात्तेषां क्षौद्रच दुर्निवार्यम्। शरावादिनिवृत्तौ दीपप्रयोज्याभिव्यक्तिकल्पाभिव्यक्तिरेव सम्मता। नैतावता लौकिकालौकिकयोः साम्यम्। एकत्र विषयसमवधानम्, अपरत्र तत्प्रतियोगिकात्यन्ताभावः। कथञ्च विषयविप्रयोगसमवधानेऽप्यानन्दाभिव्यजिका व्यक्तिः, विषयसम्प्रयोग कालिकाभिव्यंजकदीपाभिव्यक्तितुलामर्हेत्। अनुकूलविभावादिसमवधानात् द्रवावस्थापन्नायां तदाकाराकारितायां चित्तवृत्तौ विषयावच्छिन्नचैतन्यस्यैवांशिक्यभिव्यक्तिरिति लौकिकसंगीताभिनयशिल्पादिश्रवण–दर्शनस्थलेऽप्यलौकिक्येव व्यक्तिः केषाञ्चिदेव। सत्यज्ञानावरणे न शिल्पेन, न वा संगीतेन, न चाभिनयेन वानन्दाभिव्यक्तिः। एतेन रसास्वादोऽपि वस्तुतो लौकिकास्वादकल्प एव, सत्त्वोद्रेकस्य, संविद्विश्रान्तेः, प्रकाशानन्दसंभोगस्य चोभयत्राप्यभेदादित्येतत् सर्वं निराकृतम्।

वस्तुतस्तु रसो द्विविधः, प्राकृतोऽप्राकृतश्च। प्राकृतालम्बनत्वात् प्राकृतः काव्यरसः। अप्राकृतभगवदालम्बनत्वाच्चाप्राकृतो दिव्यरसः "रसो वै सः" इत्यादिश्रुत्या संलक्ष्यमाणः। एतद्व्यतिरिक्तः कोऽयं लौकिको रसः? भ्रमप्रमादविप्रलिप्सा भीतिचाञ्चल्यरागद्वेषादिपूर्णेन्द्रियविषयास्वाद एवाभिमतश्चेत् लौकिकरसपदेन, तर्हि विलुप्ता रसशास्त्रीयमर्यादा विनष्टा रसविवेचनसम्बन्ध्युच्चैस्तरीयसोपानपरम्परा। सिन्धोर्विन्दुरिवानन्दविवर्तभूतेषु क्षुद्रलौकिकविषयेषु जायतामांशिकी आनन्दाभिव्यक्तिः। नैतावता सा रसपदवीमधिरोढुं क्षमा। उत्कर्षापकर्षमात्रेण वस्तुभेदः सम्यगेव। न च काव्यरसस्योत्कर्षाधायकत्वे तेनैव तृप्तिसंभवे लौकिकरसे सामाजिकप्रवृत्तेरभाव इति शंक्यम्? विषमस्थले सर्वसाधारणविषयत्वात्। सन्ति कियन्तः काव्यरसस्पृहयालवः? तत्रापि कतिपये काव्यभावनाभावितात्मानः? अत एवोक्तम्—

पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्।

सत्त्वोद्रेक आयाससाध्यः! रजस्तमसी तु स्वभावसिद्धे। एवं स्थिते कथं विरज्येत लोको लौकिकविषयास्वादात्।

"न हि वीतरागो विपर्यस्तान् भावान् पश्यति, नह्यस्य वीणाक्वणितं काकरटित-कल्पं प्रतिभाति" इत्यानन्दोक्त्या विषयान् प्रति लोकसाधारण्यमिति प्रतिपादनमप्यसाम्प्रतम्। वीतरागेति अन्वर्थनामा रागद्वेषाद्यसम्पृक्तोऽनासक्त्या भुंङ्क्ते सर्वेन्द्रियविषयान्, न च तल्लीनः। सरागस्तु पुनरासक्त्या तल्लीनश्चेति न सार्वजनीनं विषयसाधारण्यम्। "सर्वेषां रसानां शान्तप्राय एवास्वादः" इत्यभिनव भारत्युक्ति पुरस्कृत्य सर्वरसानां शान्तप्राय एवास्वाद इत्यपि नालम्बते मनोग्राहिताम्। यतोहि—

स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।
पुनर्निमित्तापाये तु शान्त एव प्रलीयते॥

इत्यभिनवोक्तिद्वारा समेषां रसानामुत्पत्तिलयस्थानं शान्तम् । शान्तेऽन्तर्मनसि रसोद्रेकः, पर्यवसाने च पुनरसावेवस्थितिरिति आस्वादनकाले सर्वेषां रसानां पृथक् पृथगेव स्वकीयो भोगः । अतएव विभिन्नविभावादिकमुपपन्नं सर्वरसानाम् अन्यथा वैभिन्नच तेषां व्यर्थमेव स्यात् । अतएव विकासविस्तरक्षोभविक्षेपरूपा विभिन्नाश्चित्तभूमिकाः शृङ्गारवीरबीभत्सरौद्रेषु चतुरस्रतां बिभ्रति । तथ्यमप्येतत्—विषमतामूलं जगत् । सत्त्वरजस्तमांस्यनुस्यूतानि सर्वत्र । कथं तर्हि चित्तवृत्तिरैक्यरूप्यमियात् । प्रतिक्षणं भिद्यमानाश्चित्तवृत्तयस्तत्प्रयुक्तो रसास्वादोऽपि सुतरामेव भिन्न इति युक्ततरं काव्यरसस्य महनीयत्वमुपादेयत्वञ्च लोक वृत्तेभ्यस्तदास्वादेभ्यश्च ।

स चायं रसः काव्यसंस्कारवासितानां विभावादियोजनपटीयसां सहृदयसामाजिकानामेव जायते न तु अनुकार्ये तत्प्रत्ययस्तन्निष्ठरत्यादेर्लौकिकत्वाद्युपाध्युपहितत्वेन रसपदवीमनालिङ्गनात् । नाप्यनुकर्तरि रसोद्बोधः परचित्तानुरंजनपरायणस्य तस्य रसानुभूत्यवसरानुपलब्धेः । न चैवं सरसं काव्यमिति व्यवहारः कथमिति चेत्—उत्थापकतासम्बन्धेन तस्य तत्र वर्तनात् । सूक्ष्मातीतादिवस्तूनां सर्वेषामपि शब्दप्रतिपाद्यताया विद्यमानत्वात् तेषां काव्यविषयत्वं वज्रलेपायितम् । न च रसस्य काव्यनिष्ठत्वे तस्यानुकार्यनिष्ठत्वमपि स्यात्, काव्यार्थात्मनां रामादीनामिदानीमपि विद्यमानत्वादिति चेदत्रोच्यते—रामादयः काव्यार्था इतीदानीन्तनसत्ता तेषामिति रिक्तंवचः, सूक्ष्मातीताद्यर्थानामपि काव्यार्थतया प्रतिपादनात् । न चातीतं प्रत्यक्षविषय इदमभिलपितुं योग्यम् । न चातीत एव स्याद् रसः, तस्य पारमित्यादिहेतुना पूर्वमेव निराकरणात् । न चोत्थापकतया तत्र रसः, तस्य काथञ्चित्कत्वेऽपि तेषां रसाधिष्ठानत्वस्य खपुष्पायितत्वात् ।

एवञ्च काव्यनाट्यश्रवणदर्शनानन्तरं तद्वृत्तिव्यंजनया रसोऽभिव्यज्यते । काव्यञ्च शब्दार्थोभयात्मकम् । तयोरन्योन्याश्रितत्वेऽपि शब्दायत्तैवार्थोपस्थितिरिति काव्ये शब्दस्यैवोज्जृम्भणम् । शब्दार्थयोः ज्ञानात्मकत्वप्रतिपादनन्तु प्रमादमात्रम् । "अत्यन्तासत्यपि चार्थे ज्ञानं शब्दः करोति वै" इत्यभियुक्तोक्त्या प्रत्यक्षादिवत् प्रमाणकोटिमाटीकमानस्य तस्य ज्ञानजनकत्वात् । स चायं शब्दः सर्वत्रानुस्यूतोऽर्थक्रियासु समीहयति देहिनः । अयमेव नियामको लौकिकेतिकर्त्तव्यतायाः । अतो विचारात्मकानि निखिलजागतिकानि वस्तूनि वाचः परिधानं धृत्वैव लोकलोचनगोचरतामुपयान्ति । अतोऽस्ति तत्र काप्यनिर्वचनीया शक्तिः । तदुक्तम्—

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धिनी ।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ॥
इतिकर्त्तव्यतालोके सर्वाः शब्दव्यपाश्रयाः ।
यां पूर्वाहितसंस्कारो बालो ऽपि प्रतिपद्यते ॥ वाक्यपदीयम् ।

एतेन शब्द एको जडः पदार्थस्तत्र च न काचित् शक्तिरित्यादिसर्वं खल्वस्थाने कंठघोषः। तस्मादभिधालक्षणे इव व्यंजनापि शब्दव्यापारः। न केवलं शब्दे एवास्याः साम्राज्यमपितु प्रकृतिप्रत्ययतदेकदेशार्थचेष्टादयोऽप्यदसीयमेव क्षेत्रम्। अनयैवाभिव्यज्यते काव्यरस इति सुस्थिरं तस्य शाब्दत्वम्। तदनुभवप्रकारो वाचामगोचरः। नैतावता तस्य शाब्दत्वं वार्यते। अन्यत् खलु शब्दाख्येयत्वमन्यच्च शब्दाभिव्यङ्ग्यत्वमित्यलमतिप्रसक्त्या।

मम्मटीयोपमालक्षणविमर्शः

विच्छित्तिविशेषजनकतया अलंकाराणां काव्यशास्त्रेऽस्ति स्वकीया महनीयता। तत्र शब्दार्थगताः सन्ति भूयांसोऽलंकाराः सादृश्यमूलकाः। अनुप्रासे शब्दसादृश्यं ख्यातमेव। एवमेव स्मरणानन्वयसंदेहतुल्ययोगितादिषु सादृश्यस्य नान्तरीयकत्वमनपह्नवनीयमेवास्ते। नात्र चित्रं यत् सादृश्यमूलकालंकाराणामाधारशिला उपमैवेति। मम्मटात् प्राग्भाविनः पश्चाद्वर्तिनश्चालंकारशास्त्रिणो निपुणं लक्षणयाञ्चक्रुरुपमाम्। तद्यथा—

प्रसिद्धेरनुरोधेन यः परस्परमर्थयोः।
भूयोऽवयवसामान्ययोगः सेहोपमा मता ॥[1]
यथा कथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते।
उपमा नाम सा तस्याः प्रपञ्चोऽयं प्रदर्श्यते ॥[2]
उपमानोपमेययोः साधर्म्ये भेदाभेदतुल्यत्वे उपमा ॥[3]
उपमानोपमेयस्तु गुणलेशतः साम्यमुपमा ॥[4]
साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः ॥[5]
उपमा तत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ॥[6]
सादृश्यं सुन्दरं वाक्यार्थोपस्कारमुपमालंकृतिः ॥[7]

उपयुक्तेषूपमालक्षणेषु केवलम् अलंकारसर्वस्वकृतो रुय्यकस्य लक्षणमपहाय सर्वत्र सादृस्यस्यैवोपमात्वं प्रदर्शितम्। अर्थात् यत्रोपमानोमेययोश्चमत्कारजनकं सादृश्यमवतिष्ठते तत्रोपमालंकारः। सादृश्यञ्च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। तद्गतभूयोधर्मवत्त्वञ्च तद्गतभूयोधर्मसम्बन्धः। चन्द्रभिन्नत्वेसति चन्द्रगताह्लादकत्वादिमत्त्वेन मुखे चन्द्रसादृश्यम्। एवं गोभिन्नत्वे सति गोगतजाड्यसजातीयजाड्यवत्तया गवा सह वाहीकस्य सादृश्यम्। एवञ्च यस्य सम्बन्धो यत्र कुत्रापि प्रदीयते स प्रतियोगी, यत्र प्रदीयते सोऽनुयोगीति कृत्वा उपमानप्रतियोगिकः, उपमेयानुयोगिकः, सम्बन्धः सादृश्यं, तदेव च चमत्कारकं सद् उपमेति फलति। तेन "गौरिव गवयः" इत्यादौ नातिव्याप्तिः।

आचार्यो मम्मटः अलंकारसर्वस्वकारमनुसरन् "साधर्म्यमुपमा भेदे" इत्युपमां लक्षणयाञ्चकार। किञ्च तद्साधर्म्यमिति विवेचयता वामनीकारेणोक्तम्—

---

1. सरस्वतीकण्ठाभरणम् 2. काव्यादर्शे दण्डी 3. अलंकारसर्वस्वम् 4. काव्यालङ्कारे वामनः 5. साहित्यदर्पणम् 6. कुवलयानन्दे 7. रसगङ्गाधरे।

समानः एकः तुल्यो धर्मो गुणक्रियादिरूपो ययोस्तौ सधर्माणौ, तयोर्भावः साधर्म्यम्। उपमानोपमेययोः समानधर्मेण सह सम्बन्ध इत्यर्थः। कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेनेति नियमात् तथैव वक्तुंयुक्तत्वात्। वर्तते चात्र समासोत्तरं भावप्रत्ययः। काव्यप्रदीपोद्योतकारेणाप्येव मेव व्याख्यातम् साधर्म्य-साधारणधर्मवत्त्वम्। तच्च साधारणधर्मसम्बन्ध एव। एतावता प्रपञ्चेन सादृश्यसाधर्म्ययोरैक्यमेव सिद्ध्यति। परन्तु अग्रे साधर्म्यस्य सादृश्यप्रयोजकत्वमभिमन्यमानेन वामनीकारेणोच्यते— "एवञ्च सादृश्यप्रयोजकसाधारणधर्मसम्बन्धः उपमेति। साधारणधर्मदर्शनमन्तरा न युज्यते वक्तुं सादृश्यमिति तस्य तात्पर्यं प्रतिभाति। विस्तारिकायां परमानन्दचक्रवर्तिनाप्युक्तम् सादृश्यस्य प्रतियोगी उपमानम्, अनुयोगी चोपमेयम्, अस्य च साधर्म्यस्य उपमानमुपमेयमिति द्वावप्यनुयोगिनौ, प्रतियोगी च साधारणधर्मः। एवञ्च साधारणधर्मप्रतियोगिकः, उपमानोपमेयोभयानुयोगिकः सम्बन्धः साधर्म्यं तदेव चोपमा। इदञ्च साधर्म्यं सादृश्यप्रयोजकम्। नहि साधारणधर्मस्योभयत्र स्थितिमन्तरा सादृश्यमुपपादयितुं शक्यते। एवञ्च सादृश्यप्रयोजकसाधारणधर्मसम्बन्धः उपमा। सादृश्यञ्चातिरिक्तः पदार्थः।

अत्र विचार्यते— साधर्म्यसादृश्ययोः पार्थक्यमुररीकृत्य साधर्म्यस्य सादृश्यप्रयोजकत्वे स्वीक्रियमाणे तस्योपमानोपमेयोभयानुयोगिकत्वेन "आह्लादकत्ववती चन्द्रमुखे" इति वाक्यस्योपमात्वं प्रसज्येत। सम्बन्धश्चात्र समवायः। आह्लादकत्वस्य गुणत्वात्, गुणगुणिनोश्च समवायस्यैव क्लृप्तत्वात्। न च समवायस्योपमात्वं केनापि स्वीकृतम्। तस्मात् साधर्म्यसादृश्ययोः पार्थक्यं नैव वक्तुंयुक्तम्। वस्तुतस्तु—सादृश्यमपि तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमिति पूर्वमेवावोचम्। तद्गतभूयोधर्मवत्त्वं नाम तद्गतभूयोधर्मसम्बन्धः। साधर्म्यमपि साधारणधर्म एव। एवञ्चोभयोः पर्यायत्वमनायासेनैव वक्तुं सुकरम्। अतएवोभयत्र दृश्यते उपमानोपमेययोः समानधर्माधिकरणत्वम्। समानधर्माधिकरणत्वमेव सादृश्यं न तु समानधर्मसम्बन्धप्रयोज्यं तत्।

यदि च सादृश्यं भिन्नं साधर्म्यञ्च भिन्नमित्यभिप्रेयते तदा उपमायाः श्रौत्यार्थीविभागोऽपि अव्यवस्थित एव स्यात्। उक्तं हि—

श्रौती यथेव वा शब्दे इवार्थे वा वतिर्यदि।
आर्थी तुल्यसमानाद्या तुल्यार्थे यदि वा वतिः॥

श्रौती शब्दगम्या, शब्दस्याभिधया वाच्येत्यर्थः। आर्थी तु अर्थवशाल्लभ्या आक्षेपगम्येति यावत्। तत्र यथा, इव, व, इवार्थको वतिप्रत्ययश्च सादृश्ये शक्ताः सन्ति। तस्मात् एभिः शब्दैः सादृश्यमेवोच्यतेऽत एषां समवधाने उपमा श्रौती। तुल्यः, समानः, तुल्यार्थको वतिप्रत्ययश्च सादृश्यवति (सदृशे) व्यक्तिविशेषे पदार्थविशेषे वा शक्ताः सन्ति इति एषां समवधाने सादृश्यविशिष्टस्य पदार्थस्य

बोधः शाब्दः, सादृश्यप्रतीतिस्तु आर्थी । यदि न स्यात् अनयोः सादृश्यं तदा कथंकारमिमौ सदृशाविति प्रश्नस्य तत्र जागरूकतया सादृश्यस्यार्थत्वं सुतरां सिद्ध्यति ।

न च इवादिशब्दानां सादृश्यवाचकत्वे तुल्यादिशब्दानाञ्च सदृशवाचकत्वे विनिगमनाविरह इति वाच्यम् ? "चन्द्रतुल्यं मुखम्" "चन्द्र इव मुखम्" इत्युभयत्र जायमानबोधवैलक्षण्यस्यैवात्र मानत्वात् । चन्द्रतुल्यं मुखमित्यत्र चन्द्रसदृशाभिन्नं मुखमिति बोधः । अत्र निपातातिरिक्तयोः समानविभक्तिकयोर्नामार्थयोः परस्परमभेदान्वयः । चन्द्रइव मुखमित्यत्र तु चन्द्रप्रतियोगिकं यत् सादृश्यं तद्वत् (तदधिकरणम्) मुखमिति बोधः । अत्र इवार्थसादृश्यस्य मुखेन सह नाभेदान्वयः किन्तु अनुयोगितासम्बन्धेन, स्वनिष्ठाधेयतानिरूपिताधिकरणतारूपभेदसम्बन्धेन वा मुखेऽन्वयो भवति । एवञ्चोभयत्र विभिन्नार्थकत्वं स्पष्टमेव । तथा च यथेवादिशब्दानां साक्षात् सादृश्यसम्बन्धवाचकत्वेन तत्सद्भावे श्रौती उपमेति वक्तुंयुक्तम् । तुल्यसदृशसमादिशब्दानां सदृशादिसम्बन्धिवाचकत्वेन तेषां सद्भावे सम्बन्धिव्यवहितसम्बन्धप्रतीत्या सम्बन्धस्यार्थत्वमिति तत्रार्थी उपमा ।

साधर्म्यसादृश्ययोः भेदमङ्गीकृत्य श्रौत्यार्थीविभागः कृतो वामनीकारेण—यथेवादिशब्दानां सादृश्यप्रयोजकसाधारणधर्मसम्बन्धरूपे साधर्म्ये शक्ततया यथेवादिशब्दानां प्रयोगस्थले साधारणधर्मसम्बधरूपं साधर्म्यं वाच्यं, सादृश्यन्तु आर्थम्, इति श्रौती उपमा । तुल्यसदृशादिशब्दानां सादृश्यवति शक्त्या तेषां योगे सादृश्यं वाच्यम्, साधारणधर्मसम्बन्धरूपं साधर्म्यन्तु आर्थम् । यदि साधर्म्यं न स्यादुभयोस्तदा कथमिमौ सादृश्यवन्तौ इति ।

अत्र विमृश्यते । तुल्यशब्दस्य सादृश्यवति शक्तत्वं स्वीकृत्यापि तद्योगे सादृश्यं वाच्यमिति वदतो मते इवशब्दस्य तुल्यशब्दस्य चोभयोः सम्बन्धवाचकत्वं स्पष्टमेव सिद्ध्यति । एवञ्चोभयत्र सम्बन्धमेवाधारीकृत्य क्रियमाणः श्रौत्यार्थीविभागः कथं संगच्छताम् ? मम तु इवशब्दस्य सादृश्यरूपसम्बन्धवाचकत्वम्, तुल्यशब्दस्य च सदृशरूपसम्बन्धिवाचकत्वमिति सम्बन्धसम्बन्धिवाचकत्वप्रयुक्तमुभयोः पार्थक्यं संगच्छते । किञ्च यदि तुल्यपदसमभिव्याहारे सादृश्यं वाच्यं भवति, तदा सादृश्यस्य सम्बन्धत्वेन, सम्बन्धस्य चोभयनिष्ठत्वेन तेन तुल्यं मुखमित्यत्रोपमेये एव, तत्तुल्यमस्येत्यत्र उपमाने एव, इदञ्च, तच्च तुल्यमित्यत्र उभयत्रैव तुल्यादिशब्दानां विश्रान्तिरिति मम्मटोक्तं कथं संगच्छेत् । त्रिष्वपि उदाहरणेषु उपमानोपमेययोरुभयत्रैव तुल्यार्थस्य विश्रान्तेः ।

तुल्यशब्दः सम्बन्धिबोधक इति वदतां मतानुसारेण तु तेन तुल्यं मुखमित्यत्र मुखतुल्ययोः समानविभक्तिकतया सामानाधिकरण्येन मम्मटोक्तं साधु संगच्छते ।

अपरञ्च, साधर्म्यस्य सादृश्यभिन्नत्वे स्वीक्रियमाणे तथा इव यथा प्रभृतिशब्दानां तद्वाचकत्वे चाङ्गीकृते सति, इवादिपदघटितेषु चन्द्र इव मुखमित्याद्युपमावाक्येषु, तथा—

कलाधरस्येव कलावशिष्टा विलूनमूला लवलीलतेव ।
अशोकमूलं परिपूर्णशोका सा रामयोषा चिरमध्युवास ॥

इत्यादाविवादिपदघटितेषु सर्वत्रैव साधर्म्यस्यैवबोधो जायेत,तस्येवशब्दवाच्यत्वात्, न तु सादृश्यस्यापि बोधः, तस्याक्षिप्तत्वात्, आक्षिप्तस्य शाब्देऽनन्वयात् । तथा च साधर्म्ये उपमानोपमेययोरुभयोरपि अनुयोगित्वमेव, साधारणधर्मस्य च प्रतियोगित्वमेव प्रतिभासेत, न तु उपमानप्रतियोगिकः उपमेयानुयोगिकः सादृश्यसम्बन्धः उपमास्थले ख्यातिं गतोऽपि कदाचिदपि प्रतिभासेत । किन्तु प्रतिभासतेऽसावेव न तु उपर्युक्तलक्षणलक्षितं साधर्म्यमपि कथञ्चिदिति निश्चीयते उभयोरैक्यमेवेति । यदि स्यात् पार्थक्यं साधर्म्यसादृश्ययोस्तदा—

ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम् ।

इत्यत्रोपमादोषनिरूपणावसरे अत्र काव्यस्य शशिना, अर्थानाञ्च रश्मिभिः साधर्म्यं न प्रतीतमित्यनुचितार्थत्वमित्युक्तं मम्मटेन । तच्चेदं मम्मटोक्तं सर्वथैव विरुद्ध्येत । साधर्म्यस्योपमात्वे हि साधारणधर्मप्रतियोगिकः काव्यशश्यनुयोगिकः सम्बन्धो न कुत्रापि दृश्यते इत्येवं रूपेण वाच्यं स्यात् । प्रस्तुतग्रन्थस्तु साधर्म्यस्य सादृश्यपरत्वे हि संगमिष्यते । न दृष्टं प्रतीतं वा काव्यशशिनोः सादृश्यमित्येवं रूपेण ।

मम्मटोक्ते उदाहरणे—

स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति ।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा ॥

अत्र स्वाधीनपतिका उपमानम्, विजयश्रीरुपमेया, न मुञ्चति इति मोचनाभावः साधारणो धर्मः यथा शब्दः उपमावाचकः । अत्र विचार्यते-उपमानं हि सादृश्यप्रतियोगितया विवक्षितः, उपमेयश्चनुयोगितया । एतच्च प्रकृते सादृश्यस्योपमात्वे एव संगतं भविष्यति, नान्यथा । साधर्म्यस्योपमात्वे हि स्वाधीनपतिका विजयश्रीश्च एतद्द्वयमपि अनुयोगि स्यात्, मोचनाभाव एव प्रतियोगी स्यात् । न च भवति एतादृशी प्रतीतिरुपमाया अत्रोदाहरणे । यथा शब्दस्य च सादृश्ये शक्ततया साधर्म्ये चाशक्ततया तस्योपमावाचकत्वमपि न संभवेत् ।

एवञ्च साधर्म्यस्य सादृश्यात् पृथक्त्वेऽङ्गीक्रियमाणे बहूपप्लवः स्यादिति तयोरैक्यमेवादरणीयम् । अत एव सादृश्यस्य भेदे एव संभवात् प्रदीपकारेणापि शंकितम्— "नन्वेवं भेदे इत्यनुपादेयमेव, तस्याक्षेपेणैव लाभसंभावात् । नह्यभेदे

सादृश्यात्मकं साधर्म्यमिति चेन्न साधर्म्यपदस्यारोपितसाधारणधर्मसम्बन्धमात्रपरत्वेन आरोपितसाधर्म्यनिबन्धनस्यानन्वयालंकारस्य व्यवच्छेद्यत्वात् । अत एव "त्वयि कोपो ममाभाति सुधांशाविव पावकः" इत्यत्रोपमा सिद्ध्यति । अत्र पावकविशिष्टस्य चन्द्रस्योपमानत्वं यद्यप्यप्रसिद्धं तथापि कविकल्पनाप्रसूतश्चन्द्राधिकरणकोऽनलः संभावनामात्रविषय इति निराबाधैवात्रोपमेत्यलं पल्लवितेन ।

काव्यलिंगानुमानयोः शास्त्रीय-समीक्षा

शब्दाऽर्थौ समलंकृत्य परम्परया काव्याऽऽत्म-भूतं रसम् उपकुर्वताम् अलङ्काराणां काव्य-शास्त्रे कीदृशं महनीयं स्थानम् इत्य् अतिरोहितम् एव सचेतसाम्। अलङ्कारत्वं च व्यङ्ग्य-भिन्नत्वे सति शब्दार्थाऽन्यतरनिष्ठ-विषयिता-सम्बन्धाऽवच्छिन्ना या चमत्कारनिष्ठ-जन्यतानिरूपित-जनकतावच्छेदकता तदवच्छेदकत्वम्। अनुप्रासादि-विशिष्ट-शब्दज्ञानाद्, उपमादिविशिष्टाऽर्थज्ञानाच् च जन्यते चमत्कारः। एवं च विशिष्ट-शब्दज्ञाने अर्थ-ज्ञाने च चमत्कारनिष्ठ-जन्यतानिरूपित-जनकतागतेति जनकताऽवच्छेदकता शब्दाऽर्थयोर् गता, तदवच्छेदकत्वं चाऽनुप्रासोपमादाव् इति लक्षण-समन्वयः।

तत्र च भूयसी संख्या अलङ्काराणाम्। सन्ति च तत्र केचन शब्दाऽलङ्काराः, केचिद् अर्थालङ्काराः, कतिपये चोभयाऽलङ्कारा अपि। एषां शब्दार्थ-गतत्वे व्यवस्थापकोऽन्वय-व्यतिरेक-नियम एवेति प्रथितम् एव। अर्थालङ्कारेषु काव्यलिङ्गम् अनुमानं चेत्य् अलङ्कार-द्वयं पृथग् पृथग् अभिमतं मम्मटादीनाम् अलङ्कार-शास्त्रिणाम्। तद्यथा—

'हेतोर् वाक्यपदार्थता काव्यलिङ्गम्' इत्य् अलङ्कार-सर्वस्वकारः।
'काव्यलिङ्गं हेतोर् वाक्यपदार्थता' इति मम्मटः।
'हेतोर् वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति च विश्वनाथः।

कस्यचित् शब्दस्येतस् ततो व्यत्यासम् अतिरिच्य उपर्युक्तं लक्षण-त्रयम् एकम् एव तथ्यं प्रकटयतीति निश्चितं शक्यते वक्तुम्। अर्थाद् हेतोर् अभिधानं काव्यलिङ्गम्। अभिधानं च तस्य क्वचिद् वाक्यार्थत्वेन, क्वचित् पदार्थत्वेनेति द्वैविध्यं काव्यलिङ्गस्य। तत्र हेतवोऽपि त्रिविधा भवन्ति। निष्पादको ज्ञापकः समर्थकश् चेति। तत्र निष्पादको हेतुः कार्य-नियतपूर्ववर्ती सन् अविद्यमानं कार्यम् उत्पादयति। यथा दण्डादयो घटस्य निष्पादकाः हेतवः। ज्ञापको हेतुः पूर्वतो विद्यमानं लब्ध-सत्ताकं पदार्थं ज्ञापयति। यथा धूमो वह्नेर् ज्ञापकः। समर्थको हेतुः प्रतीत-प्रत्यायने समुपयुज्यते। यत्र संभाव्यमानोऽर्थोऽनुपपद्यमानतया आकाङ्क्षते समर्थनं तत्राऽर्थान्तरन्यास एवाऽस्योपयोगः। निष्पादकस् तु काव्यलिङ्गस्य विषयः। ज्ञापकोऽनुमानस्येति मम्मट-प्रभृतयः।

काव्यलिङ्गम् उदाहरता विश्वनाथेन प्रस्तुतीकृतं पद्यम् इदम्—

यत्त्वन्नेत्रसमानकान्ति-सलिले मग्नं तदिन्दीवरम्,
मेघैरन्तरितः प्रिये! तव मुखच्छायानुकारी शशी।

येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गतास्
त्वत्-सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ।। इति ।

अत्र चतुर्थपादे त्वत्-सादृश्यविनोद-कर्मिका दैव-कर्तृकाऽसहनशीलतोपवर्णिता कस्माद् व्यापाराज् जातेति जिज्ञासायां नेत्ररुचि-समानरुच इन्दीवरस्य सलिले निमज्जनम्, मुखच्छायानुकारिणः शशिनो मेघैश् छादनम्, गमनानुकारि-गतीनां हंसानां पलायनं चेति वाक्यार्थ-त्रयं तत्र हेतुर् भवति । यथा घटम् उत्पादयितुं दण्डादेर् व्यापारस् ततः पूर्वम् आवश्यकस् तथैवासहनशीलताम् उत्पादयितुम् अपि विधातृ-निष्ठः कश्चन व्यापारो नूनम् अङ्गीकरणीयः । स च व्यापारः पूर्वोक्तं वाक्यार्थ-त्रयम् इति भवत्य् अत्र संगतिः काव्यलिङ्गस्य । अत्रोदाहरणे "मग्नम्" "अन्तरितः" "गताः" इति स्थल-त्रये अन्तर्भावित-ण्यर्थो धातुर् वेदनीयः । तेन त्रयाणाम् अपि कार्याणां विधातृ-प्रयोज्यत्वं सिद्ध्यति । एवम् एव काव्यलिङ्ग-स्याऽपरोदाहरणेऽपि दृष्टिपातेनेदम् एव तथ्यम् उपलभ्यते यद् अत्र हेतुर् निष्पादक एव । यथा—

संकल्पितं प्रथममेव मया तवार्थे
भर्त्तारमात्मसदृशं सुकृतैर्गता त्वम् ।
चूतेन संश्रितवती नवमालिकेय-
मस्यामहं त्वयि च सम्प्रति वीतचिन्तः ।।

अत्र चतुर्थ-वाक्ये प्रतिपादिता कण्वस्य निश्चिन्तता तदैव सम्पद्यते, यदा सुकृतव-शाद् उपैति शकुन्तला स्वाऽनुकूलं पतिम्, प्राप्नोति च यदा नवमालिकाऽपि रसालं स्वाभीष्ट-पति-रूपेण । एवं चाऽत्रापि शक्यते वक्तुं काव्यलिङ्गस्योपर्युक्तं स्वरूपम् ।

विनिन्द्यान्युन्मत्तैरपि च परिहार्याणि पतितैर्,
अवाच्यानि व्रात्यैः सपुलकमपास्यानि पिशुनैः ।
हरन्ती लोकानामनवरतमेनांसि कियताम्,
कदाप्यश्रान्ता त्वं जगति पुनरेका विजयसे ।। इति ।

अत्र पंडितराजीये पद्ये भागीरथ्यां प्रतिपादिता सर्वोत्कृष्टता कथंकारम् अवबुध्य-ताम् इति जिज्ञासायां पाद-त्रय-गतं भागीरथ्याः कार्यम् एवैतादृशम् उपतिष्ठते यद्-वशात् तत्र सर्वोत्कृष्टता जायत इत्य् अवगम्यते । यदि चोच्यते भागीरथी सर्वोत्कृष्टा पूर्वत एवाऽस्ति न तु पाद-त्रय-गतेन कार्येण जन्यतेऽसाव् इति— तर्ह्य् अभ्युपगम्यतां घटनिर्मातृत्व-शक्तिमतः कुलालस्याऽपि घट-निर्माणं विनैव तत्क-र्तृत्वम् इति ।

अनुमानालङ्कारे तु नैतादृशी स्थितिः । तत्र ह्य् एकस्मिन् धर्मिणि साधनेन साध्यस्योन्नयनं कवि-कल्पना-प्रसूतं सच् चमत्कार-कारणं भवति चेत् तदैव तत्राऽनु-

मानम् । तेन 'पर्वतो वह्निमान् धूमवत्वात्' इत्य् अत्र चमत्काराऽभावाद् नाऽनुमानालङ्कारः । अनुमानम् इत्य् अत्र अनुमितिर् अनुमानम् इति भावे ल्युट् । तेन जायमानाऽनुमितिर् एव अलङ्कारः, न तु तर्कशास्त्र इवात्र अनुमितेः कारणम् अनुमानं भवति । स चाऽयम् अलङ्कारो मन्ये, शङ्के, अवैमि, जाने इत्यादिवाचकपदोपादाने भवति वाच्यः । नन्व् एवम् उत्प्रेक्षाऽलङ्कारतोऽस्य किं वैभिन्यम् इति चेत्— साध्य-साधनयोर् निर्देश-स्थलेऽनुमानम्, सादृश्यादि-निमित्त-सद्भावे तूत्प्रेक्षा इति विभावय । यत्र तु वक्ति-कथयति-प्रभृतयः शब्दास् तत्राऽनुमानं लक्ष्यं यत्र च साध्यसाधनाभ्यां वाचक-लक्षक-शब्दानाम् आक्षेपः तत्र प्रतीयमानम् अनुमानम् इत्य् उभयोः स्थितिः ।

उदाहृतं च दर्पणे—

> यत्र पतत्यबलानां दृष्टिर्निशिताः पतन्ति तत्र शराः ।
> तच्चारोपितशरो धावत्यासां पुरः स्मरो मन्ये ॥

अत्र यत्-तत्-पदाभ्यां सूचिता व्याप्तिः । अर्थाद् यत्र यत्र कामिनीदृष्टिपातस् तत्र तत्र आरोपित-शर-मनोभव-धावनम् इति व्याप्ति-निश्चयपुरःसरं कामिनी-दृष्टिपातेन हेतुना मनोभव-धावनस्याऽनुमितिर् एव भवति न तु निष्पत्तिर् इति स्पष्टं भेदोऽनुमानस्य काव्यलिङ्गात् ।

एवं स्थितेऽत्र केचित् विप्रतिपद्यन्ते । तेषाम् इदम् अत्राऽऽकूतम्—

(1) काव्यलिङ्गे निष्पादको हेतुः अनुमाने तु ज्ञापक इति तथ्यं नोभयालङ्कार-भेदकम् ।

(2) विश्वनाथस्य निष्पादके तथा ज्ञापके च हेतौ नास्ति कश्चन भेदः ।

(3) विश्वनाथस्य काव्यलिङ्गोदाहरणेऽनुमान-प्रक्रिया भवितुम् अर्हति ।

(4) काव्यलिङ्गे हेतु-द्वारा विद्यमानोऽर्थोऽनुमीयते । फलतस् तत्र यथार्थता सम्पद्यते ।

एषु चतुर्षु तथ्येषु प्रथमं तथ्यं व्याकुर्वाणा वदन्ति यत्— "यत्त्वन्नेत्र" इत्यादि-पद्ये चतुर्थपादोक्ते विषये 'त्वत्-सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते" इत्य् अत्र न जायते यथार्थतायां विश्वासः । अतः सन्त्य् आवश्यकास् तादृशा हेतवो यैर् अत्र सम्पद्येत विश्वासः । श्लोकस्य प्रथमे त्रयो वाक्यार्थाः कुर्वन्ति इदम् एव कार्यम् । विधातुर् असहनशीलता तु प्रथमत एव सिद्धा । अन्यथा वाक्य-त्रये वर्णिता स्थितिर् एव न समागच्छेत् । एवंरीत्या पूर्व-विद्यमानाया असहन-शीलतायाः ज्ञापकत्वेनाऽत्रत्यो हेतुर् ज्ञापक एव, न तु कारक इति, कारकत्वम् अत्र ज्ञापकत्वाऽनतिरिक्तम् एव ।

अत्रोच्यते—यद्य् असहनशीलता पूर्वत एव सिद्धा, अन्यथा वाक्यत्रयोक्तानि कार्याणि न जायेरन्न् इत्य् उच्यते, तदा वाक्य-त्रयोक्तानां तथ्यानां चतुर्थ-वाक्यस्य

कार्यत्वेन कथं जायतां तेषां ज्ञापक-कारणत्वम् अपि। कार्यावस्थाऽऽपन्नानां कारणत्वस्य कथनं सर्वथैवाऽशक्यम्।

यद् उच्यते कार्याणि भवन्ति ज्ञापकानि। वह्नेः कार्यं धूमो वह्नेर् ज्ञापको भवत्य् एव। अत एव रतिमत्यां स्त्रियां समुत्पद्यमानान् भ्रूविकारादीन् अनुभावान् दृष्ट्वा अनुमीयते तत्र रति-भावः। एवम् एवाऽसहन-शीलता-कार्याणीन्दीवर-सलिल-मग्नीकरण-प्रभृतीनि दर्शं दर्शम् अनुमीयते विधातुर् असहनशीलतेति वाक्य-त्रये समागतं तथ्यं वर्ततेऽनुमापकम् एव न तु निष्पादकम् इति। तत्र समाधत्ते— कार्येण कारणस्यानुमानं भवतीति सर्वमान्यः सिद्धान्तः। कार्यत्व-समानाधिकरणाऽत्यन्ताभावीयप्रतियोगिताऽनवच्छेदकतया भवति हि कारणत्वं कार्यत्व-निष्ठ-व्याप्यतानिरूपित-व्यापकतावच्छेदकम्। व्याप्येन च व्यापकस्याऽनुमानं लोक-सिद्धम्। परम् अत्र चतुर्थ-वाक्यार्थः स्वयम् अनुपपन्नः। तस्य चोपपत्तिः प्रथमवाक्यार्थ-त्रयाद् भवतीति स्वयम् एवोक्त्वाऽपि वाक्यार्थत्रयं चतुर्थ-वाक्यार्थस्याऽनुमापकम्' इति कथनम् असाम्प्रतम् एव। लोके दृश्यते कारणं विना कार्यम् अनुपपन्नं, न तु कार्यम् अन्तरा कारणम् अपि श्रुतं कदाप्य् अनुपपन्नम् इति। घटम् अन्तरा दृश्यते सत्ता दण्डस्य, न तु दण्डं विनोपपद्यते कदाचिद् घटः। अनुमान-स्थलेऽपि वह्निम् अन्तरा नाऽवलोक्यते पृथक् सत्ता धूमस्य। न च धूमं विनाऽनुपपन्नो वह्निः, तप्तायः पिण्डे धूमाभावेऽपि तस्य वर्तमानात्। एवंरीत्याऽसहन-शीलतायाः कारण-रूपायाः अनुपपन्नता सर्वथैवाऽसंगतेति विश्वनाथोक्तिः कथं संगच्छतां यद् अत्र 'यत्त्वन्नेत्र.' इत्यादौ चतुर्थपाद-वाक्यम् अन्यथा साकांक्षम् असमञ्जसम् एव स्याद् इति ?

वस्तुतस् त्व् अनुमान-स्थले साध्य-साधनयोर् व्याप्य-व्यापक-भाव एव विवक्षितो न तु कार्य-कारण-भावः। कार्यस्य व्याप्यतया तेन तस्य कारण-पूर्वकत्वम् एवाऽनुमीयते केवलम् न तु प्रत्येक-क्षणाऽवच्छेदेन कारणस्य कार्यपूर्व-वर्तित्वं साध्यते। अन्यथेदानीन्तनस्यापि घटस्य दण्ड-पूर्वकत्वम् आपद्येत। यथा खलु प्रसिद्धो व्याप्य-व्यापक-भावो वह्नि-धूमयोः, न तथा रत्या सह भ्रूविकारादीनाम् अपि, उन्मत्तायां विकारबाहुल्येऽपि रतिभावस्य वक्तुम् अशक्यतया व्यभिचारस्य स्पष्टत्वात्। एवम् एव 'यत्त्वन्नेत्र' इत्य् अत्राऽपि व्याप्ति-ग्रहो दुर्वच एव। अत एवोक्तम् उद्योतकारेण—

व्याप्त्याद्यनिर्देशान्नानुमानसंकरः। इति।

अलङ्कारसर्वस्वकारेणाप्य् उक्तम्—

नह्यत्र व्याप्तिपक्षधर्मतोपसंहारादयः क्रियन्ते। इति।

एवं स्थिते असहन-शीलता न पादत्रयगतार्थस्य कारणरूपा, अपि तु कार्यरूपा। तद्-द्वारा चाऽसहन-शीलता कारण-पूर्विका, कार्यत्वात्, घटवद् इत्य् अनुमानेन

तस्याः कारण-पूर्वकत्वम् अवधार्यते । तच् च कारणं प्रथम-पाद-त्रय-गतं तथ्यम् एवेति विस्पष्टं काव्यलिङ्गम् । नन्व् असहन-शीलता पूर्वत एव विधातरि न स्यात् तदा तेन कथं कृतं तादृशं कार्यम् इति प्रोच्यते चेत्, 'ज्ञानजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः' इति नियमानुसारं यथा बुद्धि-सिद्धं घटं निर्माति कुलालस् तथैव बुद्धिसिद्धाऽसहन-शीलताऽपीन्दीवरादीनां सलिलादि-मग्नीकरणादि-क्रिया-कलापद्वारा समुत्पाद्यत इति विभावनीयम् ।

यदप्य् उक्तं चतुर्थवाक्यार्थस्य यथार्थतायां न जायते विश्वास इति । तत्र प्रोच्यते किम् इयं यथार्थता नाम ? यदि चाऽर्थस्याऽनतिक्रमण-रूपा, तर्हि चतुर्थ-वाक्यस्य दैव-कर्तृके विनोद-कर्मके सहनाभावरूपेऽर्थे विश्वासाभाव-हेतुं न पश्यामः । यत्र च भ्रम-स्थले पूर्व-गृहीतायां शुक्ताव् इदं रजतम् इति ज्ञाने जायते बाध-ज्ञानं 'नेदं रजतमिति', तत्रैव पूर्वगृहीत-ज्ञानस्य जायतेऽप्रामाण्यं यथार्थत्वं वा । नैतादृशी स्थितिः 'यत्त्वन्नेत्र.' इत्य् अत्र दृश्यते इति विश्वासाभावो मुधैव । वस्तुतः काव्य-लिङ्गे विश्वासाभावमयी धारणैवाऽयुक्ता । 'संकल्पितम्' इति पूर्वोदाहृते पद्ये शकुन्तलायाः नवमालिकायाश् चानुरूप-पति-प्राप्तेर् अनन्तरं स्वयम् एव कण्वेन प्रति-पादितायास् तदीय-निश्चिन्तताया उपरि निर्हेतुक-विश्वासाभावस्य वक्तुम् अशक्य-त्वात् ।

काव्यलिङ्गेऽनुमान-प्रक्रियाम् उपपादयितुं यद् उक्तं "यत्त्वन्नेत्र." इति पद्ये पाद-त्रयोक्तं तथ्यं विशेषः, चतुर्थवाक्यार्थश्च सामान्यम् । तत्र प्रथम-वाक्यार्थे असहन-शीलताया एकं रूपम्, द्वितीय-वाक्ये- द्वितीयं रूपम्, तृतीये च तृतीयं रूपं दृश्यते । एभिर् विभिन्न-रूपैर् अनुमास्यते— विधाता त्वत्-सादृश्य-जन्यं विनोद-मात्रमपि मे न क्षमत इति । इदम् अप्य् अनुमानं तादृशम् एव यथा धूम-वह्न्योः 'यत्र यत्र धूमस् तत्र तत्र वह्निर्' इति अनुमितिः ।

परम् एतद् अपि कथनम् अहृदयङ्गमम् एव नहि धूम-वह्न्योर् इवाऽत्र दृष्टं भूयः साहचर्यम् । न वाऽत्र स्थल इव धूमे त्रैरूप्यं दृष्टं तत्र । किञ्च—यस्य वह्नेः क्रियतेऽनुमितिः स तु तत्र पूर्वत एव सिद्धः । न चात्राऽसहन-शीलता पूर्वतः सिद्धा, अपि तु पादत्रय-गतैस् तथ्यैर् उपपाद्यते । किञ्च तत्र वह्निर् अनुमीयते, न तु दृश्यते, न वा प्रोच्यते शब्देन । अत्र त्व् असहनशीलता प्रोच्यते शब्देनेत्य् अनुमिति-प्रक्रियाऽस्तंगताऽत्र ।

विवेचनेनाऽनेन ज्ञापक-निष्पादकयोर् वैभिन्न्यं, तेन च काव्यलिङ्गानुमानयोः पार्थक्यं च स्पष्टम् एव सिद्धयति । किञ्चैवं काव्यलिङ्गेऽनुमानप्रक्रियाया वक्तुम् अशक्यतया काव्यलिङ्गे हेतु-द्वारा उक्तौ विद्यमानस्याऽर्थस्याऽनुमानं तत एव चोक्तौ यथार्थता समागच्छतीत्यादि निखिलं कथनं पराकृतम् एव वेदनीयम् । काव्यलिङ्गं लक्षयता अप्पयदीक्षितेन यद् उक्तम्—

'समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्' इति । तस्याऽपीदम् एव तात्पर्यं यत् कारणानुपादानात् कार्यं साकाङ्क्षं सद् अपेक्षते कारणोपादानम् । अतस् तत्र कारणस्योपादानं विधाय निवार्यते कार्यस्याऽसंगतिः ।

'जितोऽसि मन्दकन्दर्प मच्चित्तेऽस्ति त्रिलोचनः' इत्य् अत्र मच्चित्ताऽधिकरणक-त्रिलोचनः कन्दर्प-जयस्य हेतुत्वेनोपन्यस्तः । ननु चैवं समर्थ्यसमर्थक-भावस्य अर्थान्तरन्यासेऽपि सत्वात् किं पार्थक्यं ततः काव्यलिङ्गस्येति चेत्—समर्थनसापेक्षस्याऽर्थस्य समर्थने काव्यलिङ्गं भवति, निरपेक्षस्याऽपि पुनः समर्थने अर्थान्तरन्यास इति तयोर् भेदस्य वक्तुं शक्यत्वात् । नहि 'यत्त्वन्नेत्रसमानकान्ति.' इत्यत्रेव ।

> अथोपगूढे शरदा शशाङ्के प्रावृड् ययौ शान्ततडित् कटाक्षा ।
> कासां न सौभाग्यगुणोऽङ्गनानां नष्टः परिभ्रष्टपयोधराणाम् ॥

इत्य् अर्थान्तरन्यासोदाहरणे प्रस्तुतस्य समर्थनापेक्षित्वं वर्तते । पण्डितराजजगन्नाथेनाऽपि 'अनुमितिकारणत्वेन सामान्य-विशेष्यभावाभ्यां चानालिङ्गतः प्रकृतार्थोपपादकत्वेन विवक्षितोऽर्थः काव्यलिङ्गम्' इति लक्षणं विधाय 'प्रकृतार्थोपपादकोऽर्थः काव्यलिङ्गम् इत्य् उक्त्या समर्थन-सापेक्षस्य समर्थने काव्यलिङ्गम्' इति व्यञ्जितम् । यस्याऽर्थस्य ज्ञानेन प्रकृतार्थस्य निश्चयो जायते सोऽर्थः प्रकृतार्थोपपादकः ।

'यत्त्वन्नेत्र.' इत्यादि-पद्ये पादत्रय-गतार्थेन चतुर्थ-वाक्यार्थे निश्चयवत्ता जायते । इयं हि तस्य निश्चयवत्ता कारणोपादान-द्वारा निराकाङ्क्षतारूपैवाऽस्ति । एतेन स्पष्टं यत् काव्यलिङ्गे सर्वत्रैव कार्यकारण-भावः सम्बन्धो जागर्त्ति । कारणोपादानेन च कार्यस्य निराकाङ्क्षत्वं सम्पाद्यते । यद्यपि समर्थनम् उपपादनं च प्रकारस्यैकस्याऽनुमानम् एव तथाऽप्य् अनुमानाऽलङ्कारे कविना श्रोतुर् बुबोधयिषयैव व्याप्ति-पक्ष-धर्मतादि-घटितानि वाक्यानि प्रयुज्यन्ते । काव्यलिङ्गे च काव्यलिङ्ग-ज्ञानानन्तरम् (अर्थात् प्रकृतार्थोपपादनानन्तरम्) श्रोत्रा कारण-ज्ञानसहकारेण क्रियतेऽनुमितिर् इत्य् अन्यद् एतत् । उक्तं च जगन्नाथेन—"काव्यलिङ्गज्ञानजानुमितिस्तु न कविना श्रोतुर्बुबोधयिषिता । अत एवासौ न काव्यव्यापारगोचरः । श्रोतुः केवलं कारणवशाज्जायत इति नास्त्येवात्र जायमानायामप्यनुमितावनुमानालङ्कृतेर्विषयः ।"

किञ्च यत्र काव्ये अनुमिति-कर्त्ताऽपि वर्णितस् तत्राऽनुमानालङ्कारः । यत्र पुनर् अनुमिति-कर्त्ता न वर्णितः, किं तु श्रोतार एव महावाक्यार्थनिश्चयानन्तरम् अनुमितिं कुर्वन्ति साऽनुमितिः काव्यलिङ्गजेति महान् विशेषः काव्यलिङ्गाऽनुमानयोः ।

पण्डितराजेन तु "यत्त्वन्नेत्र" इत्यादि-पद्ये स्वीकृतोऽनुमानालङ्कारोऽपि । तन्-नये दैवम् अत्र पक्षः, नायिकाङ्ग-सादृश्य-जन्यसुखाऽसहिष्णुत्वं नायिकायास् तत्तदङ्ग-सादृश्याऽऽधार-विषयकत्वेन हेतुना साध्यते । परम् एतद् अनुमानं काव्यलिङ्गमूलकं न तु काव्यलिङ्ग-स्थानापन्नम् । हेतुहेतुमद्भाव-विनिर्णयानन्तरम् एव तादृशं तत्र जायतेऽनुमानं, न तु ततः प्राक् । इयं स्थितिस् तु सर्वत्रैव कार्यकारण-भावस्थले शक्यते वक्तुम् ।

अस्तु वा कथञ्चित् 'यत्त्वन्नेत्रसमानकान्ति' इत्यादि पद्यम् अनुमानालङ्कारस्योदाहरणम्, किं तु प्रागुपवर्णित-दिशा सिद्ध्यत् काव्यलिङ्गानुमानयोः पार्थक्यं को नाम निवारयितुम् ईष्टे । वस्तुतस् त्व् अलङ्कारयोर् अनयोः कारणता-घटिततया परस्परं सांकर्याभासः स्वाभाविक एव । परं नैतावता शङ्कनीयम् अन्यतरेणाऽन्यतरस्य गतार्थत्वम् अपि कदाचित् ।

हेतु-हेतुमद्-भावस्य वस्तु-सिद्धत्वेन चमत्कृतेर् अभावात् काव्यलिङ्गस्य नाऽलङ्कारतेति प्रोच्यते चेद् भूयसाम् अलङ्काराणां नैरर्थक्यम् आपद्येत । अतः कवि-कल्पना-प्रसूत-चमत्कृतेर् अनुमान-स्थल इव हेतु-हेतुमद्भाव-स्थलेऽपि द्रष्टुं शक्यतया काव्यलिङ्गस्य सत्ता व्यपोहितुम् अशक्यैवेति वदन्ति ।

मुखं व्याकरणम्

व्याकरणं नाम व्युत्पादकं शब्दानाम्, आञ्जसो मार्गः शब्देन व्यवहर्तॄणाम्, उपकारकं सर्वशास्त्राणाम्, अजिह्मो राजमार्गः मोक्षमाणानाम्, दर्शकं परावाचः, विवेचकं वैखर्याः, आकरो धातुप्रकृतिप्रत्ययानाम्, किं बहुना इदमेवाद्यं पदस्थानं सिद्धिसोपानपर्वणामिति तत्त्वविदामाकूतम्। तच्च व्याकरणमधिवेदाङ्गं मुखमिव प्रधानमिति वदन्ति विपश्चिद्वराः।

व्याकरणस्य कः खलु प्राथमिकः प्रवक्तेति विचिकित्सायां यथा सर्वेषां ज्ञानानां सर्वासां वा विद्यानाम् प्रवक्ता ब्रह्मा स्वीक्रियते तथैव व्याकरणस्यापि प्रवक्ता ब्रह्मैव। यथोक्तम् ऋक्तन्त्रव्याकरणे ब्रह्माबृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भारद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः। महाभाष्यकृदपि बृहस्पतिकर्तृकम् इन्द्रोद्देश्यकं व्याकरणपारायणं प्रत्यपीपदत्। यथोक्तं भाष्ये– बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्त्रं शब्दपारायणं प्रोवाच, न चान्तं जगाम इति। इन्द्रस्य व्याकरणप्रवचनकर्तृत्वं तैत्तरीयसंहितायामप्युक्तम्— वाग् वै पराच्यव्याकृता अवदत् ते देवा इन्द्रमवदन्, इमां नो वाचं व्याकुरु इति। तामिन्द्रो व्याकरोदिति। एवञ्च व्याकरणस्य परम्परा पुरातनी सदातनी वेति शक्यते वक्तुं निर्विवादम्। तदिदं व्याकरणं श्रूयते बहुविधम्—

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥

यद्यपि एतद्रीत्या सिद्ध्यन्त्यनेकानि व्याकरणानि, परमिदानीमुपलभ्यमानेषु व्याकरणेषु पाणिनीयं व्याकरणमेव स्वकीयेन वैशिष्ट्येन निखिलं व्याकरणमतिशेत इत्यत्र नास्ति संशीतिलेशोऽपि। पाणिनितः पूर्वमेवंविधं चतुः सहस्त्रसूत्रबद्धं सर्वतोमुखं, भाष्यवार्तिकादिभिरुपबृंहितकलेवरं, कैयटनागेशादिप्रखरप्रतिभाप्रसूत व्याख्यानभासुरं किमपि व्याकरणंनासीदिति शक्यते वक्तुं निश्चप्रचम्।

सनकादिसिद्धैः समं तपस्यता भगवता पाणिनिना समुपलब्धोऽपूर्वो वर्णराशिरनुबन्धचतुर्दशसमन्वितो वेदराशिरिवाधारभूमिर्व्याकरणशास्त्रस्य। तमिममक्षरसमाम्नायमादाय महत्या सूक्ष्मेक्षिकया चतुः सहस्त्रसूत्रात्मिका व्यरचि अष्टाध्यायी पाणिनिना। एनमेव ग्रन्थरत्नं श्रावं श्रावं पाठं पाठं गुरुशिष्यपरम्परया संरक्षितं व्याकरणशास्त्रं विजयतेतमां महीमण्डलेऽद्यापि। पाणिनिसूत्राण्यभिलक्ष्योक्तं

पतञ्जलिना अत्र वर्णनाप्यनर्थकेन न भवितव्यं किं पुनरियता सूत्रेण । भावगाम्भीर्यपूर्णानि व्यापकप्रभाववन्ति पाणिनिसूत्राणि लौकिकवैदिकोभयविषशब्दानुशासनपराणीति विदन्त्येव व्याकरणशास्त्रसागरसंचरिष्णवो विद्वांसः ।

पाणिनेः पूर्वं यद्यपि सर्वाङ्गपूर्णं व्याकरणं नासीदिति शक्यते वक्तुं निर्भ्रान्तं, तथापि ततः पूर्वं किमपि व्याकरणं नासीदिति तु नैव युज्यते वक्तुम् । सत्येवं पाणिनेः पूर्वं व्याकरणस्य वेदाङ्गत्वं कथमुपपादयितुं शक्येत । पाणिनेः पूर्वं व्याकरणस्यास्तित्वं स्वयमेव पाणिनिना स्वीकृतम् । तच्चेत्थम्—पाणिनिना "आङिचापः" इति सूत्रं कृतम् । तत्र "आङ्" शब्देन तृतीयैकवचनं गृह्यते । तेन, "रमया"इत्यादिप्रयोगेषु आङिपरे सति आपः स्थाने एकारादेशो विधीयते । न च पाणिनिना तृतीयैकवचनस्य "आङिति" संज्ञा कृता, किन्तु व्याख्यातारो ब्रुवते आङिति टा संज्ञा प्राचाम् । एतेन सिद्धं भवति यद् पाणिनिपूर्वव्याकरणेषु "आङ्" इत्येव प्रत्यय आसीत् । पाणिनिस्तु प्रत्ययस्यास्य ङित्वनिराकरणेच्छया "टा" इति संज्ञां कृतवान् । एवमेव पाणिनेरेकं सूत्रमस्ति 'औङआपः' । अनेन औङ् शब्देन प्रथमाद्वितीययोः द्विवचने गृह्येते, किन्तु पाणिनिस्तु न कुत्रापि औङिति संज्ञां कृतवान् । एवं कर्मणि द्वितीया' कर्तृकरणयोस्तृतीया 'सम्प्रदाने चतुर्थी' इत्यादिसूत्रद्वारा विभक्तिविधानं कृतं, किन्तु न कृता पाणिनीयतन्त्रे द्वितीयादिसंज्ञाः । अत्रेदमेव कथयन्ति व्याख्यातारो यद् सर्वोऽयं व्यवहारः प्राक्तनव्याकरणे कृतसंज्ञाभिः कृतः पाणिनिना ।

भगवता पाणिनिना स्वकीयाष्टाध्याय्यां महता समादरेण गार्ग्यगालवशाकल्यशाकटायनस्फोटायनप्रभृतीनामाचार्याणां स्मरणं कृतम् । एतेन पाणिनेः पूर्वं व्याकरणस्य सत्ताऽऽसीदिति निश्चप्रचम् । तत् स्वरूपं नासीत् सर्वाङ्गपूर्णमित्यन्यदेतत् ।

पाणिनि सूत्राणामुपरि कात्यायनेन विरचितानि वार्तिकानि । सूत्रकारस्य न्यूनतां दृष्ट्वा वार्तिककारः प्रपूरयतीत्याभाणकं प्रसिद्धमेव । यथा 'सुद्ध्युपास्यः' इति प्रयोगसाधनावसरे 'सुद्ध्य्-उपास्यः' इतिस्थिते यकारस्य संयोगान्तलोपः प्राप्तः । न च पाणिनिना कृतः कोऽपितत्प्रतीकार इति इमां न्यूनतामभिलक्ष्य कात्यायनेन कृतं वार्तिकं 'यणः प्रतिषेधो वाच्यः' इति । भाष्यकारः पतञ्जलिस्तु सूत्रकारे बद्धादरस्तदीयां न्यूनतामसहमानो झलो झलि' इति सूत्रात् षष्ठ्यन्तं झल इति पदमनुवर्त्य संयोगान्तस्य झलो लोपविधानान्नात्र प्रसक्तिः संयोगान्तलोपस्येति प्रतिपादयाम्बभूव । भाष्यकारस्य सूत्रकारोपरि महान् आदरः । अतएव बहुत्रोक्तं तेन महती सूक्ष्मेक्षिका वर्तत आचार्यस्य' अत्र वर्णनाप्यनर्थकेन न भवितव्यं किं पुनरियता सूत्रेण । अतएव 'अमैवाव्ययेन' इति सूत्रे कृतस्य एवकारस्यौचित्यानौचित्यविषये संशयमुद्भाव्य 'अमैव तुल्यविधानं यदुपपदं तदेवाव्ययेन सह

समस्यते। तेन तुमुना तुल्यविधानस्य कालादेः उपपदस्य तथा अमा सहैव अन्येन-सहापि विधीयमानोपपदस्य समासो न भवति 'अग्रे भोजम्' अग्रे भुक्त्वा' इत्यादा-वित्येवं रूपेण एवकारग्रहणस्य सार्थक्यं साधितम्। एवमेव यत्र कुत्रापि सूत्राक्षर विषये सूत्रघटकपदविषये वा जाता विप्रतिपत्तिस्तत्र सर्वत्रैव भाष्यकारेण तस्य सार्थक्यं संसाध्य सूत्रकारस्य वैशिष्ट्यं प्रत्यपादि।

भाष्यकारस्य विशेषता तु वर्णयितुमप्यशक्या। प्रसन्नगंभीरया गिरा निपुणं व्याख्यातानि तत्र पाणिनिसूत्राणि। उदाहरणप्रत्युदाहरणलौकिकन्यायप्रदर्शनपुरःसरं सरलायां भाषायां भावगाम्भीर्यपूर्णं व्याख्यात्मकं भाष्यं नोपलभ्यते कुत्रापि। इदं भाष्यमुपजीव्यं कृत्वा कैयटनागेशाभ्यां व्याकरशास्त्रं बहूपकृतमित्यत्र नास्ति-संदेहलेशः। नागेशकृता शब्देन्दुशेखरादयो ग्रन्था मूर्धन्यायन्तेऽधिशब्दशास्त्रम्। नागेशविरचितग्रन्थानाधारीकृत्य प्रातः स्मरणीयश्रीशिवकुमारशास्त्रिप्रभृतिभि विद्वद्धौरेयैः प्रखरप्रतिभाभिव्यंजिकाः प्रचालिताः परिष्कारपरम्पराः। भगवतः पाणिनेः न जाने कीदृशी विशिष्टा सूक्ष्मेक्षिका वर्तते यद्वशात् तादृशानां शब्दानां कृतः सन्निवेशः स्वसूत्रेषु यानादाय वैचारिकपरम्परा सञ्जाता उच्चैस्तरा। उदा-हरणार्थम्—

'अचः परस्मिन् पूर्वविधौ' इति सूत्रं गृह्यताम्। सूत्रमिदं परनिमित्तस्याजा-देशस्य स्थानिवत्वं विधत्ते। तत्र कोऽयमजादेशः? अच् स्थानिकश्चेदसौ मरुतमा-चष्टे मारयति 'इति प्रयोगे मरुत् शब्दात् णिचि टिलोपेन 'उत्' भागस्यापहारे कृतेऽत्रापि अजादेशस्य कृते स्थानिवद्भावे उपधावृद्धिर्न स्यादित्याशंक्य नागेशेनोक्तम् 'अच एवादेशः" अजादेशः। अस्याः पंक्ते व्याख्यानं कुर्वता शेखरटीकाकारे-णोक्तम्— अच्त्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताक-पर्याप्तिप्रतियोगिस्थानिताक आदेश एव अजादेशः। 'मारयति' इत्यत्र तु 'उत्' भागो लुप्त इति नासौ केवलमच्रूपइति नात्रदोषः। अत्र पाणिनेः शब्दस्तु केवलं 'अजा-देश' इत्येव वर्तते, परं तत्र कीदृशं रहस्यं वर्तत इत्युद्घाटितं टीकाकारैरिति नाविदितं वर्ततेऽधिशब्दशास्त्रंकृतश्रमाणां विदुषाम्।

स्यादेतत्। आसीत् कश्चन समयो यदा पाणिन्यष्टाध्यायीमवलम्ब्य भाष्यञ्च पुरस्कृत्य प्राचीचलत् अध्ययनं शब्दशास्त्रस्य। गते बहुतिथे काले भट्टोजिदीक्षितः पाणिनि सूत्राणां क्रमभङ्गं विधाय तत्तद्प्रयोगोपयोगीनि सूत्राण्येकत्र संकलय्योदा-हरणप्रत्युदाहरणप्रदर्शनपुरः सरं गभीराध्ययनसापेक्षं पंक्तिबहुलसम्पूजितं प्रतिभा-भिव्यञ्जकव्याख्यानसापेक्षंवैयाकरणसिद्धान्तकौमुदीनामकं ग्रन्थं जग्रन्थ। तदधुना कौमुदीक्रमेणैव प्रचलति बाहुल्येनाध्ययनाध्यापनपरम्परा। आसीत् कश्चन विशिष्टः समयो यदाऽधिवाराणसि पाणिनिसूत्राणां कृते क्रोडपत्राण्यपाठ्यन्त, शास्त्रार्थो-

ऽक्रियत । न्यासपरम्परा प्राचाल्यत, किं बहुना वाराणसेयं वायुमण्डलं शब्दशास्त्रमयमक्रियत ।

परं हन्त ! ते हि नो दिवसागताः । अद्य न तादृशी अध्ययनाध्यापनपरम्परा । शास्त्रार्थचर्चा तु विलयमेवोपगता या चासीत् ग्रन्थाभ्यासस्यावश्यकं निदानम् । अद्य तु विडम्बनासाम्राज्यमेव समुज्जृम्भते । 'यस्येति च' इति सूत्रस्य कीदृशः पदच्छेदः, 'न यासयोः' इति सूत्रनिर्देशः कथम् ? क्रादिनियमस्य किं स्वरूपं ? नियमसूत्राणां विधिमुखेन प्रवृत्तिः निषेधमुखेन वा प्रवृत्तिरिति, अथवा अच्प्रत्याहारसिद्धिरेव वा कथं सम्पद्यते ? इत्यादयः साधारणविषया अपि येषां कृते हिमालयशिखरारोहणायन्ते ते खलु जनाः विशिष्टं स्थानमुपगूहमाना व्याकरणाध्यापिपयिषयाऽवलोक्यन्ते । तत्तच्छास्त्रेषु कृतभूरिपरिश्रमः, ग्रन्थरहस्योद्घाटनक्षमस्तु एकाङ्गी खल्वेष जनइति कृत्वा समुपेक्ष्यते । अयञ्चापरो गण्डस्योपरि विस्फोटः यत्र कुत्रापि पाठयितुम् व्याकरणं पी.एच.डी. महानुभावस्यापेक्षेति । स खलु दयनीयो यतः कुतश्चित् आहिण्ड्य किमप्यनर्थकंलिखित्वा पुस्तकालयानां भारभूतं शतद्वयपृष्ठात्मकं पुस्तकाभासं प्रस्तुतं कुर्यान्नाम । तेन कःखलु लाभः ? कौमुद्याः सरहस्यां प्रक्रियां पाठयितुं, परिभाषेन्दुप्रकाशं वितरितुम्-छात्रेषु व्युत्पत्तिमाधातुं वा प्रभविष्यति किमसौ जनः ?

श्रूयते पुरा पाटलिपुत्रे शास्त्रकारपरीक्षा । मध्येसभं पुस्तकं विन्यस्य क्रियते स्म योग्यता परिचयः । अतएव तदानीं पाणिनिपतञ्जलिकैयटनागेशदीक्षित प्रभृतयो विद्वद्वरेण्या समजायन्त । साम्प्रतं स्थितिश्चिन्तनीया वर्तते । अद्यव्याकरणाचार्या अपि लघुसिद्धान्तकौमुदीपाठने सर्वथा अक्षमा एवावलोक्यन्ते चेत् शेखरमञ्जूषादिग्रन्थानां का स्थितिः साम्प्रतमिति विचारणीयो विषयः । शाब्दबोधः खलु निखिलशास्त्रोपयोगी । तत्र प्रकारतावादसंसर्गतावादयो विवादः सुप्रसिद्धः । वैयाकरणाः कस्यवादस्य समर्थका इति विवेचयितुं कः खलु वैयाकरणोऽग्रेसर इति न वेद्मि । एवमेव कर्तृवाच्ये व्यापारविशेष्यकशाब्दबोध इव कर्मवाच्ये किं विशेष्यकः शाब्दबोधइति विवेचयितुं के क्षमाः वैयाकरणधुरीणाः ? दर्शं दर्शमिमां विषमां परिस्थितिं वेपते शरीरम्, विदीर्यते हृदयम्, कम्पते वराकी जिह्वापि आधुनिक वैयाकरणाभासानामुदन्तवर्णने । यद्यस्याः स्थितेः समाधानं न करिष्यते तदा निखिलशास्त्रोपकारकं व्याकरणं विलुप्तमेव स्यात् । विलुप्ते च तस्मिन् विलुप्तं सर्वस्वम् । व्याकरणज्ञानविधुरा अनधिकारिण एव न्यायशास्त्राध्ययने । एवं व्याकरणमन्तरा तदनुगामिशास्त्रमेव वा कथं पठ्येत ? एवं च विलुप्ते व्याकरणे न केवलम् न्यायशास्त्रं, नवा केवलं साहित्यशास्त्रमेवापितु निखिलं संस्कृतजगत् व्याकुलं स्यात् । फलस्वरूपं भारतीयसंस्कृतिमणिञ्जूषा अनुद्घाटितैव शाश्वतिकाय कालाय विलीनास्यादिति नास्ति संदेहावकाशः ।

तस्मादुत्थातव्यं व्याकरणरक्षार्थम्। जागृतव्यम्व्याकरणाध्ययनार्थम् तच्च कथं स्यादधीतं रक्षितमिति प्रश्ने कुत्रापि स्थानेऽध्यापिपयिषया वास्तविकी योग्यता परिचीयताम्, अयोग्यता विदूष्यताम्, मध्येसभं विदुषामुद्घाट्य पुस्तकं प्रपाठ्य च योग्योनिर्वाच्यताम्। योग्याः पिपठिषवश्छात्राः पुरस्कारपुरः सरं योग्यतमेनाध्यापकेन पाठ्यन्ताम्, प्रोत्साह्यन्ताम् च। मन्ये यथाऽनेन शब्दशास्त्रं सुरक्षितं व्यवस्थितं सत् स्वकीयेन दिव्यालोकेन भारतभुवं भासयिष्यतीति द्रढीयान् विश्वासः।

वैयाकरणसम्प्रदाये स्फोटपरम्परा

इह खलु विचित्रगतिमति जगति यत् किञ्चित् वक्तव्यं श्रोतव्यं, कर्त्तव्यजातं वा भवति, तत् सर्वंशब्दायत्तं, शब्दानुविद्धं चास्तीति न खलु वर्तते तिरोहितं प्रेक्षावताम् । तदुक्तम्—

अर्थक्रियासु वाक् सर्वा समीहयति देहिनः ।
तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ।।[1]
न सोऽस्तिप्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।[2]

यदि नास्थास्यत् वाक्तत्त्वमिहलोके तदा मूकाः किं कर्त्तव्यविमूढाश्च लोकाः कथंकारं परस्परं व्यवाहरिष्यन् ? सेयं वाक् सर्वत्रानुस्यूता निखिलं व्यवहारं प्रसाधयन्ती कामप्यपूर्वां चमत्कृतिं बिभर्ति स्वात्मनि । विश्वप्रेष्ठाः परमेश्वरस्य निःश्वासभूता वेदाः, ऋतम्भरया प्रज्ञया अतीताननागतान् प्रत्यक्षीकुर्वतां महर्षीणां सदुपदेशाः, महाकवीनां कविताकल्लोलिन्यः, किं बहुना विचारात्मकानि निखिल-जगन्ति वाचः परिधानं धृत्वैव लोकलोचनगोचरतामुपयान्ति ।

तत्र श्रावणप्रत्यक्षविषयतावच्छेदधर्मावच्छिन्नैः कैश्चिदेव जायते शाब्दधीर्नापरैरित्यन्वयव्यतिरेकाभ्याम् तत्पदजन्यतदर्थविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तत्पदनिष्ठवृत्तिज्ञानाधीनतदर्थविषयकोपस्थितिः कारणमित्यवधार्यते कार्यकारण-भावः । अत एव घटपदंश्रुनवतो जनस्य एकसम्बन्धिज्ञानविधया जाते आकाश-स्मरणे न भवति तद्विषयकः शाब्दबोधः, तदुपस्थितेःवृत्त्यजन्यत्वात् ।

तत्र भवतीयं विचिकित्सा यन्निखिलप्रमेयप्रत्यायनक्षमः कोऽयं शक्त्याश्रयः शब्दः ? कुतोवास्य प्रादुर्भावः ? नित्योऽयमनित्यो वा ? मीमांसमानश्चैवं कश्चन प्रत्यवतिष्ठते— मुखान्निः सृता ध्वनय एव शब्दाः । स च शब्दोऽनित्यः । सन्ति चेमानि तथ्यानि तदनित्यत्वज्ञापकानि । तद्यथा— [3]प्रयत्नानन्तरमुपलब्धेः कार्यः शब्दः । कार्यत्वमनित्यत्वञ्च परस्परमविनाभावीति एकतरसिद्धावन्यतरसिद्धिः सुतरामेव जायते । शब्देन कार्यं चिकीर्षन् प्रयत्नमाचरति । एवञ्च प्रयत्नप्रेरित-

1. वाक्यपदीय ब्रह्मकांडम् 128 ।
2. तत्रैव 124 ।
3. न्यायमञ्जरी 188 पृष्ठम् ।

मारुतसंयोगविभागाभ्यामुपलभ्यमानः शब्दस्तत्कार्य एव । किञ्चोच्चारणानन्तरं नैनं मुहूर्तमप्युपलभामहे । तस्मादाशुविनाशितयाऽनित्यः शब्दः । करोति शब्दव्यपदेशाच्चाप्यस्यानित्यत्वम् । तद्यथा दृश्यते लोके शब्दं कुरु, मा शब्दं कार्षीः' इति व्यवहारः । युज्यते चायं केवलमनित्यानामेव कृते । किञ्च शब्दान्तरविकार्यत्वाच्चानित्यः शब्दः । 'सुध्युपास्यः' इत्यादाविकार एव यकारीभावमापद्यते । अतोऽनित्यः शब्दः ।

न चात्रमते'[1] किं पुनरिदं पदं नाम ? किञ्च वाक्यमिति ? वर्णसमूहः पदम् पदसमूहो वाक्यमिति कथनं न संगच्छेत, यतो हि न हि वर्णानां यौगपद्यं, येन साक्षात्कारो जायेत पदस्य, वाक्यस्य वा । न च क्रमभाविनां वर्णानां संस्कारद्वारा कार्यकरत्वं सम्भवति । यथा क्रमोत्पन्ना अपि प्रत्येकं ग्रासाः समुदिताः तृप्तिमुत्पादयन्ति । एकस्मिन्नपिग्रासे हीयमाने न भवति तादृशी तृप्तिः । अतः समस्ता एव ग्रासास्तृप्तेः करणम् । न च युगपद् प्रयुज्यन्ते समस्तास्ते । एवं क्रमवर्तिनोऽपि वर्णा एवार्थाभिधायिनो भविष्यन्ति । एवञ्चानित्याः शब्दाः शब्दजशब्दन्यायेन पदवाक्यप्रत्यक्षं कुर्वाणाः वाचकतामुपयान्ति । परञ्च नैतत् कथनं मनोरमं, यतो हि भवत्यत्र जिज्ञासा यत् घटपदं कम्बुग्रीवादिमद्व्यक्तिवाचकं, तत्र प्रत्येकं वर्णस्य वाचकत्वं स्वीक्रियते, समुदितस्य वा ? तत्र न तावदाद्यः, एकैकवर्णाकर्णनेऽर्थप्रतीतेरनुत्पादात् । यदि कथञ्चित् जायेतापि अर्थप्रतीतिस्तदा एकेनैव वर्णेन कार्ये सिद्धे द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेः । न द्वितीयः— उच्चरितप्रध्वंसित्वस्य तवाभिमतस्य वर्णेषु सत्वेन तेषां यौगपद्यस्यासंभवेन पदस्य वाक्यस्य वा गगनकुसुमायमानत्वात् ।

न च पूर्ववर्णस्थितिकाले द्वितीयवर्णोत्पत्तिरिति तेषां यौगपद्यं सूपपादनीयमेवास्ते, इति वाच्यम् ?[2] यावद् गकारे वाक् वर्तते न तावदौकारे" इत्यभियुक्तोक्त्या पूर्ववर्णनाशोत्तरं यत्नान्तरेण द्वितीयवर्णोत्पत्त्या तेषां यौगपद्यस्य कालत्रयेऽपि साधयितुमशक्यत्वात् । यदि चोच्यते— अर्थज्ञानोत्पत्तौ सहकारित्वं पूर्ववर्णानां भविष्यतीति, तदपि न युक्तियुक्तम् अविद्यमानानां सहकारित्वानुनुपपत्तेः ।

मीमांसकरीत्या यद्यपि वर्णा नित्यास्तथापि तेषां सत्तया अर्थप्रत्यायकत्वे सर्वदैवार्थप्रतीत्यापत्तिरिति धूमादीनामिव गृहीतानामेव प्रत्यायकत्वं वाच्यम् । ग्रहणञ्च तेषां प्रयत्नस्थानकरणैः क्रमेणोच्चारितानामेवेति तद्धेतूनां विनाशात् तदुच्चारणस्यापि नाशे जाते वर्णानां सामस्त्यं वक्तुमशक्यमेव ।

---

1. न्यायमञ्जरी 336 पृष्ठम् ।
2. महाभाष्यम् 1 । 4 । 109 ।

यदप्युच्यते— पूर्वपूर्ववर्णजाः शब्दाः शब्दजशब्दन्यायेन चरमवर्णप्रत्यक्ष-पर्यन्तं जायमाना एव सन्तीति न पदप्रत्यक्षानुपपत्तिरिति, तदपि कथनमसाम्प्रतमेव। यतो हि—

शब्दः शब्दान्तरं सूते इति तावदलौकिकम्।
कार्यकारणभावो हि न दृष्टस्तेषु बुद्धिवत्॥
शब्दान्तराणि कुर्वन्तः कथं च विरमन्ति ते।
न हि वेगक्षयस्तेषां मरुतामिव कल्पते॥[1]

इत्युक्तिमनुसृत्य वीचितरंगन्यायस्य, शब्दजशब्दन्यायस्य च पराहतत्वात्। एवञ्च संस्कारवशादव्यवहितोत्तरत्वसम्बन्धेन शब्दजशब्दन्यायेन च पदप्रत्यक्षोपपादनं सर्वथैवाशक्यम्। नष्टाविद्यमानयोः कालिकसम्बन्ध इवाव्यवहितोत्तरत्वसम्बन्ध-स्याप्यनौचित्यमेव। एवञ्च पदस्यासंभवेन तस्य शक्त्याश्रयत्वं नोपपद्यते। अविद्य-मानस्य च शक्त्याश्रयत्वे नष्टो घटो जलवान् इत्यप्यापद्येत।

ग्रासानां क्रमभाविनां दृष्टान्तोपन्यासोऽपि नालम्बते मनोग्राहितां, यतो हि न सन्ति ग्रासा इव चिरस्थायिनो मूर्तिमन्तो वर्णाः, येन तृप्तिरिवोपयुज्येतार्थप्रत्याय-कत्वं तेषाम्।

किञ्च वर्णानामनित्यत्वे सोऽयं गकारः इति प्रत्यभिज्ञा नैव जायेत। अनुभव-सिद्धा चेयं प्रत्यभिज्ञा। अत एव कस्मिंश्चित् श्लोके चैत्रेण पठितेऽनेनोच्चारितो दशकृत्वोगकार इति लोकव्यवहारो न तु दश गकारा उच्चारिता इति व्यवहारः। न चोक्तप्रत्यभिज्ञा जातिविषयिणीति स्वीक्रियताम्। सोऽयं गकारः' इत्यस्य तदेवेदं गत्वमित्यभिप्रायो वाच्यः। गत्वावच्छिन्नप्रतियोगिताकभेदाभाव एव तत्तात्पर्य-मिति चेत् द्वयोर्घटयोरपि 'सोऽयं घटः' इति प्रत्यभिज्ञापत्तेः, तत्रापि घटत्वजातेरेक-त्वात्। किञ्च वर्णानामस्थिरत्वे "एकं पदम्" एकमिदं वाक्यमित्यादयः सर्वेऽनु-भवसिद्धव्यवहारा भज्येरन्। एवञ्च वर्णानामनित्यत्वम्, प्रत्ययहेतुत्वञ्च सर्वथैवासंगतमित्याकलय्य वैयाकरणाः स्फोटवादं प्रत्यपीपदन्।

स्फोटवादस्य प्रेरणास्त्रोतांसि सन्ति वेदब्राह्मणोपनिषद्महाभारतादीनि। स च स्फोटो नित्यो ब्रह्मस्वरूपो निरुपाधिकः। तस्मादेव सम्पूर्णस्यार्थजातस्य विवर्त-नम्। ध्वनितश्चायमर्थः—

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः।[2]
चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।[3]

---

1. न्यायमञ्जरी— 197।
2. ऋग् 1.164.39
3. तत्रैव 1.164.45

चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ।।[1]

इत्येवं रूपेण वैदिकवाङ्मयादिषु ।

वैयाकरणसम्प्रदाये स्फोटवादस्य प्रचलनं कदा प्रभृति समारब्धमिति निश्चप्रचं न शक्यते वक्तुं तथापि पाणिनिना 'अवङ् स्फोटायनस्य' इति सूत्रनिर्माणादवगम्यते यत् पाणिनेः पूर्वमेवास्य प्रचारो वैयाकरणसम्प्रदाये संबभूव । नागेशभट्टेनापि स्वकीये स्फोटवादनामके पुस्तके लिखितम्—

वैयाकरणनागेशः स्फोटायनऋषेर्मतम् ।
परिष्कृत्योक्तवांस्तेन प्रीयतां जगदीश्वरः ।[2]

एतद्वादानुसारं शब्दानां नित्यत्वमङ्गीकार्यम् । शब्दनित्यत्ववाद एवास्य वादस्याधारशिला अस्ति । यद्यपि पाणिनेरष्टाध्याय्याः कस्मिन्नपि सूत्रे स्फोटस्य नाम न दृश्यते तथापि 'तदशिष्यं संज्ञाप्रमाणत्वात्' पृषोदरादीनि यथोपदिष्टम्' इत्यादीनि सूत्राणि प्रणीय पाणिनिना शब्दस्य नित्यत्वं स्पष्टमेवोद्घुष्टम् । 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकमारभता कात्यायनेनापि स्पष्टमेव स्वीकृतं तत् तथ्यम् । महाभाष्यकारेण पतञ्जलिनापि— 'नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः' इत्येवं रूपेण व्याहरता शब्दस्य नित्यत्वमङ्गीकृतम् । तदुक्तम्—

नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः ।
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ।।[3]

एवं प्रकारेण प्राप्तमान्यताकस्यास्य सिद्धान्तस्य प्रौढं विवेचनं भर्तृहरेः वाक्यपदीये द्रष्टुं शक्यते । स्फोटस्य नित्यत्वं ब्रह्मरूपत्वं च स्पष्टीकुर्वतोक्तंतत्र—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।[4]

एवं लक्षणलक्षितस्य स्फोटस्य यद्यप्यस्ति निरूपाधिकत्वं तथापि व्यञ्जकवर्णपदादिरूपेणैवास्माकं ज्ञानविषयता तस्य । ब्रह्मात्मकस्य तस्यैकत्वेऽपि व्यञ्जकध्वनीनामानन्त्येनानन्त्यं भवति । अस्माकं मुखेभ्यः क. ख. ग. इत्यादिवर्णरूपेण, घटपटादिपदरूपेण, 'घटमानयेतिवाक्यरूपेण वा यावन्मात्रं निःसृतं भवति तत् सर्वं ध्वनिरेव । तेन व्यक्तोऽत एव तदाकाराकारितः आन्तरः स्फोट एव शब्दः । स एव सर्वार्थ-

---

1. तत्रैव 4.58.3
2. स्फोटवादः (वे. कृष्णमाचार्यः), पृ. 102 ।
3. वाक्यपदीयं ब्रह्मकांडम्, श्लो. 23 ।
4. तत्रैव श्लोकः 1 ।

वाचकः। वक्तुः मुखात् यादृशो ध्वनिः निःसरति तादृगेव श्रोतुरान्तरोऽभिव्यज्यते स्फोटः। ध्वनिश्च द्विविधो भवति प्राकृतो वैकृतश्च। तत्र प्राकृतस्यैव ध्वनेः कालः स्फोटे उपचर्यते। वैकृतध्वनिस्तु केवलं तत्र द्रुतमध्यविलम्बितादिवृत्तिभेदापादक एव भवति। तदुक्तम्—

स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ॥[1]

न चैवं तत्तत्कालिकवैखरीरूपव्यञ्जकभेदेन स्फोटस्य नानात्वात् तत्रापि अनुगमनाय जातिस्वीकरणमावश्यकमिति वाच्यम्? अनेक जपाकुसुमाभिव्यक्त-स्फटिकस्येव, सहस्रदीपाभिव्यक्तपटस्येव च व्यञ्जकानां नानात्वेऽपि तस्य नानात्वाभावात्। ध्वनिक्रमानुपातितया स्फोटस्य घटशब्दाभिव्यक्तस्फोटे गृहीतशक्तिकस्य कलशशब्दाभिव्यक्तात् स्फोटात् न भवति अर्थप्रत्ययः। अत एव च न भवति पर्यायतापत्ति सरः, रसः इत्यादौ। स्फोटे ध्वनिप्रतिबिम्बसमर्पकाश्च स्थिराः संस्कारा एव सन्ति।

न च ध्वन्यात्मकवर्णातिरिक्तस्य तस्यानुभवविषयत्वाभाव एव शक्यो वेदितुम्? गौरित्येकं पदम् गामानयेत्येकं वाक्यमिति नानावर्णातिरिक्तैकपद-वाक्यावगतेरेव तत्र प्रमाणत्वात्। न चासति बाधकेऽयमेकपदवाक्यावगमः शक्यो मिथ्येति वक्तुम्।

वस्तुतस्तु-स्फोटमन्तरा न शक्यते उपपादयितुं शब्दादर्थं प्रतिजानामि' एकमिदं पदं, वाक्यं वेति सर्वानुभवसिद्धाप्रतीतिः। वर्णानां वाचकत्वे हि एकमिदं पदमिति कथं शक्यते वक्तुं तेषां नानात्वात्। न च वर्णैः सहैवार्थप्रत्ययस्यान्वयव्यतिरेकात् न वर्णव्यतिरिक्तं पदं वाक्यं वा कल्पयितुं शक्यमिति वाच्यम्? कण्ठताल्वाद्यभिघातजन्यानां वर्णानां स्फोटव्यञ्जनायामेवान्वयव्यतिरेकस्य वक्तुं शक्यत्वात्। न च तेषामाशुविनाशितया स्फोटव्यञ्जनमसंभवमिति वाच्यम्? वर्णानां साहित्यस्यासंभवेऽपि पूर्वपूर्ववर्णजनितसंस्कारसहितान्त्यवर्णस्य तव मते वाचकत्वमिव तादृशान्त्यवर्णस्य मम मते स्फोटव्यञ्जकत्वेनाभ्युपगमादनुपपत्तेः परिहारात्।

एवञ्चात्र स्फोटशब्दस्य व्युत्पत्तिद्वयं फलितं भवति—स्फुटति अर्थोयस्मात् असौ स्फोटः, स्फुट्यते वर्णैरिति स्फोटः। प्रथमव्युत्पत्त्या तस्य वाचकत्वं, द्वितीयया च तस्य व्यङ्ग्यत्वं सिद्ध्यति।

उक्तञ्च हरिणा—

द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥[2]

---

1. वाक्यपदीयं ब्रह्मकांडम् श्लोकः 76 स्वोपज्ञटीका।
2. वाक्यपदीयम् 44।

अयमाशयः वाचकशब्दो द्विविधः । एकस्तु श्रोत्रग्राह्यवैखरीरूपः स्फोटरूपप्रकाशनसमर्थः । अपरस्तु आन्तरः स्फोटः अर्थप्रकाशनक्षमः । यथा शमीकाष्ठमध्यगो वह्निः मन्थनादिनोद्बुद्धस्य बहिरुपलभ्यमानस्य वह्नेरुपादानं भवति, तथैव वक्तुः प्रयत्नेन विवृद्धः स्फोटो ध्वनिरूपरुषितः सन् परश्रवणग्राह्यो भवति । परेण श्रुतश्च हृत्स्थं स्फोटमभिव्यज्यार्थं व्यनक्ति । नास्ति ध्वनिभिन्नोऽन्यः कश्चित् तस्य व्यञ्जक इति न भवति ध्वनिरहितस्य स्फोटस्य प्रत्यक्षम् । वाचारम्भणं विकारनामधेयं मृत्तिकेत्येव सत्यमितिवत् ध्वनिरूपोपाधिरेव भिन्नः स्फोटस्तु एक एव । अत एव सोऽयं गकारः' इति जायते व्यवहारः । अत एव ध्वनीनां क्षणिकत्वेन स्फोटस्य च नित्यत्वेन तत्र व्याकरणशास्त्रप्रक्रियानिर्वाहकस्य पौर्वापर्यव्यवहारस्यासंभावनाभीतिरपि दूरत एवोत्सारिता । पौर्वापर्यव्यवहारस्य तत्प्रयुक्तनिखिलविकारजातस्य च केवलं बौद्धिकत्वेनानुपपत्तेरेवानुदयात् । यच्चोक्तम्—

> बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्त्ता धीरस्तन्वन्नीतिः ।
> शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम् ।।[1]

वस्तुतस्तु-वैयाकरणसिद्धान्तानुसारं यदनादिनिधनं शब्दात्मकं ब्रह्म तद् ज्ञानार्थमेव प्रकृतिप्रत्ययादिविभागः काल्पनिकः कृतोवर्तते । असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते' 'इति रीत्या शास्त्रेषु प्रक्रियाभेदेनाविद्याया एवोपवर्णनम् । तत एव च सत्यस्योपलब्धिः ।

अयञ्च स्फोटात्मकः शब्दस्तत्तत्प्राणिहृदयदेशावच्छिन्नाकाशदेशस्थः सर्वसमष्टेर्विराजो हृदयरूपबाह्याकाशदेशस्थश्च । एवञ्च सर्वगतोऽपि स्फोटो ज्ञातमर्थं विवक्षोः पुंसः इच्छया जातेन प्रयत्नेन यदा मूलाधारे संस्कृतपवनेनाभिव्यज्यते तदा परा वाग् इत्युच्यते । नाभिपर्यन्तमागच्छता तेन वायुना अभिव्यक्तः केवलं मनोविषयः सूक्ष्मतरः पश्यन्तीत्युच्यते । हृदयपर्यन्तमागच्छता तेन वायुना अभिव्यक्तः परश्रवणग्रहणायोग्यः सूक्ष्मो मध्यमा वागित्युच्यते । प्राप्त्य कण्ठदेशं मूर्धानमाहत्य परावृत्तेन वायुना अभिव्यक्तो हि स्फोटो वैखरी नाम्ना प्रसिद्धः ।[2]

तदुक्तम्—

> परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
> हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।।[3]

1. वैयाकरणसिद्धान्तलघुमञ्जूषा पृष्ठम् 159 ।
2. तत्रैव,— पृष्ठम् 148 ।
3. वाक्यपदीयटीका श्लोकः 142 ।

सा चेयं चतुर्धा वाक् व्याकरणविषया । यदप्युच्यते—

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ।।[1]

इति हरिकारिकानुसारं तिसृणामेव वाचां व्याकरणविषयत्वमिति तत्र जिज्ञास्यते—किमिदं व्याकरणविषयत्वं नाम ? व्युत्पादनेन व्याकरणविषयत्वमभिप्रेतमत्रोताहो प्रतिपाद्यत्वेन ? तत्र न तावदाद्यः परायाः वाचः अत्यन्तं सूक्ष्मत्वेन प्रकृतिप्रत्यय-विभागानर्हतया व्याकरणासंस्कार्यत्वादित्युच्यते चेत् किमति पश्यन्त्याः स्वीक्रियते व्याकरणविषयत्वम् । न ह्यत्रापि प्रकृतिप्रत्ययादिविभागद्वारा व्युत्पादने व्याकरणस्य गतिः । यदि च व्याख्यानात्मकप्रतिपाद्यत्वेनाविषयत्वमभिलषितं, तदा वदतो व्याघातः । पश्यन्त्या इव व्याख्यानात्मकप्रतिपादनस्य परायाः कृतेऽपि व्याकरणे दृष्टचरत्वात् । अत एव—

प्राप्तरूपविभागाया यो वाचः परमो रसः ।
यत्तत् पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः ।।[2]

इति कारिकया हरिणैव व्याकरणस्याञ्जसमार्गत्वं परायाः कृतेः व्यवस्थापितम् । यद्यपि भर्तृहरिपूर्वभाविनः पाणिन्यादयो महर्षयो नामग्राहं परापश्यन्तीमध्यमा-वैखरीति विभागो न प्रदर्शितः क्वापि, तथापि 'चत्वारिवाक् परिमिता पदानि' इति वैदिकमान्यताप्राप्तस्य वाण्याश्चतुर्विधत्वस्य विस्तृतं विवेचनं "वैखर्या मध्यमायाश्च" इति श्लोकस्य स्वोपज्ञटीकायां भर्तृहरिणा स्वयमेव कृतम् । अन्ते च तत्रैव तेनोक्तम्—'सैषा त्रयी वाक् चैतन्यग्रन्थिवदनाख्येयपरिमाणा तुरीयेण मनुष्येषु प्रत्यवभासते ।'[3]

चैतन्ययो र्जीवब्रह्मणोर्ग्रन्थिविवर्तवत् अनाख्येयपरिमाणा सैषा त्रयीवाक् परामाधारीकृत्य चतुर्विधा, या तुरीयेण वैखरीरूपेण मानवानां व्यवहारप्रयोजिका भवतीति तदीयं तात्पर्यम् । अत एव 'गुहा त्रीणि निहिता' इत्यस्यापि सार्थक्यं जायते । अन्यथा 'चत्वारि वाक्' इत्यस्य नामाख्यातोपर्गनिपाताः' इत्यर्थे क्रियमाणे गुहायां निहितत्वं कथमपि नोपपद्येत ।

एतेन व्याकरणस्य त्रिविधा वाक् विषयस्तथा भर्तृहरिः वाचस्त्रैविध्यमेवाङ्गी-कुरुते' इति निखिलं कथनं पराकृतमेव वेदनीयम् ।

अथेदानीमिदमप्यपेक्षते विवेचनीयतां वर्णोत्पत्तिविषयेऽभिव्यक्तिविषये वा प्रतीयमानो मतभेदो वैयाकरणानाम् । तथा पाणिनि [illegible]

S.R.K.S. VIDYAPEETHA
JAMMU
Book No. 22576
Call No

---

1. वाक्यपदीयम् श्लोकः142 ब्रह्मकांडम् ।
2. वाक्यपदीयम् श्लोकः 12
3. तत्रैव स्वोपज्ञटीका श्लोकः 142

आत्माबुद्ध्या समेत्यार्थान् मनोयुङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।[1]
वर्णाञ्जनयते...

भर्तृहरिणाच—

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।
कैश्चित् दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः ।।[2]

इत्युपक्रम्य वायोः शब्दत्वापत्तिरेवं प्रादर्शि—

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ।।[3]

ज्ञानस्य च कथं शब्दत्वमिति विषये तेनोक्तम्—

अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मनास्थितम् ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ।।
स मनोभवमापद्य तेजसा पाकमागतः ।
वायुमाविशति प्राणमथासौ समुदीर्यते ।।[4]

नागेशेन तु मञ्जूषायां वायोरणूनामिति श्लोको वैखरीपर इति स्वीकुर्वता मूलाधारस्थपराशक्तेरेव पश्यन्त्यादिक्रमेण शब्दरूपपरिणाम इति प्रत्यपादि । अत्र विषये प्रतिभातीत्थं समन्वयो मे यद् पाणिनिना यदुक्तं 'वर्णान् जनयते' इति तत्र जनयते इत्यस्याभिव्यञ्जयतीत्यर्थः । तथा च तस्य ह्युर्युक्तज्ञानस्य शब्दत्वप्रक्रियातः ऐकरूप्यं जायते । वायोरपिशब्दत्वापत्तिस्तथैव प्रतिभाति यथा नाभिप्रदेशात् प्रयत्नप्रेरितो वायुरुर्ध्वमाक्रमन् ताल्वादिस्थानमभिहन्ति ततश्च वर्णनिष्पत्तिरभिव्यक्तिर्वा। वस्तुतस्तु उपर्युक्तमतत्रयेऽपि अल्पीयासं भेदं प्रदर्श्य वायुद्वारा वर्णाभिव्यक्तिरुक्ता । तथ्यमप्येतत् हृदयदेशावच्छिन्नस्य नित्यात्मनः शब्दब्रह्मणो वर्णपदादिरूपेणाभिव्यक्तौ वायोः साहाय्यं नान्तरीयकमेव ।

केचित्तु-वायोरणूनामिति हरिकारिका शब्दकार्यवादाभिप्रायेणेति वदन्ति । अत एवाणूनां शब्दत्वापत्तिः संगता भवतीत्यन्यदेतत् ।

यद्यपि—

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममेतत् विश्वं व्यवर्तत ।।[5]

---

1. पाणिनीयशिक्षा ।
2. वाक्यपदीयं ब्रह्मकांडम् श्लोकः 107 ।
3. तत्रैव 108 ।
4. तत्रैव 112, 113 ।
5. तत्रैव 120 ।

अनादिनिधनं ब्रह्मशब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।

इत्येवं प्रकारेण शब्दपरिणामवादः, शब्दविवर्तवादश्च वाक्यपदीये प्रदर्शितो हरिणा तथापि शब्दविवर्तवाद एव वैयाकरणसम्मत इति शक्यते वक्तुंनिश्चप्रचम् । यतो हि विवर्ततेऽर्थभावेनेत्युक्त्या हरिणाऽस्यैव मतस्य दृढीकरणात् । आम्नायविदां मतत्वेनोपन्यस्तस्य परिणामवादस्य परकीयत्वमेवाङ्गीकाराच्च । अत एव—

वागेव विश्वाभुवनानि जज्ञे ।[1]
विभज्य वहुधात्मानं स छन्दस्यः प्रजापतिः ।
छन्दोमयीभि र्मात्राभि र्बहुधैव विवेश तम् ।[2]
वागेवार्थं पश्यति वाग् ब्रवीति ।
वागेवार्थं निहितं सन्तनोति ।।[3]

इत्याद्युक्तिभिः जगतो वाङ्मयत्वप्रतिपादनं संगच्छते ।

एवञ्चोच्चार्यमाणध्वन्यतिरिक्तो निखिलप्रमेयप्रत्यायनक्षमः, ध्वनिव्यङ्ग्यः स्फोटो वैयाकरणमते सिद्ध्यति । ध्वनिः स्फोटस्य व्यञ्जकः अतः शब्दगुणः । पतञ्जलिनाऽप्युक्तं— स्फोटः शब्दः, ध्वनिः शब्दगुणः । एवं स्थितेऽत्र केचिद् वदन्ति— वर्णानां क्षणित्वे मानाभावात् वर्णा एव शब्दाः । तेषामेव तत्तदर्थैः सह शक्तिरूपः सम्बन्धः । ते चाकारादयो वर्णाः परमाणुवन्निरवयवाः सन्त्येकत्व-विशिष्टाः । उच्चारणभेदेन कालभेदेन च तत्रान्यत्वं न शंकनीयम्, सोऽयं ककारः' इति प्रत्यभिज्ञायमानत्वेन तत्रैकत्वस्य सिद्धेः । व्यक्तिभेद एव जातिसत्ता स्वीकारादत्र च तदभावात् नेयं प्रत्यभिज्ञा जातिविषयिणी । उपाधिवशान्मुखस्य नानात्वमिव ध्वनिरूपोपाधिवशात् वर्णेषु प्रतीयते नानात्वमपि । न च तथात्वे वर्णानाम् 'इदमेकं पदं वाक्यं वेति व्यवहारो न स्यादिति न शंक्यम्, एकवुद्धिविषयतया एकं पदमित्या-दिव्यवहाराणामुपपत्तेः । एवञ्च वर्णेभ्य एवार्थप्रतीतिसंभवे समुपेक्षणीया गरीयसी स्फोटकल्पनेति ।

अत्रोच्यते— वर्णानां त्रिकालाबाध्यत्वरूपे सत्यत्वे स्वीक्रियमाणे ब्रह्माति-रिक्तस्यानित्यत्वमिति सिद्धान्तो भज्येत । तस्मात् सृष्ट्यादौ भावित्वे सति प्रलयकाले विनाशित्वरूपमेव नित्यत्वमङ्गीकार्यं वर्णेषु । तस्मात् सृष्टीनामानन्त्येन तत्प्रयुक्तानन्त्यस्य वर्णेषु दुर्निवारतया खपुष्पायमाणलाघवमूलकस्फोटखंडनं बुद्-ध्यनारूढमेव । न च स्फोटाङ्गीकर्तॄणामपि मते एषा दुरवस्था आपतितैव वर्तत इति वाच्यम् ? अत्र मतेऽपि स्फोटे व्यावहारिकनित्यतायाः एवाङ्गीकारेणादोषात् ।

1. वाक्यपदीय स्वोपज्ञ टीका श्लोक. 120 ।
2. तत्रैव ।
3. तत्रैव श्लोकः 118 ।

तच्च पूर्वोक्तं तवाभिमतमिवास्ति नान्यदिति उभयोः समकक्षत्वे वर्णस्फोटमङ्गीकुर्वतोऽपि पदवाक्यस्फोटात् पलायनस्यानौचित्यमेव । यथा चोक्तं तव मते ।

वर्णा वा ध्वनयो वापि स्फोटं न पदवाक्ययोः ।
व्यञ्जन्ति व्यञ्जकत्वेन यथा दीपप्रभादयः ।
नार्थस्य वाचकः स्फोटो वर्णेभ्यो व्यतिरेकतः ।।[1]

तस्मात्— अत्वकत्वादिधर्मवन्तो वर्णरूपा ध्वनय इव पदवाक्यरूपा अपि ध्वनयस्तदाकाराकारितस्य स्फोटस्य व्यञ्जकाः । पारमार्थिकरूपेण यथा ब्रह्मणि नास्ति प्रपञ्चाध्यासः किन्तु व्यावहारिकरूपेणाध्यस्तः प्रपञ्चोब्रह्मणि तथैव स्फोटात्मके शब्दब्रह्मणि ध्वनिधर्माणां व्यावहारिकमध्यस्तत्वमस्ति इति न काप्यनुपपत्तिः ।

यद्यपि वैयाकरणसिद्धान्ते अष्टौ स्फोटाः स्वीकृतास्तथापि निराकांक्षार्थबोधजनकतया वाक्यस्फोटस्यैव तत्र मुख्यत्वम् । इमानष्टौ स्फोटान् पञ्चविभागे प्रविभज्यैषाम् अन्नामयादिपञ्चकोशैः सह तुलना कृता वैयाकरणभूषणे कौण्डभट्टेन । यथा अन्नमयादयः कोशाः आनन्दमयस्य शुद्धब्रह्मणः प्राप्त्युपायभूताः सन्ति, तथैवात्रापि वर्णपदवाक्यस्फोटाः, अखण्डवाक्यस्फोटात्मकस्य शब्दब्रह्मणः परेत्यपरनामधेस्य प्राप्त्युपायाः सन्ति । यदर्थमुक्तम्—

"तस्यां दृष्टस्वरूपायामधिकारो निवर्तते" ।[2]

1. श्लोकवार्तिकम् 131, 133 श्लोकः ।
2. वाक्यपदीयस्वोपज्ञटीका, 142 श्लोकः ।

समर्थः पदविधिः

कृष्णं श्रितः कृष्णश्रित इव कथं न समासः, 'पश्य देवदत्त कृष्णं, श्रितो विष्णुमित्रो गुरुकुलम्' इत्यत्र। एवमेव कुम्भं करोतीति कुम्भकार इव, मृत्तिकायाः कुम्भं करोतीति विग्रहे 'कर्मण्यण्' इत्यस्य प्रवृत्तिः कथं न ? एवमेव गावः सन्त्यस्य गोमान् 'इतिवत्' देवदत्तस्य गावः सन्त्यत्रेति विग्रहेमतुप् कथं न स्यादिति जिज्ञासायामिदमेव वक्तव्यं यदसामर्थ्यात् नात्र वृत्तय इति। किमिदमसामर्थ्यम् ? कथञ्चात्र तदभाव इति प्रश्ने समुपस्थितं भवति सूत्रमिदम्। तत्र पदत्वावच्छिन्नोद्देश्यताकस्य विधेः भवति समर्थाश्रितत्वम्। समर्थो ह्युच्यते सामर्थ्यवानिति। एवञ्च यत्र स्यात् सामर्थ्यं तत्रैव भवति पदविधि र्नान्यत्रेति कृत्वोपर्युक्तोदाहरणेषु वृत्तिघटकत्वेन वाञ्छित पदानां तद् बहिर्भूतैः पदार्थैः सम्बद्धतया, सापेक्षस्य चासमर्थतया न भवन्ति तत्र समासादयो वृत्तय : न चैवं 'राजपुरुषो दर्शनीयः' अत्रापि न स्यात् समासः, पुरुषस्य बाहीकेन दर्शनीयपदार्थेन सहान्वयात्, सापेक्षत्वस्यात्रापि सुस्पष्टं वक्तव्यत्वात् ? अत्रोच्यते-सापेक्षमत्र प्रधानं पुरुषः। भवति च समासः प्रधानस्य सापेक्षत्वेऽपि। प्रधानस्य सापेक्षत्वं न हि सामर्थ्यविघातकम्। न चात्र प्रमाणाभावः ? 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे 'इति सूत्रे' पुरुषो व्याघ्र इव शूर : 'इति सामान्यधर्मप्रयोगे समासवारणायकृतस्य' 'सामान्याप्रयोगे' इति ग्रहणस्यैव तत्र मानत्वात्। अन्यथा प्रधानस्यपुरुषस्यात्र शूरेण सह सापेक्षतया असमार्थ्यादेव समासाभावे सिद्धे तदभावार्थं कृतस्य 'सामान्याप्रयोगे' इत्यस्य ग्रहणं व्यर्थमेव स्यात्। तस्मात् प्रधानस्य सापेक्षत्वं सामर्थ्यविघातकं न भवतीति निश्चितम्।

न चैवं 'भाष्याब्धिः क्वाति गम्भीरः' इति प्रयोगोऽनुपपन्नः। अत्राप्रधानस्य भाष्यस्यातिगम्भीररूपार्थेन सह सम्बद्धतया सापेक्षत्वादिति वाच्यम् ? नात्र भाष्यमेवाब्धिरिति रूपक समासो येन भाष्यस्याप्राधान्यं स्यात्, किन्तु, भाष्यमब्धिरिवेति उपमिति समासः। अत्रोपमेयस्य भाष्यस्यैव प्राधान्यं न तु तस्याप्राधान्यमित्यदोषात्। रूपकसमासे हि उपमानं प्रधानं भवति, उपमेयञ्चाप्रधानम्। नात्र तथा स्थितिः।

न चैवं प्रधानस्य सापेक्षत्वेऽपि स्यान्नाम सामर्थ्यं, किन्तु अप्रधानस्य सापेक्षत्वे तु स्यादेव सामर्थ्याभाव इति देवदत्तस्य गुरुकुलमिति वाक्यघटके 'गुरुकुले' कथं समासः ? वर्तते ह्यत्राप्रधानस्य गुरोः देवदत्तेन सह सापेक्षत्वमितिवाच्यम् ? गमकत्वादत्र समास इति स्वीकारेणादोषात्। गमकत्वञ्च-वाक्यजन्यशाब्दबोधीय

परस्परनिरूप्य-निरूपकभावापन्नविषयताविलक्षणविषयताकशाब्दबुद्धित्वाजनकत्वे सति तावदर्थविषयकशाब्दबोधजनकत्वम्। यत्र वृत्तिविग्रहयोः समानार्थकत्वं स्यात् तत्रैव गमकत्वम्। उपर्युक्तवाक्ये 'देवदत्तस्य गुरुकुलमित्युच्चार्यमाणे सति प्रतीयते यावानर्थस्ततो न मनागपि भिन्नोऽर्थः प्रतीयते देवदत्तस्य गुरोःकुल मित्युच्यमाने। समासे क्रियमाणे गुरुकुलघटककुलपदार्थे प्रधानीभूतेऽपि नतत्र देवदत्त स्यान्वयः, किन्तु नित्यसाकांक्षे गुरावेव तदीयोऽन्वयः। नह् यत्र वाञ्छितो देवदत्तस्य कुलमित्यर्थः, किन्तु देवदत्तनिरूपितं गुरुत्वमेवात्र प्रतीयते साकांक्षोऽर्थः। तस्मादत्र गमकत्वादेव समासः। क्वचिच्च सौत्रनिर्देशादसमर्थसमासोऽपिदृश्यते—यथा 'असूर्यललाटयोर्दृशितपोः' अत्र सूत्रे असूर्यमित्यत्रासमर्थसमासः। सूर्यं न पश्यन्तीति विग्रहे नञोदृशिनाऽन्वितत्वेन सूर्यशब्देनान्वयाभावात् सामर्थ्याभावः स्पष्ट एव।

'तच्च सामर्थ्यमेकार्थीभावव्यपेक्षेति भेदेन द्विविधम्! तत्रैकार्थीभावं लक्षयता भाष्यकारेणोक्तम्—यत्र पदानि उपसर्जनीभूत स्वार्थानिनिवृत्तस्वार्थानि वा प्रधानार्थोपपादनात् व्यर्थानि, अर्थान्तराभिधायीनि वा स एकार्थीभावः। अस्यायं भावः—वृत्तिविषये जहत्स्वार्थपक्षः, अजहत्स्वार्थपक्षश्चेति पक्षद्वयम्। तत्र उपसर्जनीभूतः स्वार्थो येषां तानि उपसर्जनी-भूतस्वार्थानिइतिव्युत्पत्त्याइतरपदार्थनिष्ठविशेष्यतानिरूपित प्रकारताश्रयत्वमेवाजहत्स्वार्थत्वमुपसर्जनीभूतस्वार्थत्वं वा वाच्यम्। अस्य पक्षस्य स्वीकारादेव महान्तौ बाहू यस्यासौ महाबाहुरित्यत्र महतस्तकारस्यात्वं भवति। किं वा मुनित्रयं नमस्कृत्य' इत्यत्र नमः पदस्य सार्थकतया तद्योगे प्राप्ता चतुर्थी 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति परिभाषया वार्यते। निवृत्तः सर्वथापरित्यक्तोऽर्थो यस्मिन् यत्र वेति निवृत्तस्वार्थपक्षेऽर्थात् जहत्स्वार्थपक्षे उपर्युक्तोदाहरणद्वये महत् शब्दस्य नमः पदस्य च निरर्थकतया आत्वं, चतुर्थी प्राप्तिश्च दुर्लभैव स्यात्। एतेन स्पष्टंयत्—पृथगुपस्थितिविषयार्थकत्वेन दृष्टानां पदानां विशिष्टविषयैकशक्त्या विशिष्टार्थप्रतिपादकत्वमेकार्थीभावत्वम्। स्वार्थपर्यवसायिनां पदानामाकांक्षादिवशात् यः परस्परान्वयस्तत् व्यपेक्षानामकं सामर्थ्यम्। तत्र 'राजपुरुष' इत्यत्रैकार्थीभावः, राज्ञः पुरुषः 'इत्यत्र व्यपेक्षेतिप्रथितमेव। व्यपेक्षायां 'राज्ञः पुरुषः' इत्यत्र राजन् शब्दो राजरूपार्थमेवाचष्टे तस्य च प्रकारतावादानुसारंङसर्थेस्वत्वे निरूपितत्वसम्बन्धेनान्वयस्तस्य च स्वत्वस्याश्रयत्वसम्बन्धेन पुरुषेऽन्वयः। तेन राजनिरूपितस्वत्वाश्रयः पुरुष इतिबोधः। ङस्विभक्तीह पद साधुत्वमात्रार्थिकेति राजपदस्याकांक्षाभास्येन स्वत्वसम्बन्धेन पुरुषेऽन्वयात्-स्वत्वसम्बन्धेन राजवान् पुरुष इति व्यपेक्षापक्षीयो बोधः।

एकार्थीभावे राजपुरुष इत्यत्र समासे तु राजपदस्य राजसम्बधिनि लक्षणांविधाय राजसम्बन्ध्यभिन्नः पुरुषः इति बोधः समुदायशक्त्यैव भवतीति स्पष्टमेवात्रैकार्थीभावः। एकार्थीभावे विशिष्टे (समुदाये) शक्ति स्वीकारादेव वृत्तौ राजपुरुषयोः संश्लिष्टतया राज्ञः पदार्थैकदेशत्वेन न भवति तत्र वृत्यघटकस्य

कस्यचित् पदार्थान्तरस्यान्वयः। पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन। अतएव 'ऋद्धस्य राज्ञो मातंगाः, 'तिष्ठ त्वं शंकुलया, खण्डो धावति मुसलेन, 'सुखं गोभ्यो, हितं देवदत्ताय, 'मेधाविनो गर्गस्यापत्यम्' इत्यादौ बाह्यीकेन ऋद्धादिपदेन सापेक्षतया न भवति समासवृत्तिस्तद्धितवृत्तिर्वा।

अयञ्चैकार्थीभावः 'राजन्+ङस्—पुरुष+सु' इत्यलौकिकविग्रहवाक्य एव कल्प्यते, यथा गच्छतीत्यादौ कर्तृरूपार्थ बोधिकां तिबादिशक्ति तत् स्थानिनि लकारे प्रकल्प्य कर्मणि कर्तरि च विधीयते लकारस्तद्वत्। यद्वा लादेशभूतशतृशानचोः अप्रथमासामानाधिकरणं पचन्तं देवदत्तं पश्येत्यादौ दृष्ट्वा, अनुमानात् गम्यते शतृप्रकृतेः लकारस्यापि तद्भवत्येव। न च लोके प्रयोगार्हे लौकिके विग्रहवाक्ये राज्ञः पुरुषः' इत्यादावेव कथं न कल्प्यते एकार्थीभावः? अलौकिके विग्रहवाक्ये तत्कल्पनस्य किमौचित्यमिति चेदवधार्यताम्—लौकिके विग्रहवाक्ये राज्ञः पुरुषः इत्यादौ व्यपेक्षा एव तिष्ठति न कदाचिदेकार्थी भावः। यद्यत्रापि समुदायनिष्ठैकैव शक्तिः स्यात्-संश्लिष्टश्चैकैवार्थः प्रत्याय्येत तदा काऽवश्यकता राजपुरुषादिसमस्त-रूपाणाम्। अतो लौकिके विग्रहवाक्ये व्यस्तानि पदानि पृथक्-पृथक् शक्तिमन्ति स्वार्थबोधपराण्येव।

'राजपुरुषः' इति परिनिष्ठिते यः खलु एकार्थीभावस्तस्य परिकल्पनं तदीये-ऽलौकिके विग्रहवाक्येऽत एव क्रियते येन साधुत्वं स्यात् परिनिष्ठितानां राजपुरुषादी-नाम्। सिद्धानामन्वाख्यानं व्याकरणम्। राजपुरुषादि सिद्धं पदम्। एतस्यान्वा-ख्यानार्थंसूत्रप्रवृत्तिरभीष्टा। समासादिविधायकसूत्राणि न तावत् प्रवृत्तानि भवितुं शक्नुवन्ति यावन्न स्यातत्र सामर्थ्यम्। पदविधेः समर्थाश्रितत्वस्य पूर्वमेव प्रतिपादित-त्वात्। अतः राजपुरुष इति पदे वर्तमान एकार्थीभावस्तदीये ऽलौकिकविग्रह वाक्ये परिकल्प्यते पूर्वं तदनुसामर्थ्यमनुलक्ष्य समासस्ततः प्रातिपदिकत्वेन विभक्तिलुकि नकारादिलोपे विभक्ति कार्येच सिद्धयति वाञ्छितं रूपं राजपुरुषः इति। एवञ्च समस्तरूपादिसिद्धयुपायत्वेन परिकल्प्यतेऽलौकिक-विग्रह वाक्ये एकार्थीभाव इति स्पष्टम्।

इदमत्र विचार्यतेयत् पदत्वावच्छिन्नोद्देश्यताकोविधिश्चेत् भवति समर्थाश्रित-स्तदा 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इतिसूत्र विहितसनः कथं पद-विधित्वं, तस्य धातुमुद्दिश्यविहितत्वेन पदमुद्दिश्य विहितत्वाभावात्। एवं कृत्प्रत्यया-नामपि धातुत्वावच्छिन्नोद्देश्यताकविधेयताश्रयत्वेन पदविधित्वं वक्तुमशक्यम्। एवञ्चेमे विषयोऽसामर्थ्येऽपि कथंन स्युरित्याशंकायां निर्णीतमस्ति यन्न केवलंपदत्वा-वच्छिन्नोद्देश्यतानिरूपितविधेयताश्रयो विधिरेव पदविधिः, किन्तु पदविधि-सहचरितोऽपिविधिः पदविधिशब्देनोच्यते।

पदविधिसहचरितत्वञ्च – पदत्वावच्छिन्नोद्देश्यतानिरूपितविधेयताश्रयीभूत-प्रत्ययविधायकशास्त्रघटितपादघटकशास्त्रविधेयत्वम्। यथा 'सुप आत्मनः क्यच्'

इति सूत्रविहितः क्यच् सुबन्ताद् विहित इति वर्ततेऽत्र पदत्वावच्छिन्नोद्देश्यतानिरूपितविधेयताश्रयः क्यच्। तद्विधायकं शास्त्रं 'सुप आत्मनः क्यच' इति शास्त्रम् तद्घटिततृतीयाध्यायप्रथमपादघटकसूत्रं धातोः कर्मण' इत्यादिसूत्रं तद्विधेयताश्रयत्वेन सनोऽपि पदविधित्वं सुलभम्। एवं कृत्प्रत्ययानामपि तृतीयाध्यायस्थसूत्रैर्विधेयत्वेन पदविधित्वं निर्बाधमेव। अतएव सनादयः कृदादयो वा असामर्थ्ये नैव भवन्ति।

इमे कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपा विषयः पदविधिशब्देन गृह्यन्ते। इम एव पञ्च वृत्तिपदेनाप्युच्यन्ते। वृत्तिर्नाम परार्थभिधानम्। विग्रहवाक्यावयवपदार्थेभ्यः परोऽन्यो योऽयं विशिष्टैकार्थः तत्प्रतिपादिकावृत्तिरित्यर्थः। प्रक्रियादशायां प्रत्येकमर्थवत्वेन प्रथमं विग्रहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादिकावृत्तिरिति यावत्। एवञ्चैकार्थीभावसामर्थ्यंवृत्तिश्चेत्यनर्थान्तरम्। एकार्थीभावसामर्थ्यञ्च 'समर्थः पदविधिः इति परिभाषालभ्यम्। तत्र समासतद्धितयोः पदविधित्वं सुस्पष्टमेव। 'सुप्सुपा' इत्यनुवर्त्य समासविधानात्, सुबन्तात् तद्धितोत्पत्तेः स्वीकाराच्च। द्वन्द्वापवादत्वादेकशेषस्यापि पदविधित्वं सुतरामेव सिद्धम्। कृतां सनाद्यन्तधातूनाञ्च यथा पदविधित्वं तथोपर्युक्तमेव। एवञ्चैतेषु पञ्चविधिषु वृत्तिरेकार्थीभावसामर्थ्यं वा तिष्ठतीति निर्विवादम्।

वृत्यर्थावबोधकं वाक्यमिति यदुच्यते तस्येदं तात्पर्यं यत् यद्यपि वृत्तावेव समुदायशक्त्या विशिष्टैकार्थप्रतिपादकता, न चैतादृशी प्रतिपादकता वाक्ये तिष्ठति तत्र प्रत्येकं पृथगर्थबोधकत्वात्, तथापि समासादिवृतियोग्यविभक्त्यन्तपदानां पृथक् प्रयुज्यमानानां समूहो विग्रहवाक्यमिति बोध्यम्। समर्थः पदविधिरित्यत्र समर्थपदस्य समर्थाश्रिते लक्षणाकृता वर्तते। कथं च सा ? पदविधिः समर्थः कोऽर्थः सामर्थ्यवान् भवेदित्येव वाच्यार्थः क्रियतामिति चेदत्रोच्यते—अस्यां स्थितौ पदविधौ सामर्थ्यं साक्षात् विशेषणं स्यात्, यच्चनैव सम्पद्यते। यतोहि पदविधिः 'समासादिः 'राजपुरुषः' 'कुम्भकारः' इत्यादौ तिष्ठति। राजन्–ङस्–पुरुष–सु इति शब्दस्यैव समाससंज्ञाविधानात्। तत्रैव राजपुरुषः इति पदे एकार्थीभावोऽपीति समाससामर्थ्ययोरेकाधिकरणवृत्तित्वमेव, न तु पदविधेः सामर्थ्यनिष्ठाधेयतानिरूपताधिकरणताश्रयत्वम्। अतः समर्थपदस्य समर्थाश्रिते लक्षणां कृत्वा पदविधिः समर्थाश्रितोऽर्थात् सामर्थ्यवति तिष्ठतीति क्रियते तदीयोऽर्थ इति बोध्यम्।

इदमत्र विज्ञेयम्—वैयाकरणनये व्यपेक्षात्मके सामर्थ्ये समासादिकं न भवति, किन्तु तत्र वाक्यमेवावतिष्ठते। समासप्रकरणे विभाषाधिकारस्याभिमतत्वेऽपि यत्र 'पारेमध्ये षष्ठ्या वा' इत्यादौ विकल्पवाचकानि पदानि श्रूयन्ते तत्रैकार्थीभाव एव पाक्षिकत्वं विधीयते न तु एकार्थीभावव्यपेक्षयोर्मध्ये जायते विकल्पः। तादृश विकल्पस्तु विभाषाधिकारेणैव सिद्धः। अतएव तत्र 'पारेगङ्गम्' इत्यस्याभावपक्षेऽपि एकार्थीभावसद्भावात् षष्ठी समासात् गङ्गापारमित्यपि सिद्धयति। विभाषाधिकारात् व्यपेक्षायां गंगायाः पारमित्यपि सिद्धयतीति विस्पष्टं भाष्यादावित्यलम्।

व्याकरणे कर्मसंज्ञा

कर्मसंज्ञा हि कारकत्वव्याप्यसंज्ञा । सूत्रं च तद्विधायकं कर्तुरीप्सिततममिति पाणिनीयम् । अत्र सूत्रस्थे ईप्सितशब्दे सम्बन्धार्थकः आप्धातुः, ततश्च इच्छार्थकः सन् प्रत्ययः । इच्छार्थकात् धातोः यः क्तप्रत्ययो भवति तस्य तु विषय एवार्थः । एवञ्च ईप्सितशब्दस्य सम्बन्धेच्छाविषयरूपोऽर्थः विषयपदेन च विषयताश्रयस्य ग्रहणम् । विषयता चात्रोद्देश्यताख्या विवक्षिता । एवञ्च सम्बन्धविषयिणी या इच्छा तादृशीच्छीयोद्देश्यताश्रयः कर्म इति फलितं भवति । सम्बन्धश्च प्रकृतधातूपात्त प्रधानीभूतव्यापाराश्रयत्वरूपकर्तृपदार्थकुक्षिप्रविष्टव्यापारद्वारक एव गृह्यते । यद्यपि कर्मत्वेन चिकीर्षितस्य कर्तृव्यापारेण सह साक्षात् सम्बन्धो वक्तुमशक्यः कर्तृव्यापारस्य तन्मात्रसमवेतत्वात, तथापि अत्र व्यापारप्रयोज्यफलेन सह सम्बन्धोऽभिप्रेत ।

एवञ्च कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयत्वप्रकारिका या इच्छा तादृशीच्छीयोद्देश्यं कर्म इति सूत्रार्थः पर्यवस्यति । 'चैत्रः ग्रामं गच्छति' इत्यत्र चैत्रवृत्तिव्यापारः उत्तरदेशसंयोगानुकूलः । फलञ्च उत्तरदेशसंयोगरूपम्, तदाश्रयत्वप्रकारिकेच्छा च– 'मद्वृत्तिव्यापारेण ग्रामः संयोगाश्रयीभूतो भवतु' इति । इयं च इच्छा संयोगरूपफलाश्रयत्वप्रकारिका ग्रामोद्देश्यिकेति भवति कर्मत्वं ग्रामस्य ।

अत्र फलाश्रयता फलतावच्छेदकसम्बन्धेन विवक्षिता । फलतावच्छेदकसम्बन्धश्च कार्यतावच्छेदकः सम्बन्धः । येन सम्बन्धेनाधिकरणे कार्यमुत्पद्यते स सम्बन्ध एव फलतावच्छेदकसम्बन्ध इति स्पष्टोऽर्थः । 'पर्वते तण्डुलं पचति चैत्रः' इत्यत्र समवायेन विक्लितेः तण्डुलेष्वेव सत्त्वेन समवाय एव फलतावच्छेदकसम्बन्ध इति समवायसम्बन्धावच्छिन्न–विक्लितिनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वात् तंडुलस्यैव कर्मत्वं न तु कालिकसम्बन्धावच्छिन्नाधिकरणतावतः पर्वतस्यापि ।

न चैवं प्रयागतः काशीं गच्छति चैत्रे यत् संयोगरूपं फलमुत्पद्यते तस्य द्विष्ठत्वात् स्वरूपतः समवायतो वा यथा काश्यां वर्तनं तथैव चैत्रेऽपि इति काश्या इव चैत्रस्यापि फलाश्रयत्वात् जायतां कर्मत्वम् । किञ्च–चैत्रवृत्तिव्यापारेण यथा जायते संयोगः तथैव प्रयागतो विभागोऽपि समुत्पद्यते इति विभागरूपफलाश्रयत्वात् प्रयागस्य कथं न स्यात् कर्मत्वम् ? एकमाशंकायां प्रत्यवतिष्ठन्ते केचित्–क्रियाजन्यफलाश्रयं हि कर्म । तत्र क्रियायां परसमवेतत्वं निवेश्यते । परत्वञ्च यस्य चिकीर्षितं कर्मत्वं

तदपेक्षया ग्राह्यम् । ग्रामं गच्छति चैत्रः' इत्यत्र ग्रामापेक्षया परः चैत्रस्तन्निष्ठक्रिया-जन्यफलाश्रयत्वात् भवति कर्मत्वं ग्रामस्य । चैत्रस्तु न परसमवेतक्रियाजन्यफलाश्रयः, इति न भवितुमर्हति कर्मत्वं तस्य कथंचिदपि ।

यत्र चैको मल्लः पूर्वतः समायातः अपरश्च परतः । आगत्य च तौ संयोगवन्तौ भवतस्तत्र संयोगस्तदनुकूलव्यापारश्चोभयनिष्ठः । परन्तु तत्र यदा एको मल्लः कर्म-संज्ञार्थं फलाश्रयत्वेन विवक्ष्यते तदा तदपेक्षया अन्यं मल्लं गृहीत्वा तत्समवेतक्रिया-जन्यफलाश्रयत्वात् पूर्वस्य कर्मसंज्ञा । तथा यन्निष्ठक्रियामादायास्य कर्मसंज्ञा तस्य कर्तृसंज्ञा च विधीयते इति मल्लो मल्लं गच्छति इति प्रयोगो जायते ।

किन्तु मल्लः स्वं गच्छति इति प्रयोगस्तु नैव भवति, एकस्यैव फलाश्रयत्वात् व्यापाराश्रयत्वाच्च परसमवेत क्रियाजन्यफलाश्रयत्वाभावात् । न च स्वस्य स्वप्रति-योगिकभेदानधिकरणत्वेऽपि उभयाभावमादाय स्वः स्वघटोभयं नेति कृत्वा स्वोऽपि स्वस्मात् भिन्न एवेति एकस्मिन्नेव मल्ले यः संयोगः स तु परसमवेतक्रियाजन्यः सम्पन्न इति एकस्यैव कर्मसंज्ञायां कर्तृसंज्ञायाश्च मल्लः स्वं गच्छति 'चैत्रः चैत्रं गच्छति' इत्यादि प्रयोगापत्तिस्तदवस्थैवेति वाच्यम् ? परसमवेतक्रियेत्यत्र परत्वं भेदः । तत्र द्वितीयाप्रकृत्यर्थस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिकताक-त्वसम्बन्धेनान्वयः । तथा च ग्रामत्वावच्छिन्नप्रतियोगिताकभेदवच्चैत्रसमवेतक्रि-याजन्यफलाश्रयत्वात् यथाग्रामस्य जायते कर्मत्वं न तथा स्वत्वाव-च्छिन्नप्रतियोगिताकभेदवान् स्वः, न वा चैत्रत्वावच्छिन्नप्रतियोगिकताकभेदवांश्चैत्र इति नात्र कर्मत्वसंशीतिलेशोऽपि । गम्धातुप्रयोगस्थले विभागस्यावश्यं जायमानत्वे-ऽपि न तदाश्रयस्य कर्मत्वम् धात्वर्थतावच्छेदक । फलाश्रयस्यैव कर्मत्वमित्यङ्गीकारेण विभागस्य धात्वर्थत्वाभावात् इति ।

अत्र मीमांस्यते—कर्मणो लक्षणे परसमवेतत्वस्य निवेशेऽपि यथा गच्छन्तं प्रेरयति मैत्रे 'गमयति ग्रामं चैत्रं मैत्रः' इति जायते प्रयोगः तथैव पचन्तं प्रेरयति मैत्रे चैत्रभिन्नमैत्रसमवेतविक्लित्यनुकूलव्यापारानुकूलव्यापारजन्यधात्वर्थतावच्छेदकीभूतं यत् विक्लित्यनुकूलव्यापाररूपं फलं तदाश्रयत्वात् चैत्रस्य कर्मत्वं कथं निवार्यताम् । यदि च 'गतिबुद्धि' इत्यादिसूत्रोपात्तातिरिक्तधातुप्रकृतिकण्यन्तस्थले प्रयोज्यस्य कर्मत्वाविवक्षेति स्वीक्रियते तदोक्तदोषाभावेऽपि 'तण्डुलं पचति चैत्रः' इतिवत् 'तंडुलं पच्यते स्वयमेवेति प्रयोगापत्तिर्दुर्वारैव स्यात् । अत्र कर्मणः कर्तृत्वविवक्षया कर्तरि लटि कर्मवदतिदेशात् यगात्मनेपदे दृश्येते । न चात्र तंडुलस्य परसमवेत-क्रियाजन्यफलाश्रयत्वं नास्तीति वाच्यम् ? अग्निसंयोगस्यापि पच्धात्वर्थतया तंडुलभिन्नकाष्ठवृत्यग्निसंयोगरूपक्रियाजन्यफलाश्रयतया द्वितीयापत्तेः सुवचत्वात् ।

तस्मात् चैत्रस्य ग्रामस्येव फलाश्रयत्वेऽपि व्यापाराश्रयत्वस्याधिकस्यापि तत्र वर्तमानतया कर्तृसंज्ञया कर्मसंज्ञायाः बाधात् न तत्र द्वितीयेति सुगमः पन्थाः ।

द्वितीयोत्पत्तौ कर्मसंज्ञैव नियामिका न तु कर्मत्वलक्षणसत्तामात्रं द्वितीया नियामकम्। तथा सति "पाचयति देवदत्तेन विष्णुमित्रः" इत्यत्र णिजर्थव्यापारे विशेषणीभूतविक्लित्यनुकूलव्यापाररूपफलाश्रयस्य देवदत्तस्य कर्मत्वमापद्येत। अतः प्रकृतधात्वर्थमुख्यव्यापारानधिकरणत्वे सति प्रकृतधात्वर्थफलाश्रयत्वं कर्मत्वमित्यङ्गीकार्यम्। तेन न काप्यनुपपत्तिः।

इदमपरमप्यत्र विज्ञेयम्— ईप्सिततमवत् समभिव्याहृतधात्वर्थप्रधानीभूतव्यापारजन्यतद्धात्वर्थफलाश्रयस्यानीप्सितस्यापि कर्मसंज्ञा विधीयते "तथायुक्तं चानीप्सितम्" इति सूत्रेण। अनीप्सितञ्च द्वेष्योदासीनभेदेन द्विविधम्। द्वेष्योदाहरणम् "चौरान् पश्यति" इति। अत्र चौराः दर्शनायोग्या अपि अकस्मात् दृष्टिपथमवतीर्णाः कथं कथमपि दृश्यन्त इति द्वेष्यास्ते। उदासीनं तु प्रथितमेव-ग्रामं गच्छन् तृणं स्पृशति।

कुत्रचिच्च-दुहादीनां द्वादशधातूनां तथा नीहृकृष्वहां च समभिव्याहारे अपादानादीनामविवक्षया तेषां कर्मत्वं विधीयते "अकथितञ्चेति सूत्रेण। तत्रापादानादिशब्दैः केवलम् अपादानम्ः सम्प्रदानम्, अधिकरणञ्चेति कारकत्रयमेव गृह्यते। एषां त्रयाणामेवोक्तषोडशधातुकर्मणा युक्तत्वात्।

तत्र कर्मणा योगो धात्वर्थव्यापारात् प्राग्भावी, कुत्रचिच्च पश्चाद्भावी अपि गृह्यते। यत्र च धात्वर्थव्यापारात् प्राग्भावी कर्मणा सह सम्बन्धः सुलभस्तत्र पश्चाद्भावी सम्बन्धो न ग्राह्यः। गां दोग्धि पयः इत्यत्र दुह् धातोः कर्म पयः। तेन सह गोः सम्बन्धो दोहनात् प्रागासीदिति स्थाल्या सह जाते पश्चात् पयसः सम्बन्धे न भवति कर्मत्वं स्थाल्याः। ब्रूशास्धातुस्थले तु धात्वर्थव्यापारात् पश्चादेव कर्मणा सह सम्बन्धो जायते। ज्ञानानुकूलशब्दप्रयोगरूपो व्यापारः ब्रूञर्थः। तत्र कर्तृव्यापारानन्तरमेव ज्ञानेन युज्यते माणवकः।

अत्र प्राचीनैः अपादानादिभिरविवक्षां कृत्वा सम्बन्धत्वेन तेषां विवक्षा क्रियते। तत्र च प्राप्तां षष्ठीं प्रबाध्य 'अकथितञ्चे' ति कर्मसंज्ञायामपि सम्बन्धप्रकारक एव बोधोऽभ्युपगम्यते तैः, तेन 'गां पयो दोग्धि' इत्यस्य गोसम्बन्धिपयः कर्मकं दोहनमिति बोधस्तेषां नये। नव्यास्तु कर्मसंज्ञायाः चिकीर्षायामपि कर्मत्वेन विवक्षा नेति कथनं वदतो व्याघात इति मन्वानाः अपादात्वादिभिरविवक्षायां सत्यां कर्मत्वेनैव तेषां विवक्षेति वदन्तो गोकर्मकं पयः कर्मकञ्च दोहनमित्यभिप्रयन्ति। यत्र च अकर्मकधातुयोगे देशकालभावगन्तव्याध्ववाचिनां कर्मसंज्ञा भवति, तत्राधिकरणस्य कर्मत्वविधानात् मासाधिकरणकं चैत्रकर्तृकमासनमित्येव बोधः प्राचां नये। नव्यास्तु अत्र स्थले आस्धातोः आसनकरणकव्यापने शक्ति स्वीकृत्य चैत्रः आसनेन मासं व्याप्नोतीति बोधं चाङ्गीकृत्यमासस्य कर्तुरित्यादिना सूत्रेणैव कर्मत्वमिति कर्मण्येवात्र द्वितीयेति वदन्ति।

'गतिबुद्धिप्रत्यवसानार्थ' इत्यादिना सूत्रेण तत्र परिगणितण्यन्तधातुसमभिव्याहारे यत्र प्रयोज्यस्य कर्मत्वं विधीयते तत्रापि प्रयोज्यस्य कर्तृवृत्तिव्यापारजन्यफलाश्रयत्वेन कर्तुरित्यादिनैव कर्मत्वं सिद्धमिति नियमार्थस्य गतिबुद्धीत्यादिसूत्रस्य विधिमुखेन प्रवृत्तिर्ज्ञेया।

यत्र क्वापि कर्मप्रवचनीययोगे दृश्यते द्वितीया, तत्र वस्तुतः फलाश्रयस्य कर्मत्वं न जायतेऽपि तु लक्षणादावर्थे द्योत्ये कर्मप्रवचनीयसंज्ञायां तद्योगे द्वितीयेति तत्रस्थद्वितीयया लक्षणादय एवार्थाः भासन्ते।

इदमत्र तत्त्वम्— साक्षात् व्यापाराश्रयः कर्तेत्युच्यते साक्षात् फलाश्रयश्च कर्म। किन्तु कर्तृकर्मद्वारा यो भवति फलाश्रयो व्यापाराश्रयश्च स उच्यते अधिकरणमिति। यथा कटे शेते चैत्रः इत्यत्र-कटवृत्तिचैत्रवृत्तिशयनक्रिया स्ववृत्तिवृत्तित्वरूपपरम्परासम्बन्धेन कटे वर्तत इति तस्याधिकरणत्वम्। एवम् स्थाल्यां पचतीत्यादौ स्थालीवृत्तिस्तण्डुलस्तद्वृत्तिविक्लित्यात्मिका क्रियेति स्ववृत्तिवृत्तित्वरूपपरम्परासम्बन्धेन स्थाल्याः फलाश्रयत्वात् जायतेऽधिकरणत्वम्। एवमेव यथा फलाश्रयस्य कर्मसंज्ञा भवति, तथैव फलाश्रयाश्रयस्य सम्प्रदानसंज्ञेति कर्मसम्प्रदानसंज्ञयोरपि पार्थक्यं बोध्यम्। यथा विप्राय गां ददाति इत्यत्र गौः भवति स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्ववान् इति तस्य फलाश्रयत्वात् कर्मत्वम्ः किन्तु विप्रविषये दातुः समीहा भवति मद्वृत्तिव्यापारेण विप्रः गोमान् भवत्विति। इयञ्च इच्छा फलाश्रयाश्रयत्वप्रकारिका विप्रोद्देश्यिकेति तस्य सम्प्रदानत्वमिति सूक्ष्मदृशावधेयम्।

कर्मकर्तृमीमांसा

अथेदानीं मीमांस्यते कर्मकर्तृप्रक्रिया । तत्र कर्तृत्वकर्मत्वादयः कारकत्वव्याप्यसंज्ञाः । कारकत्वञ्च क्रियानिष्ठजन्यतानिरूपितजनकतावत्त्वम् । भवति हि प्रत्येकं कारकाणां स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियानिष्पादकत्वम् । 'वह्निना स्थाल्यां तण्डुलं पचति' इत्यादौ वह्नेर्व्यापारो ज्वलनम्, स्थाल्या व्यापारस्तण्डुलस्य धारणम्, तण्डुलनिष्ठो व्यापारः स्थाल्यामुच्छलनमित्येवंरूपेण प्रत्येकं व्यापारोऽनुभवसिद्धो वर्तते एव । एवञ्च सर्वैः कारकैः स्वकीयावान्तरव्यापारद्वारा एका मुख्या क्रिया निष्पाद्यते । तदुक्तम्—

गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ।।

न च 'घटं करोति' इत्यादौ तदानीं घटाभावेन कथं तस्य क्रियाजनकत्वमिति वाच्यम् ? वैयाकरणनये बौद्धपदार्थस्यैव पदवाच्यत्वात्, शाब्दबोधविषयत्वेन बौद्धार्थविषयकबोधतात्पर्येणैव पदानामुच्चारणात् । एवञ्च घटादिपदानां क्रियाजनककर्मादिरूपार्थविषयकबोधतात्पर्येणोच्चरितत्वरूप – 'कर्मणि द्वितीया' इत्यादिशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वेन ततः परं द्वितीयासाधनात् । एवं रीत्या समेषां कारकाणां क्रियाजनकत्वं निर्बाधमस्ति ।

क्रियावाचकश्च धातुर्भवति । धातोश्च फलं व्यापारश्चेत्यर्थद्वयम् । 'फलव्यापारयोः धातुरित्युक्तेः । तत्र फलाश्रयः कर्म व्यापाराश्रयश्च कर्तेति स्थितिः । स चायं कर्ता क्रियानिष्पत्तौ कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थव्यापाराश्रयो भवति । तत्र यदा सौकर्यातिशयं प्रकटयितुं कर्तृव्यापारो न विवक्ष्यते, किन्तु कर्मादिगतव्यापार एव प्रधानत्वेन विवक्ष्यते तदा कर्मादिकारकान्तराण्यपि प्राधान्यमुपगतानि भवन्ति कर्तृपदव्यवहार्याणि, स्वव्यापारे स्वतन्त्रत्वात्, स्वतन्त्रस्य च कर्तृत्वात् ।

तत्र करणाधिकरणनिष्ठव्यापारस्य प्रधानत्वेन विवक्षया जातेऽपि तयोः कर्तृत्वे धातोः सकर्मकत्वं न व्याहन्यते । यतो हि कर्तृव्यापारप्रयोज्यविक्लित्यादिफलानां तत्र वर्तमानतया तदाश्रयाणां कर्मत्वस्य सुलभत्वात् । यथा 'देवदत्तः काष्ठैः ओदनं पचतीत्यादौ काष्ठनिष्ठव्यापारस्य प्रधानधात्वर्थत्वेन विवक्षायां क्रियमाणायामपि विक्लितिनिष्ठाधेयतानिरूपिताधिकरणतायाः ओदने सत्त्वेन फल-

व्यधिकरणव्यापारवाचकत्वात् धातोः सकर्मकत्वम् । अतोऽत्र सकर्मकात् धातोः कर्मणि कर्तरि च प्रत्ययः । कर्तरि यथा–देवदत्तेन किम् ? काष्ठानि स्वयमेव ओदनं पचन्ति । कर्मणि यथा— काष्ठैः ओदनः पच्यते ! एवमधिकरणनिष्ठव्यापारस्य प्रधानत्वेन विवक्षायां 'स्थाली ओदनं पचति' स्थाल्या ओदनः पच्यते' इति कर्तृ-कर्मणोः प्रत्ययः ।

यदा तु कर्मनिष्ठव्यापारस्य प्रधानधात्वर्थत्वेन विवक्षा क्रियते तदा कर्मनिष्ठं फलमेव व्यापारस्थानापन्नं भवति । अतस्तत्र फलान्तराभावेन न कस्यापि कर्मत्वं, किन्तु व्यापाराश्रयत्वादोदनस्य कर्तृत्वं जायते । एवञ्च तत्र कर्मणोऽभावात् धातोरकर्मत्वम् । अथवा तत्र विक्लितिरूपफलाश्रयस्तथा तद्रूपव्यापाराश्रयश्च ओदन एवेति फलसमानाधिकरणव्यापारवाचकत्वात् धातोरकर्मकत्वम् । इयं हि स्थितिः एककर्मकाणां धातूनां वर्तते । तत्र च पूर्वमेककर्मकेभ्यः सम्प्रति च तस्य कर्मणः कर्तृत्वेन विवक्षातः सञ्जाताकर्मकेभ्यो धातुभ्यो भावे कर्तरि च लकारो जायते । तत्र भावे यथा— पच्यते ओदनेन स्वयमेव । कर्तरि यथा— पच्यते ओदनः स्यमेव । अत्रौदनस्य कर्मत्वे तत्र या विक्लितिक्रिया आसीत् सैवेदानीं तस्य कर्तृत्वेऽपि तत्र वर्तत इति कर्मस्थक्रियया तुल्यक्रियत्वेन कर्तुः कर्मवद्भावेन यद्यपि यगात्मनेपदे भवतस्तथापि लादेशेन तिङा कर्तुरभिहितत्वेन कर्तरि प्रथमैव भवति न तु द्वितीयाऽपि कदाचन । न चैवं या कर्मस्था क्रिया सैवेदानीं कर्तृस्था चेत् कथमुभयोः तुल्यत्वं सम्पद्येत ? तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वस्यैव तुल्यपदवाच्यत्वादिति चेत्— ओदनस्य कर्मत्वे तत्समानाधिकरणाविक्लितिः भिन्ना तस्य कर्तृत्वे च तत्समानाधिकरणा विक्लितिः भिन्नेति, उपाधिकृतं भिन्नत्वमादाय भेदघटित-तुल्यत्वस्य निर्वाहात् ।

न चैवंभावे लकारेऽपि पच्धातोः कर्मस्थक्रियातुल्यक्रियत्वेन कर्मवद्भावातिदेशे कर्तुस्तिङानभिहितत्वात् तत्र द्वितीया स्यादिति वाच्यम् । लकारवाच्यस्यैव कर्तुः कर्मवद्भावविधानेन प्रकृते लकारेण भावस्योक्ततया कर्तुरभिधानाभावात् । ये तु द्विकर्मका धातवो दुह्याच्प्रभृतयस्तत्रैकस्य कर्मणः कर्तृत्वेन विवक्षायामपि इतरेण कर्मणा धातूनां सकर्मकत्वमेवावतिष्ठते । तदुक्तम्— "कर्मणः कर्तृत्वविवक्षायां प्राक्सकर्मका अपि प्रायेणाकर्मका इति । अर्थात् द्विकर्मकास्तु सकर्मकत्वं न जहतीत्याशयः । एतादृशेभ्यः सकर्मकधातुभ्यः कर्मणि कर्तरि च लकारो भवति । परन्त्वत्र भवत्येवं विचिकित्सा यदत्र गौणं प्रधानञ्चेति कर्मद्वयम् । तत्र तावत् कस्य कर्मणः कर्तृत्वेन विवक्षा जायतामिति ? अत्रोच्यते— 'गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्" इति वार्तिकानुसारं यस्मिन् कर्मणि प्रत्ययोऽभिप्रेतस्तस्यैव कर्मणः क्रियतां विवक्षा कर्तृत्वेन । अत एव 'स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी' इति श्लोके 'मेदिनी स्वयमेव वसूनि प्रदुग्धे' इत्येवंरूपेण

गौणकर्मणः कर्तृत्वेन विवक्षायां भारवेरुदाहरणं संगतं भवति कर्तृवाच्ये। कर्मणि तु मेदिन्या वसूनि दुह्यन्ते' इत्युदाहरणम्।

न चैतस्यां कर्मकर्तृप्रक्रियायां यदा सौकर्यातिशयं द्योतयितुं प्रथमकक्षस्थं कर्तारमपाकृत्य कर्मैव कर्ता क्रियते, तेन च विधिना धातोरकर्मकत्वमपि सम्पद्यते चेत् कथं 'युज्यते ब्रह्मचारी योगम्' इत्यत्र 'योगः ब्रह्मचारिणं युनक्ति इति प्रथम-कक्षस्य कर्तुः योगस्य कर्मत्वम्? कथञ्च तदादाय धातोः सकर्मकत्वं वा? कर्मणः कर्तृत्वप्रकरणे केयं कर्तुः कर्मत्वविडम्बना? एवमेव तपः तापसं तपति-दुःखयति इति प्रथमकक्षा। ततो द्वितीयकक्षायां तपसा किम्? तापसः स्वयमेव तपस्तप्यते' अत्र प्रथमकक्षस्थस्य कर्तुः तपसः कथं कर्मत्वम्? कथं वा धातोरत्रापि सकर्मकत्व-मिति चेदत्र ब्रूमः—

'योगः ब्रह्मचारिणं युनक्ति' इति प्रथमकक्षायां सम्बन्धानुकूलो व्यापारो हि युजेरर्थः। युनक्तीत्यस्य सम्बध्नाति इत्यर्थः। सम्बन्धश्चात्राश्रयत्वरूपः। अर्थादा-श्रयत्वरूपसम्बन्धेन शमदमादिरूपो योगो ब्रह्मचारिणि तिष्ठति। योगनिष्ठाधेयता-निरूपिताधिकरणता ब्रह्मचारिनिष्ठेति भावः। तत्र ब्रह्मचारिणि या आश्रयता सा योगनिष्ठव्यापारजन्येति आश्रयत्वसम्बन्धरूपफलाश्रयत्वेन ब्रह्मचारिणः कर्मत्वं व्या-पाराश्रयत्वाच्च योगस्य कर्तृत्वं प्रथमकक्षायां सिद्ध्यति। द्वितीयकक्षायान्तु-न केवलं सम्बन्धानुकूलव्यापारमात्रं धात्वर्थः किन्तु प्रतियोगित्वावच्छिन्नसम्बन्धानुकूलो व्यापारो हि युजेरर्थः। योगब्रह्मचारिणोः यः खलु आधाराधेयभावसम्बन्धः, तत्र योगः प्रतियोगी ब्रह्मचारी तु अनुयोगी। एवञ्च प्रतियोगित्वरूपफलाश्रयत्वात् योगस्य कर्मत्वमत्र सिद्ध्यति। न च द्वितीयकक्षायामपि युजेः सम्बन्धमात्रमेवार्थः। योगमिति द्वितीया तु प्रतिशब्दाध्याहारेण तद्योगे 'अभितः परितः इत्यादिनियमेन सेत्स्यति। एवञ्चात्र धातोरकर्मकत्वात् कर्मस्थक्रियातुल्यक्रियत्वाच्च 'कर्मवत्कर्मणा-तुल्यक्रियः' इत्यनेनैव कर्मवद्भावोऽपि सिद्ध एवेति 'सृजियुज्यो श्यँस्त्वति' वार्तिक-मपि केवलं श्यन्मात्रविधायकमेवास्तामिति वाच्यम्? उपर्युक्तवार्तिकव्याख्याना-वसरे भाष्यकृता 'दुहिपच्योरितिवार्तिकात् सकर्मकयोरित्यनुवृत्तिं विधाय'सृजियुज्योः सकर्मकयोः कर्ता बहुलं कर्मवद्भवतीति रीत्या व्याख्यातत्वेन तद्विरोधात् उपर्युक्त-कथनस्योपेक्ष्यमाणत्वात्।

'तप्यते तपस्तापसः' इत्यत्र तु' 'तपः तापसं तपति' इति प्रथमकक्षा। अत्र तपिरन्तर्भावितण्यर्थः। शरीरसन्तापानुकूलव्यापारानुकूलव्यापारो धात्वर्थः। शरीरसन्तापानुकूलो व्यापारश्च शरीरसन्तापस्वीकाररूप एव। तदाश्रयत्वात् तापसस्य कर्मत्वम्। तापसनिष्ठतादृशस्वीकाररूपफलानुकूलो व्यापारश्च तपो-निष्ठः। तपः पदार्थश्च शरीरसन्ताप एव। तदीयो व्यापारश्च तापसशरीरे स्वस्वरूपेणावस्थानमेव। एवञ्च तापसस्य कर्मत्वे शरीरसन्तापस्वीकरणरूपा

क्रिया । ततः 'तप्यते तपस्तापसः' इति द्वितीयकक्षायां ण्यर्थस्य त्यागेन कर्मनिष्ठ-व्यापारस्य प्रधानत्वेन विवक्षया 'शरीरसन्तापानुकूलव्यापारः' अर्थात् तदेव स्वीकरणं धात्वर्थः । तदाश्रयत्वात् तापसस्य कर्तृत्वम् । तपसः कर्मत्वन्तु व्यपदेशिवद्भावेन जायते । यथा 'स्तोकमोदनं पचतीत्यत्र फलतावच्छेदकतादात्म्यसम्बन्धेन, व्यपदे-शिवद्भावेन वा विक्लितिः क्रिया विक्लितौ वर्तते तथैव स्तोकेऽपि वर्तते, स्तोकेन सह विक्लितेरभेदान्वयात् । एवञ्च फलाश्रयत्वेन स्तोकस्य तत्र कर्मत्वं जायते । एवमेव 'तप् सन्तापे' इति धातुपाठे सन्तापविशेषस्यानुक्ततया तप्पदेन सन्ताप-सामान्यस्य ग्रहणम् । तस्मात् औणादिके असुनि निष्पन्नस्य तपः शब्दस्य कोऽर्थः ? इति जिज्ञासायां 'स एव सन्तापः' इति भाष्योक्त्या ज्ञानजनकोपवासादौ तपः पदार्थस्य प्रसिद्ध्या च तपः पदेन सन्तापविशेषस्य ग्रहणम् । अत्र प्रकृत्यर्थः सन्ताप-सामान्यम्, प्रत्ययार्थश्च सन्तापविशेषः । ततश्च प्रकृतिप्रत्ययार्थयोरभेदान्वयः । एवञ्च सन्तापविशेषाभिन्नशरीरसन्तापानुकूलव्यापारः तापसकर्तृकः यो द्वितीय-कक्षायां वर्तते, तत्फलं तपोऽर्जनं सन्तापरूपमेवेति यथा तत्फलं तापसे वर्तते तथैव व्यपदेशिवद्भावेन स्वस्मिन्नपि वर्तते । अतः 'तपः' इति क्रियाविशेषणमपि व्यपदे-शिवद्भावेन फलाश्रयः । अतः फलाश्रयत्वात् तस्य कर्मत्वम् । किं वा क्रियाविशेष-णत्वात् तत्र द्वितीयेति बोध्यम् ।

ननु 'देवदत्तो ग्रामं गच्छति' इत्यत्र देवदत्तनिष्ठाधिकरणतानिरूपिताधेयता गमन-क्रियायां वर्तते । एवञ्च क्रियया सह कर्तुः भेदान्वये एव यथा कर्तरि प्रत्ययो भवति, तथैव तत्साहचर्यात् यस्य कर्मणः क्रियायां भेदेनान्वयस्तत्रैव कर्मणि प्रत्ययः । यथा देवदत्तेन स्तोकमोदनः पच्यते 'अत्र विक्लित्तिनिष्ठाधेयतानिरूपिताधिकरण-ताया ओदने सत्त्वेन क्रियया सह तस्य भेदान्वयात् तत्रैव प्रत्ययो नतु विक्लित्या सहाभेदेनान्विते स्तोकेऽपि । एवमेव 'तप्यते तपस्तापसः' इत्यत्र क्रियया सह कर्मणो-ऽभेदेनान्वयात् कर्मवाच्ये प्रत्ययो न स्यादिति चेन्न— सामान्यविशेषभावेन यत्र भवत्यन्वयः कर्मणः क्रियायां तत्रापि कर्मणि प्रत्ययस्याभिप्रेयत्वात् । अत एव 'स्वपो-षानपुषत्' इति प्रयोगे पोषणं पोष इति सामान्यक्रियाया अपुषदितिभूतकालिक-विशेष-क्रियया सहाभेदान्वयेऽपि क्रियाविशेषणे क्लीबत्वमेव, कर्मत्वमेव, कर्मणि प्रत्ययाभाव एवेत्यादिनिखिलनियममुपेक्ष्य द्वितीयाबहुवचनत्वं पुंस्त्वञ्च भाष्यकृतो-दाहृतम् । एवञ्च 'तापसेन तपस्तप्यते' इति कर्मणि प्रत्ययो भवत्येव ।

इदमत्रावधेयम्—कर्मणः कर्तृत्वविवक्षायाम् एककर्मकेभ्यो द्विकर्मकेभ्यो वा धातुभ्यो यदा कर्तरि प्रत्ययः क्रियते तदा कर्मस्थक्रियेभ्यो धातुभ्यः कर्मवद्भावो भवति । धातवो हि द्विधा भवन्ति— कर्तृस्थक्रियाः कर्मस्थक्रियाश्च । यत्र कर्मणि क्रियाकृतं किमपि वैलक्षण्यमुपलभ्यते तत्र कर्मस्थक्रियो धातुः । यथा पक्वेषु तण्डुलेषु छिन्नेषु काष्ठेषु वा क्रियाजन्यवैशिष्ट्यवशात् पचिछिद्भिदादिधातूनां कर्मस्थक्रियत्वं सम्पद्यते । यत्र च क्रियायां किमपि वैलक्षण्यं न जायते, भवति हि तत्र धातोः कर्तृ-

स्थक्रियत्वम् । यथा गतागतग्रामादिषु । नहि पक्वेषु तण्डुलेष्विव गतागतग्रामेषु क्रियाकृतं किमपि वैशिष्टचमुपलभ्यते । कर्तृस्थक्रियाणां धातूनां कर्म प्राप्यकर्मेति नाम्ना व्यवह्रियते । कर्मस्थक्रियाणाञ्च कर्म निर्वर्त्यं विकार्यञ्चोच्यते । तत्र निर्वर्त्य-विकार्ययोरेव कर्मणोः कर्तृत्वविवक्षायां कर्तरिलकारे कर्मवद्भावो जायते न तु प्राप्ये कर्मण्यपि । उक्तञ्च—

निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते ।
न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः ।।

यद्यपि कर्मकर्तृप्रक्रियेति अभिधानात् केवलं कर्मण एव भवति कर्तृत्वमिति प्रतीति-पथमवतरति पूर्वं तथापि अत्र कर्मणःकारकान्तरस्यापि उपलक्षणतया करणाधिकरण-योरपि ग्रहणं भवति । एवञ्चात्र कर्मकरणाधिकरणानि स्वनिष्ठव्यापारस्य प्राधान्येन विवक्षायां कर्तृत्वं लभन्ते । सम्प्रदानापादानयोस्तु न भवति कर्तृत्वम्, असम्भ-वात् । अत एव सर्वत्र कर्मकरणाधिकरणानामेवोदाहरणानि उपलभ्यन्ते इति विस्त-रेणालम् ।

पाणिनिव्याकरणे नियमसूत्राणां परम्परा

प्रथितं खलु पाणिनीयस्य सर्वशास्त्रोपकारकत्वम् । पूर्णवैज्ञानिकरीत्या निरमायि व्याकरणं पाणिनिना । सूत्राणि च प्रसन्नगभीराणि व्यापकलक्ष्यमुपक्षिप्य निरमायिषत । तथा चोक्तम्—

अल्पाक्षरमसंदिग्धं सारवद् विश्वतोमुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ।

एवं लक्षणलक्षितेषु संज्ञापरिभाषादिषड्विधसूत्रेष्वन्यतमं नियमसूत्रं किमपि विशिष्टं स्थानं बिभर्ति पाणिनीयव्याकरणे । पाणिनिना समारोपितः कल्पतरुः, कात्यायनेन पल्लवितः, पतञ्जलिना पूर्णं विकासं नीयमानो निखिलशास्त्रोपयोगित्वेन चकास्तितराम् । नात्र चित्रं यदेतादृशविकासे व्याकरणशास्त्रस्य, नियमसूत्राणां विशिष्टा भूमिका वरीवर्तीति ।

नियमसूत्रं लक्षयता नागेशेनोक्तम् 'अन्यनिवृत्तिफलकसिद्धविषयकविधित्वम् नियमत्वम्'[1] । अर्थात् यदीयमुद्देश्यं प्रकारान्तरेण सिद्धं तादृश आरभ्यमाणो विधिरेव नियमः । प्रकारान्तरेण लक्ष्यसिद्धौ स्वकीयां नान्तरीयामन्यथासिद्धिमवेक्ष्य नियमसूत्रेण तादृशो नियमस्तत्रोपकल्प्यते येन स्वकीयं वैयर्थ्यमपाक्रियेत, निवार्येत चानपेक्षितलक्ष्यस्यावितर्कितोपप्लवः । अत एव तदीयपरिभाषायाम् अन्यनिवृत्तिफलकस्यांशस्य सार्थक्यं जायते । नियमसूत्रस्य स्वरूपं स्पष्टयितुं मीमांसकाभिप्रेतं तदीयं स्वरूपमप्यालोचनीयम् । उक्तञ्च तत्र—

'विधिरत्यन्तमप्राप्तौ, नियमः पाक्षिके सति'

यत् कार्यं पूर्वतो न सिद्धं तस्यापूर्वविधानमेव विधिः । यत्र च विधेः पाक्षिकत्वं प्राप्तमर्थात् भावस्याभावस्य च कादाचित्की प्रवृत्तिः प्राप्ता भवेत् तत्र नियम इति व्यवस्था । यथा 'स्वर्गकामो यजेत्' इति विधिवाक्यम् । नह्येतस्मात् पूर्वं विज्ञातं केनापि यद् योगेनेष्टं भावयेत् इति । तस्मादपूर्वकार्यकारणादिदं वाक्यं विधिवाक्यम् । 'ऋतौ भार्यामुपेयादिति नियमवाक्यम् । रागादिवशात् तद्गमनागमनयोरुभयोरपि कादाचित्कत्वे सिद्धे, सिद्धस्य कथनमात्रत्वेन तस्यानुवादकत्वेन नियमत्वात् । तस्मात् तत्र नियम्यते—'ऋतौ भार्यामुपेयादेव ।

1. शब्देन्दुशेखरः पृ. 325

पाणिनीयशास्त्रे 'इको यणचि' इति विधिसूत्रस्योदाहरणम् । अजव्यवहितपूर्वत्वविशिष्टस्येकः स्थाने यणो विधानं नैतस्मात् पूर्वं केनाप्युपदिष्टम् । तस्मादपूर्वविधायकत्वादस्य विधित्वम् । एवं सन्ति भूयांसि सूत्राणि यानि विधिशब्देनाभिलप्यन्ते । "प्रत्ययलोपे प्रत्ययलक्षणम्" इति नियमसूत्रं वर्तते । लोपोऽपि एकप्रकास्यादेश एवास्ति । एवञ्च यत्र लोपरूप आदेशस्तदितरो वा आदेशः सर्वत्रैव स्थानिवद्भावेनैव कार्यं सेत्स्यतीत्यारभ्यमाणमुक्तसूत्रं सिद्धसाधकत्वेन नियमसूत्रम् ।

वस्तुतस्तु वैयाकरणानां नियमोऽतिरिच्यते मीमांसाभिप्रेतनियमात् । यत्र मीमांसासम्प्रदाये नियमस्थले पाक्षिकत्वमभिप्रेतं तत्र वैयाकरणसम्प्रदाये नैतादृशी स्थितिः । 'तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते' इत्येवं परिभाषितया परिसंख्यया साम्यमावहति नियमसूत्रम् । 'प्रत्ययलोपे प्रत्ययलक्षणमिति' सूत्रस्थले लोपरूपादेशस्थले तदन्यत्र च स्थानिवत्वेन कार्यं सिद्धमिति परिसंख्यया सह नियमस्य साम्यं स्पष्टमेव । एवमेव 'कृत्तद्धितसमासाश्च' इतिसूत्रघटकसमासस्थले तदन्यत्र च च "अर्थवत्" सूत्रेणैव प्रातिपादिकत्वं सिद्धमिति समासग्रहणस्य नियमार्थत्वं जायते ।

यदा नियमसूत्रस्य कार्यक्षेत्रम् अन्यसूत्रेण कवलीकर्त्तुमिष्यते तदा आत्मनीनां वैयर्थ्यभावनामपनीपद्यमानामाकलय्य नियमसूत्रेणोपकल्प्यते कश्चन नियमो येन जायते तस्य सार्थक्यं, भवति च नियम्यसूत्रस्य व्यापकक्षेत्रे संकोचश्च । कल्पितश्च नियमो व्याकरणसिद्धान्तानामङ्गताञ्च भजते ।

नियामकसूत्रद्वारा नियम्यशास्त्रीयोद्देश्यतावच्छेदके केन प्रकारेण जायतां संकोच इति विषये समुपस्थाप्यन्ते विभिन्नरूपाणि । तद्यथानियामकशास्त्रीयोद्देश्यतावच्छेदकम्, तद्व्याप्यम्, तद्व्यापकञ्च । एवं नियम्यशास्त्रीयोद्देश्यतावच्छेदकं, तद्व्याप्यम्, तद्व्यापकञ्च ।

इदमत्रावधेयम्—यद्वशात् कस्यापि शास्त्रस्य वैयर्थ्यसंभावना, तद् नियम्यशास्त्रम् । यच्च तदर्थं नियमयति तन्नियामकशास्त्रम् । यथा कृत्तद्धितसमासाश्चेति सूत्रघटकं समासपदं राजन्-ङस्पुरुष-सु, इति समासस्य प्रातिपदिकसंज्ञाविधानार्थं कृतम् । किन्त्वस्य समुदायस्य धातुप्रत्ययप्रत्ययान्तभिन्नत्वेन अर्थवत् सूत्रेणैव प्रतिपादिकत्वं सिद्धम् । एवञ्च 'समासाश्च' इति व्यर्थं सत् तन्नियामकम् 'अर्थवत्' सूत्रञ्च नियम्यसूत्रम् । तत्र नियामकशास्त्रीयोद्देश्यतावच्छेदकं तद्व्याप्यरूपञ्च समासत्वमेवेति तदतिरिक्तत्वेन नियम्यशास्त्रीयोद्देश्यतावच्छेदके 'अर्थवत्वे' संकोचं विधाय पुनस्तस्य स्वयं संज्ञाविधानमनुचितमेव स्यात् । अतः पूर्वोक्तरीत्या न संकोचः । यदि च नियम्यशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नातिरिक्तत्वेन सकोचः कर्त्तुम् इष्यते, तदपि न वरम् । तथा सति निणम्यशास्त्रम् 'अर्थवत्' सूत्रम्

तदीयोद्देश्यतावच्छेदकं तद्व्यापकरूपञ्च 'अर्थवत्वमेवेति तदतिरिक्तत्वेन संकोचे क्रियमाणे, तस्य वैयर्थ्यं दुर्निवार्यमेव स्यात् । अतो नियामकशास्त्रीयोद्देश्यताव-च्छेदकव्यापकं, नियम्यशास्त्रीयोद्देश्यतावच्छेदकव्याप्यं च यद्रूपं तद्रूपावच्छिन्नाति-रिक्तत्वेन नियम्यशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने संकोचः । अर्थात् नियामक-शास्त्रेण तादृशो धर्मोऽन्वेषणीयो भवति यो नियामकशास्त्रीयोद्देश्यतावच्छेदकस्य व्यापकस्तथा नियम्यशास्त्रीयोद्देश्यतावच्छेदकस्य व्याप्यश्च स्यात् । एतादृशं धर्मं पुरस्कृत्य तदतिरिक्तत्वेन कार्यं कर्त्तुं प्रेर्यते नियम्यशास्त्रम् । यथा प्रकृते नियामकशास्त्रम्— 'समासाश्चेति' तदीयोद्देश्यतावच्छेदकं समासत्वं, तद्व्यापकी-भूतो धर्मः अर्थवत्समुदायत्वं, यतो हि यत्र यत्र समासत्वं तत्र तत्रार्थवत्समुदायत्वं, यत्र च तन्नास्ति 'राज्ञः पुरुषः' इत्यादौ तत्राप्यर्थवत्समुदायत्वमिति तस्य व्यापक-त्वमव्याहतम् । तदेवार्थवत्समुदायत्वंनियम्यशास्त्रस्य 'अर्थवदधातुरप्रत्ययः' इत्याद्य-स्योद्देश्यतावच्छेदकार्थवत्वस्य व्याप्यमपि वर्तते । अतः इममेव धर्ममादाय तदतिरिक्तत्वेन अर्थवत्शास्त्रस्य कृते विधीयते संकोचः । तस्मादर्थवत्सूत्रम् अर्थवत्-समुदायातिरिक्तस्थल एव प्रवर्तिष्यते । अर्थवत्समुदायस्थले प्रातिपदिकत्वं समासाश्चेत्यनेन भविष्यति । तच्च द्विविधं—समासस्थलीयम्, असमास्थलीयञ्च । तत्र समासस्थलीये अर्थवत्समुदाये 'राजन् ङस्पुरुष-सु' इत्यादिस्थले प्रातिपादिकत्वं विधातुं समासग्रहणस्य सार्थक्यं जायते । असमस्तवाक्यस्थले 'राज्ञः पुरुषः' इत्यत्र नानेन प्रातिपदिकत्वं, समासत्वाभावात् । नापि पूर्वसूत्रेण तादृशस्थले तत्संकोचस्योक्त-प्रायत्वात् । तदुक्तम् तेन वाक्यस्य नेत्यादिना ।

इदमत्रावधेयम्— नियामकशास्त्रस्य द्विविधा जायते प्रवृत्तिः विधिमुखेन, निषेधमुखेन च । विधिमुखेन प्रवृत्तेस्तात्पर्यमस्ति यत् नियामकशास्त्रं नियम्यशास्त्री-योद्देश्यतावच्छेदकावच्छिन्ने पूर्वोक्तरीत्या संकोचं विधाय तत्र स्वयमेव कार्यं विधत्ते । यथोदाहृतस्थले 'राजन्-ङस्-पुरुष-सु' इत्यत्र प्रातिपादिकत्वं विधीयते 'समासाश्च' इत्यनेन स्वयमेव । निषेधमुखेन नियामकशास्त्रस्य प्रवृत्तिपक्षे तु स्वीयोद्देश्यताव-च्छेदकव्यापकं तथा नियम्यशास्त्रीयोद्देश्यतावच्छेदकव्याप्यं च यद्रूपं तत्र स्वकीयो-द्देश्यतावच्छेदकातिरिक्तत्वेन पूर्वं संकोचो विधीयते । पश्चाच्च संकोचिततद्रूपा-वच्छिन्नातिरिक्तत्वेन नियम्यशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने जायते संकोचः । यथा प्रकृते 'अर्थवत्समुदायत्वं संकोचकतावच्छेदकं, तत्र पूर्वं समासातिरिक्तत्वेन संकोचः । अर्थात् समासातिरिक्तं यदर्थवत्समुदायत्वं तदतिरिक्तस्थले नियम्यशास्त्रेण कार्यं-करणीयम् । एवञ्च समासाश्चेति शास्त्रीयोद्देश्यतावच्छेदकसमासत्वातिरिक्तं यदर्थवत्समुदायत्वम्— 'राज्ञः पुरुषः' चैत्रो ग्रामं गच्छतीत्यादिरूपं तदतिरिक्तं पुनः 'समासस्थलीयं' राजन्-ङस् पुरुष-सु इति क्षेत्रमेवेति अत्र अर्थवत्सूत्रेणैव प्रातिपदिकत्वम् । अस्मिन् पक्षे नियामकसूत्रस्य लक्ष्येऽपि नियम्यसूत्रेणैव कार्यं विधीयते । समासेतरो योऽर्थवत्समुदायस्तद्भिन्नं यदर्थवत् शब्दस्वरूपं तस्य

प्रतिपादिकसंज्ञास्यादित्येवं रूपेण अर्थवत्सूत्रस्यार्थे क्रियमाणे इतरशब्दप्रयोज्योऽत्रार्थो निषेध इति फलति । सिद्धान्तकौमुद्यां यदुक्तम् 'यत्र संघाते पूर्वोभागः पदं तस्य चेत्तर्हि समासस्यैवेति' तदपि नियामकसूत्रस्य निषेधमुखेन प्रवृत्तिमभ्युपेत्यैव ।

एवञ्च प्रकृते समासाश्चेत्यस्योभयमुखेन प्रवृत्तौ निर्वाहः संभवति, तथापि नियामकसूत्रस्य निषेधमुखेन प्रवृत्तौ प्राप्तबाध–स्वार्थत्याग–परार्थकल्पनेति गौरव-त्रयमापतति । अतो यथासभवं विधिमुखेनैव तत्प्रवृत्तिर्वाच्या । यत्र तु विधिमुखेन प्रवृत्तौ न निर्वाहस्तत्र निषेधमुखेनापि प्रवृत्तिः कर्त्तव्यैव । यथा 'हन्तेः' इत्यनेनैव सिद्धे 'अत्पूर्वस्य' इति सूत्रं नियामकम् । तत्र यदि विधिमुखेन प्रवृत्तिः क्रियते तदा नियम्यशास्त्रीयोद्देश्यतावच्छेदकोपसर्गाव्यवहितोत्तरत्वविशिष्टहन्धातुसम्बन्धिनकार-त्वव्याप्यं तथा नियामकशास्त्रम् अत् पूर्वस्येति उद्देश्यतावच्छेदकहन्धातुसम्बन्ध्य-कारपूर्वकनकारत्वव्यापकीभूतञ्च रूपं हन्धातुसम्बन्धि नत्वं सम्प्राप्तम् । यदि तदतिरिक्तत्वेन नियम्यशास्त्रीयोद्देश्यतावच्छेदके संकोचः स्यात् तदा 'हन्तेः' इति सूत्रस्यैव वैयर्थ्यं स्यात् । अतोऽत्र निषेधमुखेनैव प्रवृत्तिः कर्त्तव्या । तेन–'हन्तेः' इति सूत्रस्य अत्पूर्वकहन्धातुसम्बन्धि नकारेतरहन्धातुनकारस्य णत्वं न इत्यर्थे क्रियमाणे प्रहण्यात् इत्यत्र भवति णत्वं, 'प्रघ्नन्ति' इत्यत्र तु अत्पूर्वकत्वाभावा-न्नणत्वम् ।

नियम्यनियामकभावस्थले लभ्यते एवकारः । तस्य चायोगव्यवच्छेदस्तथा अन्ययोगव्यवच्छेदश्चार्थः । लक्ष्यानुसारं चानयोर्मध्येऽन्यतरस्यग्रहणम् । स्पष्टं चेदं 'प्रातिपादिकार्थलिंगपरिमाणवचनमात्रे प्रथमा' इति सूत्रस्थमात्रग्रहणस्य प्रयोजन-प्रतिपादनावसरे शब्देन्दुशेखरे इत्यलंपल्लवितेन ।

समासविमर्शः

अथेदानीं प्रस्तूयते समासविचारः । समासो हि निखिलशास्त्रोपयोगी । तच्च समासत्वं किमित्याकांक्षायामुच्यते— समसनं समासः । भावे घञ् । समसनं नाम संक्षेपीकरणम् । संक्षेपीकरणञ्च अनेकेषां पदानामेकीभवनम् । तच्च-स्वाव्यवहितोत्तरविभक्तिमपाकृत्य परस्परसम्मेलनरूपम् ।

एवञ्च यत्रानेकानि पदानि स्वप्रकृतिकविभक्तिमपाकृत्य परस्परं सम्मिलितानि विशिष्टार्थबोधकानि स्युस्तत्र समास इति व्यवहारः । तेन 'गवित्ययमाह' 'घटो न' इत्यादौ न दोषः । उक्तस्थलद्वये न भवति विशिष्टार्थसम्प्रत्यः । परन्तु समासस्यैवंविधे लक्षणे क्रियमाणे सुबन्तस्थले दोषाभावेऽपि 'पचतभृज्जता' 'खादतमोदता' इत्यादौ तिङन्तपदानां समासे उक्तलक्षणस्यानागमनादव्याप्तिः स्यादिति समासाधिकारपठितसंज्ञावत्त्वं समासत्वमिति निर्दुष्टं तल्लक्षणं वेदितव्यम् । अधिकारस्थसमासशब्दस्य स्वरूपपरतया नान्योन्याश्रयोऽपि । एतेन सति समासज्ञाने तदधिकारपठितत्वं, तदधिकारपठितत्वज्ञाने च समासत्वमित्यन्योन्याश्रय इति वदन्तः पराकृता एव वेदनीयाः ।

स च समासो मुख्यतया चतुर्विधः अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः द्वन्द्वश्च । तत्र कर्मधारयद्विगुनञुपपदसमासास्तत्पुरुषस्यावान्तरभेदाः ।

कुत्रचिच्च—

सुपां सुपा तिङां नाम्ना धातुनाथ तिङां तिङा ।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥

इत्युक्तिमनुसृत्य समासस्य षड्विधत्वं प्रतिपादितम् । परमेतत् समासभेदकं तत्त्वं नातीवोपयुक्तमव्यापकञ्चास्ते । यतो हि-कटप्रूः, 'आयतस्तूः' इत्यत्र सुपां धातुना सह समाससिद्धये 'क्विब्बचिप्रच्छ्यायतस्तु' इत्यादिवार्तिके धातुसुबन्तयोर्द्वन्द्वघटकतया निर्देशादाश्रीयते निपातनमिति गौरवात् । किञ्च मयूरव्यंसकादयश्च' इत्येकेनैव तत्पुरुषाधिकारस्थसूत्रेण निर्वाहे सिद्धे 'पिबतखादता' इत्यर्थं तिङां तिङेतिप्रविभागः, 'जहिस्तम्भः' इत्यर्थञ्च तिङां सुपेति प्रविभागः पृथक् 2 करणीयो भवतीत्यतिगौरवम् । तस्मात् समासस्योपर्युक्तो विभागः एव साधीयान् ।

तत्र किं नामाव्ययीभावत्वादिकमिति जिज्ञासायां केचित्—पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः, उभयपदार्थ-

प्रधानो द्वन्द्वः । तत्र प्राधान्यञ्च-तत्तत्समासोपस्थितीयमुख्यविशेष्यताश्रयत्वरूपम्, क्रियानिरूपितान्वयितावच्छेदकत्वरूपञ्च । 'राजपुरुषः' इति तत्पुरुषे राजपदार्थनिष्ठप्रकारतानिरूपितविशेष्यतायाः पुरुषे सत्वात् तस्यैव क्रियान्वयाच्च वर्तते तत्र प्राधान्यम् । बहुव्रीहौ तु इतरपदार्थनिष्ठविशेष्यतानिरूपितप्रकारतायाः पीताम्बरपदघटके प्रत्येकं पदे वर्तमानतया भवत्येव समन्वयः । 'ईशकृष्णौ' इत्यादुवभयपदार्थस्य दर्शनादिक्रियान्वयित्वादुभयोः प्राधान्यं स्पष्टमेव । किन्त्वेवमपि सन्ति भूयांसि तत्तत्समासोदाहरणानि यत्रैतल्लक्षणं न संघटते । यथा- उन्मत्ता गंगा यस्मिन् स उन्मत्तगंगो नाम देशः' इत्यत्रान्यपदार्थस्य प्राधान्यात् अव्ययीभावलक्षणस्यासंगतिः, बहुव्रीह्यापत्तिश्च । एवमेव पञ्चानां गंगानां समाहारः पञ्चगंगमित्यत्र समाहारद्विगुलक्षणातिव्याप्तिः पूर्वपदार्थप्राधान्याभावादव्ययीभावलक्षणासंगतिश्च । एवं तत्पुरुषोदाहरणे 'अर्धं पिप्पल्याः' इत्यत्रार्धरूपपूर्वपदार्थस्य प्राधान्यात् तत्पुरुषत्वं न प्राप्नोति, प्राप्नोति चाव्ययीभावत्वम् । एवं 'द्वित्राः' इत्यादावुभयपदार्थप्राधान्यात् द्वन्द्वो व्याप्नोति ।

एवञ्च तत्पुरुषादीनामुपर्युक्तं लक्षणं सांकर्यमुपैतीति स्वीकृतमभियुक्तैस्तस्य प्रायिकत्वम् । अर्थात् तत्पुरुषादौ यस्य यस्य पदार्थस्य प्राधान्यमुक्तं तस्य प्रायः सार्वत्रिकत्वेऽपि कुत्रचिद् विशेषादेशवशाज्जायतेऽन्यथात्वमपीति न दोषः । अस्याञ्च परिस्थितौ पाणिनिसंकेतसम्बन्धेनाव्ययीभावादिपदवत्वमेव अव्ययीभावादिकत्वमाकलनीयम् । तेन न कुत्राप्यव्याप्त्यतिव्याप्ती वा स्तः ।

इदमत्र विमृश्यते— समाहारस्यास्तित्वम् अव्ययीभावे तत्पुरुषे 'द्वन्द्वे' चेति त्रिषु समासेषु भवति । तद्यथा— अव्ययीभावे 'नदीभिश्चेति सूत्रम्' समाहारे चायमिष्यते इति तदुपरिवार्तिकञ्च । पञ्चानां गंगानां समाहारः पञ्चगंगम् इति तदुदाहरणाम् । तत्पुरुषे च 'तद्धितार्थोत्तरपदसमाहारे च' इति सूत्रैकदेशे समुल्लेखः समाहारस्य । अत्रापि दिक्संख्याप्रकृतिकसुबन्तं समाहारे वाच्ये सुबन्तेन सह समस्यते । उदाहरणञ्च पञ्चानां गवां समाहारः पञ्चगवमिति । द्वन्द्वश्चेतरेतरयोगे समाहारे च प्रसिद्ध एव । तत्र प्रथमन्तावद् विचार्यते-कोऽयं समाहारः ? यदि समाहारशब्दः समाहरणं समाहारः इति भावसाधनं स्यात् तदा विप्रकीर्णानामेकत्र राशीकरणात्मकः समूहः समाहारशब्दार्थः स्यात् । एवञ्च पञ्चगवमित्यादौ समूहस्यैव प्रधानत्वान् द्रव्यस्य चाप्रधानत्वात् तस्यानयनादिकं न सम्पद्येत । किञ्च–समाहारशब्दस्य भावसाधनत्वेन समूहार्थकत्वे समूहार्थस्य च तद्धितार्थत्वेनैव गतार्थत्वे सिद्धे सूत्रे समाहारग्रहणमेव व्यर्थं स्यात् ।

यदि च सम्-आङ् पूर्वात् हरतेः कर्मसाधने घञि समाह्रियते इति समाहारः स्वीक्रियते तदा पञ्च कुमार्यः समाहृताः 'पञ्चकुमारि' इत्यत्र समाह्रियमाणस्य कुमार्याद्यर्थस्य प्राधान्यात् समासशास्त्रे च प्रथमानिर्देशाभावात् उपसर्जनसंज्ञा न

स्यात्, ततश्च ह्रस्वो नैव स्यात्। एवञ्चोभयपक्षस्य दोषग्रस्तत्वात् कस्तावत् समाहारशब्दार्थः ? इति चेत्-भावसाधनेन समूह एवेत्यवधेयम्।

न च समाहारशब्दस्य भावसाधनत्वे तद्धितार्थेनैव सिद्धे सूत्रे तद्ग्रहणं व्यर्थमिति शंक्यम् ? तथा सति पञ्चानां कुमारीणां समूह इत्यर्थे समूहार्थकस्य तद्धितस्य प्रसक्तौ 'द्विगोर्लुगनपत्ये' इति स्त्रीप्रत्ययस्यापि लुगापत्त्या पृथक् समाहारग्रहणस्यावश्यकत्वात्।

एवञ्च सिद्धं समूहार्थके समाहारे समासत्रयम्। तत्र शंकते यदि समूह एव द्वन्द्वादिषु समासत्रयेषु समाहारवाच्यस्तदा को लाभः पृथक् 2 समासत्रयकरणेनेति चेदत्रोच्यते— काकानाम्–उलूकानां च समाहारः काकोलूकम्' इति द्वन्द्वस्थलीयसमाहारतः पञ्चानां गवां समाहारः पञ्चगवम् इति तत्पुरुषस्थलीयसमाहारस्य वर्तते स्पष्टमेव वैभिन्न्यम्। यत्र–तत्पुरुषे अभेदेन पञ्चत्वसंख्यानिष्ठप्रकारतानिरूपित-विशेष्यताश्रयाणां गवां समूहः प्रत्याय्यते समासेन, तत्रैव-द्वन्द्वे परस्परं प्रकारताविशेष्यतानापन्नानां स्वातन्त्र्येण पृथगुपस्थितिविशिष्टानां विभिन्नपदार्थानां समाहारो द्योत्यते समासेन।

न चैवं द्वन्द्वतत्पुरुषयोः समाहारे वैभिन्न्येऽपि पञ्चानां गंगानां समाहारः पञ्चगंगम्, इत्यव्ययीभावतः 'पञ्चगवम्' 'पञ्चकुमारि' इति तत्पुरुषस्य को भेदः? किमिति च 'नदीभिश्चेति सूत्रेण साध्येरन् अल्पीयांसि रूपाणि ? कथं न 'तद्धितार्थोत्तरपदसमाहारे चेति' समाहारग्रहणेनैव साधनीयं तत्कार्यमिति चेदत्र ब्रूमः—यदि च 'पञ्चगंगम्' इत्यत्र समाहारद्विगुरभिप्रेयते तदा 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति नियमात् तस्य स्त्रीत्वे 'द्विगोः' इति ङीपि 'पञ्चगंगी' इति स्यात्। न चैतादृशः प्रयोगः कस्याप्यभिमत इति आवश्यकम् 'नदीभिश्च' इति पृथक् सूत्रं विशेषविहितत्वात् तदप्राप्तियोगेऽचारितार्थ्यरूपापवादत्वाच्च प्रबाधतेऽत्र द्विगुम्। इयमेव व्यवस्था समासत्रये समाहारविषये वेदितव्या।

इदानीं विचार्यते— समासे पदशक्त्यतिरिक्ता विशिष्टार्थबोधिका काचित् शक्तिरस्ति न वेति। तत्र तावन्नैयायिकमते पदमेव शक्तम्। अर्थविशेषनिरूपितशक्तिः पदे एव तिष्ठति न तु वाक्येऽपि। वाक्यञ्चानेकपदघटितात्मकम्। तच्च समासे सिद्धमेवेति न वर्तते समासे काचित् विशिष्टा शक्तिः, किन्तु समासघटकानि प्रत्येकं पदानि सन्ति सार्थकानि स्वार्थबोधसमर्थानि। न चः 'राजपुरुषः' इति समासतो राजसम्बन्धवान् पुरुषः, इति बोधस्य सर्वानुभवसिद्धतया समासे शक्तिमन्तरा कथं जायेत तस्य प्रत्ययः ? न च वर्ततेऽत्र सम्बन्धबोधिका विभक्तिरपि यया प्रत्याय्येत सम्बन्धः। तस्मादगत्या समुदायशक्तिरङ्गीकार्येति चेदत्र वदन्ति ते— पदार्थद्वयसंसर्गस्याकांक्षाभास्यत्वमिति नियमाभ्युपगमात् 'राजपुरुषः' इत्यत्र सम्बन्धस्याकांक्षाभास्यत्वमेव भविष्यतीति न तदर्थं विशिष्टशक्तिकल्पनमावश्यकम्।

तथा च स्वत्वसम्बन्धेन राजवान् पुरुषः" इत्येव तत्र बोधः इति न काप्यनुपपत्तिः।

न च येषां मते संसर्गस्य प्रकारत्वं तेषां मते कथं निस्तारः स्यात् विना विशिष्टशक्तिस्वीकारादिति चेत् तत्रापि राजपदस्य राजसम्बन्धिनि लक्षणया तेन सह पुरुषस्याभेदान्वये सम्पन्ने सर्वथैवानुपपत्तेरभावः।

एवं बहुव्रीहौ 'चित्रगुः' इत्यादौ गोपदस्य गोस्वामिनि-लक्षणां कृत्वा गवि चित्राभेदान्वयेन चित्राभिन्ना या गौः तस्याः स्वामीति बोधः सुशकः। न च गोस्वामिनि लक्षणया तदेकदेशेन गोपदार्थेन सह कथं चित्रान्वयः ? एवञ्चेत् गोपदं चित्रगोस्वामिनि लाक्षणिकं चित्रापदञ्च तात्पर्यग्राहकमित्यभ्युपगमान्न दोषः। द्वन्द्वे तु प्रत्येकं पदार्थस्य स्वातन्त्र्येण भानं विभक्त्यर्थान्वयश्चानुभवसिद्ध एवेति नास्त्यावश्यकता तत्र लक्षणायाः। यत्र तु समानविभक्तिकपदानां कर्मधारयः क्रियते तत्र 'नीलोत्पलम्' इत्यादौ संसर्गवादानुसारं जायते, अभेदसम्बन्धेन नीलविशिष्टमुत्पलमिति बोधः। अत्राभेदः आकांक्षाभास्यः। प्रकारतावादानुसारन्तु नीलाभिन्नमुत्पलमिति बोधस्तु कर्त्तुं न शक्यते अभेदोपस्थापिकायाःविभक्तेरभावात्। न च समासस्थले लुप्तविभक्तेरनुसन्धानमभितम्। तस्मादत्रापि नये नीलपदार्थः अभेदेनाकांक्षाभास्येनोत्पलपदार्थे विशेषणम्।

यत्र चासमस्तानि प्रयुज्यन्तेऽनेकानि पदानि तत्र तद्घटितवाक्ये शक्तेरभावात् न भवति लक्षणा कुत्रापि, किन्तु तत्र 'गभीरायां नद्यां घोषः' इत्यादौ नदीपदं गभीरनदीतीरे लाक्षणिकं, गभीरपदञ्च तत्रैवार्थे तात्पर्यग्राहकं भवति। एवं रीत्या सर्वत्रैव समासे विशिष्टशक्तिस्वीकारमन्तरापि कार्ये निर्वाहे किमर्थमङ्गीकार्यातिरिक्ता शक्तिः ? तस्मात् समासघटकानि प्रत्येकं पदानि सार्थकानि। अयमजहत्स्वार्थवृत्तिपक्ष एव व्यपेक्षाशब्देनोच्यते। व्यपेक्षा च-स्वार्थपर्यवसायिनां पदानामाकांक्षादिवशात् परस्परमन्वयः। एवञ्च नैयायिकमतानुसारं समासघटकपदानां सार्थकत्वेनैवोपपत्तौ समासे न काप्यतिरिक्ता शक्तिरिति सिद्धम्। न चैवं 'राजपुरुषः' इत्यत्र राजपदार्थस्य सार्थकतया तत्र वृत्यघटकपदार्थान्तरस्यान्वये 'ऋद्धस्य राजपुरुषः' इति प्रयोगापत्तिरिति वाच्यम् ? सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो नेति सिद्धान्ते जागरूके तथा वक्तुमशक्यत्वात्। न चैवम् 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति सूत्रे 'सामान्याप्रयोगे' इति विशेषणोपादानं व्यर्थम्, 'पुरुषो व्याघ्र इव शूरः' इत्यत्र पुरुषे शूरस्य विशेषणतया समासाप्राप्तेः सुतरां सिद्धत्वेन सामान्याप्रयोगे, इत्यस्यानर्थकत्वात्। तस्मात् विशेष्यस्य साक्षेपत्वेऽपि तन्न सामर्थ्यविघातकमित्यवधार्यते। तेन भवत्येव राजपुरुषः सुन्दरः' इति प्रयोगः।

अत्र वैयाकरणाः— यथा पंकजशब्दे अवयवशक्त्यतिरिक्ता समुदायशक्तिः स्वीकृता तथैव 'राजपुरुषः' इत्यादौ समासेऽपि अवयवशक्तितो भिन्ना समुदायशक्तिरङ्गीकार्या ! सा च शक्तिः राजसम्बन्धविशिष्टपुरुषविषयकबोधजनिका । अत एवात्र विषये जहत्स्वार्थवृत्तिपक्ष एवाङ्गीक्रियते । एतत्पक्षानुसारं पदानि निरर्थकानि । सार्थकन्तु तत्समुदितं वाक्यमेव । अत एवात्र मते 'राजपुरुषः' इत्यादौ राजपदार्थे 'ऋद्धस्येति विशेषणान्वयवारणाय 'वृत्तस्य विशेषणयोगो नेति नियमोप्यनङ्गीकार्य एव भवति ।

न चैवं समासघटकपदानां निरर्थकत्वे 'महाबाहुः' सुपन्थाः इत्यादावात्वं न स्यात् अर्थवद्ग्रहणपरिभाषया सार्थके एव महत्शब्दे पथिन् शब्दे चात्वविधायकसूत्रस्य प्रवृत्तेरितिवाच्यम् ? वृत्तेः प्राग्भाविसार्थकत्वमादायात्वस्य सूपपादनीयत्वात् ।

वस्तुतस्तु समासे समुदायशक्तिस्वीकारेऽपि न युक्तोऽवयवशक्तिपरित्यागः । समासे अवयवशक्तिसहकृतसमुदायशक्तिपक्ष एव प्रतिभाति ज्यायान् । अत एव अवयवानामपि सार्थकतया पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः' इत्यादयः प्राचां प्रवादाः संगच्छन्ते । समासे विशिष्टशक्तिस्वीकारादेव जायते समासस्यार्थवत्वं ततः प्रातिपदिकत्वञ्च । किञ्च विशिष्टशक्तिस्वीकारमन्तरा 'चित्रगुः' इत्यादौ स्वाम्याद्यर्थप्रत्ययो न यास्यति ! न च लक्षणया तत्प्रतीतिर्वाच्या, गोपदस्य तत्स्वामिनि लक्षणायां चित्रापदार्थेन सहान्वये चित्राभिन्नगोस्वामीत्यर्थापत्तेः । चित्रापदस्य तत्र लक्षणायां चित्रस्वामिगौः इत्यर्थापत्तेश्च । समासतः चित्राभिन्ना गौरिति बोधानन्तरं तादृशो गोस्वामी लक्ष्यते इत्युच्यते चेत्, तत्र कस्य पदस्य लक्षणेति विनिगमकस्याभावः । यदि च प्रत्ययसन्निकृष्टत्वात् गोपदस्यैव लक्षणेति स्वीक्रियते तदा अषष्ठ्यर्थबहुव्रीहौ 'प्राप्तोदको ग्रामः इत्यादौ लक्षणायाः असम्भाव्यत्वमस्त्येव । तत्र हि 'प्राप्तः' इत्यत्र कर्तरि क्तः । तथा च नामार्थयोरभेदान्वय इति व्युत्पत्त्या प्राप्तिकर्त्रभिन्नमुदकमिति बोधोत्तरं तत्सम्बन्धिग्रामे लक्षणायामपि न भवितुमर्हति 'उदककर्तृकप्राप्तिकर्मग्राम इत्यभीष्टो बोधः ।

अतोऽनेकक्लिष्टकल्पनामपहाय वरं समासे अतिरिक्तशक्तिकल्पनमेव । एवञ्च पदनिष्ठोद्देश्यतानिरूपितविधेयताश्रयविधेः समासस्य समर्थाश्रितत्वात् यत्रैकार्थीभावरूपं सामर्थ्यं तत्र समासः, यत्र तु व्यपेक्षारूपं सामर्थ्यं तत्र वाक्यमिति द्वैविध्यस्य सुतरामेव सिद्धिरिति, विभाषाधिकारस्यार्थत्वं सिद्ध्यति । नैयायिकरीत्या तु समासे व्यपेक्षावादस्यैव स्वीकरणमिति तन्नये वाक्यं सम्पादयितुं विभाषाधिकारस्यावश्यकत्वमिति गौरवमपि ।

इदमत्रतत्त्वम्— नैयायिकाः समासे खलु केवलमजहत्स्वार्थवृत्तिपक्षमेवाङ्गीकुर्वते । अयमजहत्स्वार्थवृत्तिपक्ष एव तेषां व्यपेक्षावादः । वैयाकरणनये तु—

समासे व्यपेक्षालक्षणमेकार्थीभावश्चेति द्विविधं सामर्थ्यमभिमतम् । तत्रैकार्थीभावे समासो भवति । 'राजपुरुषः' इत्यादीनि च तदुदाहरणानि । अत्रैव एकार्थीभावे जहत्स्वार्थपक्षः, अजहत्स्वार्थपक्षश्चेति पक्षद्वयमभिमतम् । 'राजपुरुषः' इत्यादौ प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन गृहीतान्यपि पदानि समुदायशक्त्या विशिष्टैकार्थ-प्रतिपादकानि भवन्तीति राजाद्यर्थस्य पदार्थैकदेशतया न भवति समासाघटक-पदार्थस्य ऋद्धादेस्तत्रान्वयः । 'देवदत्तस्य गुरुकुलम्' इत्यत्र तु यत्र कुले गुरुविशेषणं, गुरौ च गुरुत्वं विशेषणं तत्र गुरुत्वरूपे पदार्थैकदेशे देवदत्तस्यान्वयो गमकत्वात् भवत्येव। गमकत्वञ्च-वाक्यजन्यशाब्दबोधीयपरस्परनिरूप्यनिरूपकभावापन्नविषय-ताविलक्षणविषयताकशाब्दबुद्धित्वावच्छिन्नाजनकत्वे सति तावदर्थविषयकशाब्द-बोधजनकत्वम् । अर्थात् यत्र वृत्तिविग्रहयोः समानार्थकत्वं स्यात् तत्रैव भवति गमकत्वम् । देवदत्तनिरूपितगुरुत्ववतः कुलमितिवृत्त्यर्थात् नातिरिच्यते 'देवदत्तस्य गुरोः कुलमित्यत्र जायमानः प्रत्ययः । 'ऋद्धस्य राजपुरुषः' इत्यत्र तु न तथा । अत्र तु 'ऋद्धस्य राज्ञः पुरुषः' इति वाक्यतः ऋद्धाभिन्नो यः राजा तस्य पुरुषः' इति प्रतीतिः, ऋद्धस्य राजपुरुषः इत्यत्र वृत्तौ तु ऋद्धस्यान्वयः पुरुषे जायते न तु राजनि' इति वृत्तिविग्रहयो र्वैभिन्न्यस्य स्पष्टत्वात् नात्र गमकत्वमिति युज्यते वक्तुम् । तदुक्तं हरिणा—

> सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते ।
> वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते ॥
> समुदायेन सम्बन्धो येषां गुरुकुलादिना ।
> संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह ।। इति ।

अयञ्चैकार्थीभावः "राजन्-ङस् पुरुष-सु" इत्यलौकिकविग्रहवाक्ये एव कल्प्यते । यथा 'पचतीत्यादौ बोधकतारूपां तिबादिशक्तिं तत्स्थानिनि लकारे प्रकल्प्य कर्मणि कर्तरि च विधीयते लकारस्तद्वत् 'राजपुरुषनिष्ठबोधकता-शक्तिः कल्प्यते तदीयेऽलौकिके विग्रहवाक्ये ।

एवञ्चालौकिकविग्रहवाक्ये श्रूयमाणानां शब्दानां क्लृप्ता या शक्तिस्तस्या-स्त्यागे मानाभावात् प्रत्येकशक्तिसहकारेण समुदायशक्त्या विशिष्टार्थबोध इति साधीयान् पन्थाः ।

जहत्स्वार्थवृत्तिपक्षस्तु तत्रैव स्वीकरणीयः, यत्रावयवार्थविरुद्धः समुदायार्थः स्यात् । तदुक्तम्—

> जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी ।

अश्वगन्धाश्वकर्णादिशब्दे स्पष्टमेव भासते अवयवार्थविरुद्धः समुदायार्थः औषधि-विशेषः व्यक्तिविशेषश्च । अत एतादृशस्थले एव जहत्स्वार्थवृत्तिपक्षोऽङ्गीकार्यः ।

समासे सर्वत्रैव जहत्स्वार्थवृत्तिपक्षस्वीकारे तु 'महाबाहुः' इत्यादौ महत्शब्दस्यानर्थकतया आत्वमेव न स्यात् । भूतपूर्वगत्याश्रयणं तु गौरवग्रस्तमेव ।

अत्र मते यो व्यपेक्षापक्षस्तत्र समासस्तु भवत्येव न हि, किन्तु वाक्यमेवावतिष्ठते । समासप्रकरणे विभाषाधिकारस्याभिमतत्वेऽपि 'यत्र पारे मध्ये षष्ठ्या वा' द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यामित्यादौ विकल्पवाचकानि पदान्युपन्यस्तानि सन्ति तत्र एकार्थीभावे एव पाक्षिकत्वं विधीयते, न तु एकार्थीभावव्यपेक्षयोर्मध्ये जायते तत्र विकल्पः । तादृशविकल्पस्तु "विभाषाधिकारेणैव सिद्धः । अत एव तत्र पारेगङ्गम्" इत्यस्याभावपक्षे षष्ठीसमासात् "गङ्गापारमित्यपि सिद्ध्यति । विभाषाधिकारात् व्यपेक्षया च गङ्गायाः पारमिति वाक्यमपीत्यलं पल्लवितेन ।

'षष्ठीतत्पुरुषनिषेधप्रतिप्रसवयोर्विभिन्नव्याकरणानि'

षष्ठीसमासो विधीयते 'षष्ठी' इति सूत्रेण। तत्र च सुपेति तृतीयान्तं पदमनुवर्त्य तदन्तविधिना षष्ठ्यन्तं सुबन्तेन सह समस्यते, स तत्पुरुष इति सूत्रार्थः। राज्ञः पुरुषः, राजपुरुष इत्युदाहरणप्रदर्शनम्। अस्यसूत्रस्य सामान्यतया समास–विधायकत्वेन 'ब्राह्मणयाजकः' देवपूजकः' इत्यादौ प्राप्तस्तेन समासः 'तृजकाभ्यां कर्तरि' इति सूत्रेण प्रतिषिद्धः 'याजकादिभिश्च' इति सूत्रेण प्रतिप्रसूयते। तत्र याजकादिगणे पाणिनिव्याकरणे पठिताः 'याजक-पूजक–परिचारक-परिवेषक-स्नापक-अध्यापक-उत्साह उद्वर्तक-होतृ-भर्तृ रथगणक-पत्तिगणक-शब्दाः सन्ति। तत्र द्वौ शब्दौ तृजन्तौ, एकस्तु घञ्प्रत्ययान्त उत्साहशब्दः, शेषास्तु वु प्रत्ययान्ताः। ण्वुल्तृचौ तु कर्तरि भवत इति तदन्तयोगे कर्मणोऽनुक्ततया कर्मणि षष्ठी यास्यति। तस्याः समासो यथास्यात् तदर्थं वु प्रत्ययान्ता तृजन्ताश्च पठिता भजन्ते सार्थकत्वम्, किन्तु उत्साहशब्दयोगे कर्मणि, कर्तरि वा षष्ठ्याः निषिद्धसमास-विधानार्थम् उत्साहग्रहणमिति चिन्तनीयः पक्षः।

शाकटायनव्याकरणेतु 'उत्साह' इत्यस्य स्थाने उच्छादक इति पाठो दृश्यते। किञ्चात्रायं गणः 'आकृतिगणः' स्वीकृतः। तेन 'तत्प्रयोजको हेतुश्च' इति निर्देशः संगच्छते। अन्यथा प्रयोजकशब्दस्य गणे पाठाभावात् 'तत्प्रयोजक' इत्यत्र समासः कथं सिद्ध्येत्? तस्मात् पाणिनिव्याकरणानुसारम् 'तत्प्रयोजक इति पदस्य साधुत्वं तथा उत्साहशब्दस्य याजिकादिगणे पाठश्चिन्त्यः। यदि उत्साह इत्यस्य स्थाने 'उत्साहक' इति पाठः परिकल्प्येत तदा स्यात् कथञ्चिदौचित्यमपि तदीयम्।

पाणिनिव्याकरणे षष्ठीसमासनिषेधकानि 'न निर्धारणे' (2।2।10)।

'पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन (2।2।11)'। क्तेन च पूजायाम् (2।2।12)।' 'अधिकरणवाचिना च (2।2।13)' 'कर्मणि च (2।2।14) 'तृजकाभ्यां कर्तरि (2।2।15)।' कर्तरि च (2।2।16)'। इति सप्त सूत्राणि 'तथा प्रतिपदविधाना षष्ठी न समस्यते' इत्येकं वार्तिकञ्चास्ति। वार्तिकेनानेन 'ज्ञोऽविदर्थस्यकरणे इत्यारम्भ'कृत्वोऽर्थप्रयोगेकालेऽधिकरणे' इति यावत् सूत्रविहितषष्ठ्याः समासो निषिध्यते। अन्यथा सति समासे षष्ठ्या लुगेव यदीष्टस्तदा षष्ठी शेषे इत्यनेनैव विधाय षष्ठीं विधीयतां तदीयो लुक्। अतो लुगभावाय समासाभावो विधीयते वार्तिकेन।

शाकटायनव्याकरणे तु षष्ठीसमासं विधातुं 'षष्ठ्ययत्नात्' इति सूत्रं कृत-मस्ति। तात्पर्यमस्येदं यद् या षष्ठी यत्नमन्तरा सम्पाद्यते सैव समस्यते सुबन्तेन न

तु यत्नसम्पाद्या षष्ठी । षष्ठ्या यत्नसम्पाद्यत्वं तत्रैव भवति यत्र कर्मकरणाधिकरणानां शेषत्वेन विवक्षां विधाय तत्र षष्ठी क्रियते । एतादृशी षष्ठी तु ज्ञोऽविदर्थस्य करणे' इत्यादि सप्तभिः सूत्रैरेवविधीयते । तस्मात् यत्नसाध्यषष्ठ्याः समासस्य स्वयमेवाप्राप्त्या 'प्रतिपदविधाना षष्ठी न समस्यत इति वचनमन्यथासिद्धमेव शाकटायनानुसारम् । अत्र सूत्रे षष्ठीसमासनिषेधाय 'न कर्तरि' (2।1।47) 'कर्मणि त्रा च' (2।1।48) 'तृतीयायाम्' (2।1।49) 'तृप्तार्थाव्ययनिर्धायइच्छत्रानशमतिपूजाधारक्तैः' (2।1।50) गुणैरस्वस्थैः' (2।1।51) । इति पञ्च सूत्राण्येव कृतानि । तत्र 'गुणैरस्वस्थैः' इति शाकटायनसूत्रं, पाणिनिसूत्र पूरणगुणेत्यादिगतगुण ग्रहणेन गतार्थमस्ति । पाणिनीयं 'न निर्धारणे' अधिकरणवाचिना चेति' सूत्रद्वयञ्च शाकटायनानुसारम् 'तृप्तार्थेत्यादिसूत्रघटक निर्धायाधारक्तशब्दाभ्यां गतार्थमिति वेदनीयम् । किञ्च तत्रस्थेन पूजाग्रहणेन' क्तेन च पूजायाम् 'इति पाणिनीयं गतार्थं भवति । एवं रीत्या किञ्चिद् व्यत्यासेन यद्यप्युभयत्र फलैक्यमेवावलोक्यते, तथापि पाणिनीये तव्यत्प्रत्ययान्तेनापि समासस्य निषेधपुरः सरं 'ब्राह्मणस्यकर्त्तव्यम्' तथा समानाधिकरणसमास्य निषेधं कृत्वा 'तक्षकस्य सर्पस्य' इति यदुदाहृतं तत्त शाकटायनव्याकरणद्वारा न सिद्धयति । अत एव 'तत्र ब्राह्मणकर्त्तव्यमित्युदाजहार समासं कृत्वा । पाणिनीयव्याकरणेऽपि कर्त्तव्यशब्दस्य तव्यत् प्रत्ययान्तत्वं स्वीकृत्य समासं कृत्वोपयुक्तं रूपं साधयितुं शक्यते, तथापि समासनिषेधयोर्मध्ये स्वरभेदादतिरिक्तं नास्ति किमप्यतिरिक्तं फलमित्यप्याकलनीयम् ।

पाणिनीये षष्ठीसमासनिषेधाय 'कर्मणि च' तृजकाभ्यां कर्तरि 'कर्तरि च' इति सूत्रत्रयस्थाने शकटायनव्याकरणे 'न कर्तरि' कर्मणि त्रा च' तृतीयायाम्' इतिसूत्रमुपलभ्यते । व्याख्यानमप्येषां समानमेव । तथाहि–कर्मणि चेत्यस्य व्याख्यानं कुर्वता दीक्षितेन लिखितम्—'उभयप्राप्तौ कर्मणि' इति सूत्रेण विहिता या षष्ठी सा न समस्यते । कर्मणि या षष्ठी सा न समस्यते' इत्येतादृशोऽर्थः कथं न कृत इति जिज्ञासायामुच्यते यद् तथा सति 'अपां' स्रष्टा 'वज्रस्य भर्ता' इत्यादौ कर्तरितृचि कर्मणि षष्ठ्याः समासनिषेधः 'तृजकाभ्यां कर्तरि' इत्यनेनैव सेत्स्यतीति कर्मणि चेत्यस्य वैयर्थ्यमेव स्यात् । अतः कर्मणि चेत्यत्र चकारशब्दः इतिशब्दस्य पर्यायः स्वीकर्त्तव्यः । तथा च कर्मणि इत्येकवचनमुच्चार्य या षष्ठी विहिता तस्याः समासो न भवतीत्यर्थः । एतादृशस्थलं च भावप्रत्ययान्तदोहादिशब्दसमवधाने एव संभविष्यतीत्युदाहृतम् 'आश्चर्यो गवां दोहोऽगोपेन' इति । न चैवं 'शब्दानुशासनम्' इत्यत्र कथं समासः ? अत्रापि करणल्युटा कर्मानुक्तमेवेति कर्मणि षष्ठ्याः समासस्य निषिद्धत्वादिति वाच्यम् ? उभयप्राप्तौ कर्मणि 'इत्यत्रकृत्वोर्थप्रयोगे कालेऽधिकरणे' इति सूत्रात् प्रयोगे ग्रहणानुवृत्या कर्तृकर्मणोरुभयोः प्रयोगे एव तत्प्रवृत्त्याऽत्राचातथात्वात् 'कर्तृकर्मणोः कृति' इति सूत्रेणैव षष्ठीविधानात् तस्याश्च समासस्य निषेधाभावात् । यद्यत्राचार्यरूपकर्त्तुः प्रयोगः क्रियते तदा 'शेषे विभाषा' इत्यनेन

कर्तृषष्ठ्या विकल्पितत्वेन शब्दानामनुशासनम्आचार्येण, आचार्यस्यवेतिरूपम्। नात्र समासः कर्मणा सह कर्मणि चेति निषेधात्। न वा कर्तृवाचकेन सह समासः सापेक्षत्वेनासमर्थत्वात्।

'तृजकाभ्यां कर्तरि' इत्यस्य व्याख्यानं सिद्धान्तकौमुद्यामेवम्—अत्र कर्तरि तृजकयोरेवविशेषणं न तु षष्ठ्याः, श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान् इति नियमात्। तृजकावत्र श्रुतौ-पठितौ, षष्ठी तु आयात्यन्यतः। अत आह कर्त्रर्थतृज-काभ्यां षष्ठ्या न समासः। अपां स्रष्टा, 'ओदनस्यपाचकः' इत्युदाहरणम्।

इक्षुभक्षिका इत्यत्र तु भावे विहितो वु प्रत्यय इति नात्र कर्मषष्ठ्याः समास-निषेधः किन्तु भवत्येवेतिभावः। न च कर्मणि चेति समासनिषेधः स्यादेवेति वाच्यम्? उभयप्राप्तावित्यत्र प्रयोगग्रहणानुवृत्तिसामर्थ्यात् उभयोःप्रयोग एव षष्ठी विधानेनात्रातथात्वात्। तेन इक्षूणां भक्षणं देवदत्तेनेत्यत्र भवत्येव निषेध इति व्यज्यते।

कर्तरि चेत्यस्य व्याख्यानं कुर्वता दीक्षितेनोक्तम्–अत्र 'तृजकाभ्यां कर्तरीत्यतः अक एवानुवर्तते केवलं न तु तृजपि-तद्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अभावात्। एतेनेदमायातं यदत्र सूत्रे दीक्षितेन कर्तरि पदं षष्ठ्या विशेषणं कृतम्, न तु पूर्वसूत्रे तृजकयोरिव प्रत्ययस्य विशेषणम्। अक प्रत्ययस्तु द्विविधः कर्तृस्थो भावस्थश्च। न चात्र प्रमाणाभावः? तृजकाभ्यां सूत्रस्थकर्तरिग्रहणस्यैव तत्र प्रमाणत्वात्। अन्यथा अकप्रत्ययस्य केवलं कर्त्रर्थकतृचा साहचर्यात्तस्य ग्रहणे सिद्धे कर्तरि ग्रहणं व्यर्थमेव स्यात्। एवञ्चाकप्रत्ययस्योभयपरत्वे भावस्थले कर्त्तुरनुक्ततया तत्र षष्ठी सेत्स्यतीति मनसि निधायाह–कर्तरि षष्ठ्या अकेन न समास इति। भवतः शायिका' इत्यत्र समासाभावः फलमस्य।

शाकटायनव्याकरणे 'न कर्तरि' इति सूत्रस्य व्याख्यानं दीक्षितकृतव्याख्यान-साम्यमेवाञ्चति। तत्र ह्युक्तम्—कर्तरि या षष्ठी सा व प्रत्ययान्तेन सह न समस्यते। भवतः आसिका 'भवतः अग्रगामिका' इत्यादीनि यथा।

कर्मणि त्रा चेत्यस्य तुलना वर्तते 'तृजकाभ्यां कर्तरि' इति सूत्रेण सह। अत्र त्रा प्रत्ययेन तृचो ग्रहणम्। उपरिष्टाच्च वुप्रत्ययानुवृत्तिः। स च अक एव। कर्तरि इत्यपि पदमनुवर्तते। तच्च तृजकयोरेव विशेणम्। तथा च कर्तरि विहितो यो वु प्रत्ययस्तृच् प्रत्ययश्च तदन्तेन सुपा कर्मणि जाता षष्ठी न समस्यते। सक्तूनां पाचकः, 'पुरां भेत्ता' इत्यादीन्युदाहरणानि। पाणिनिव्याकरणे आश्चर्यो गवां दोहोऽगोपेन 'इति प्रयोगसिद्धयर्थं यत्र कर्मणि च' इति सूत्रं विहितं तत्र शाकटायनव्याकरणे 'तृतीयायाम्' इति सूत्रम्। तदर्थश्च–कर्तरि तृतीयायां सत्यां कर्मणि या षष्ठी सा न समस्यते। कर्तरि तृतीया तत्रैव जायते यत्र प्रत्यये कृते कर्तृकर्मणोरुभयोरनुक्तत्वे

प्राप्तोभयत्र षष्ठी 'उभयप्राप्तावित्यादिना कर्मण्येव नियम्यते, तत्र कर्तरि जायते तृतीया। उदाहरणञ्चैतदेव आश्चर्यों गवां दोहोऽगोपेनेति। शब्दानामनुशासनमाचार्येण–आचार्यस्य वा।

एवं रीत्या पाणिनिशाकटायनयोः सूत्रभेदेऽपिव्याख्याने साम्यं फलैक्यं चेति सुस्पष्टम्। किन्तु काशिकायां तृजकाभ्यां कर्तरि' इति सूत्रमन्यथैव व्याख्यातम्। तत्र कर्तरिपदं प्रत्ययविशेषणमकृत्वा षष्ठ्या विशेषणं कृतम्। अत उक्तम्–कर्तरि या षष्ठी सा तृचा अकप्रत्ययमान्तेन च सह न समस्यते। भवतः शायिका, भवतः आसिका 'इत्युदाहृतञ्च। अनेन सिद्धयति यत् पाणिनीये' कर्तरि चेत्यस्य योऽर्थः, यच्चोदाहरणं दत्तमास्ते तदेवात्रास्योदाहारणं व्याख्यानञ्चास्ति। न चैवं व्याख्याने अकप्रत्ययस्य कर्तरिव्यभिचारसंभवेऽपि तृचः कर्तर्येव विहितत्वेन तद्योगे षष्ठ्या असंभवेन व्यर्थमेवात्र तृज्ग्रहणमिति वाच्यम्? तृचो ग्रहणस्योत्तरार्थत्वेनाक्षतेः। किन्तु भाष्यविरुद्धत्वात् काशिकोक्तव्याख्यानं नादरणीयम्। भाष्येहि अस्य सूत्रस्योदाहरणम्—'अपां स्रष्टा' पुरां भेत्ता 'यवानां लावकः' दत्तम्। एषु सर्वत्र कर्मणि षष्ठी। तेन ज्ञायते अस्मिन् सूत्रे कर्तरीति पदं तृजकयोरेव विशेषणं न तु षष्ठ्याः। कर्तरि तृचि अके च कर्मणि षष्ठी निर्बाधेति भाष्यं संगतं भवति।

कर्तरि चेति सूत्रस्यव्याख्यानमपि काशिकायां सिद्धांतकौमुदीतो विपरीतमेव दृश्यते। कौमुद्यां कर्तरीति पदं षष्ठ्या विशेषणम्। किन्तु काशिकायां कर्तरीति पदंतृजकयोर्विशेषणम्। तेनायमर्थः–कर्तरियौ तृजकौ तदन्ताभ्यां षष्ठी न समस्यते। स्पष्टमेवेदं व्याख्यानं सिद्धान्तकौमुद्याः 'तृजकाभ्यां कर्तरि' इतिसूत्रस्य व्याख्यानमस्ति। उदाहरणानि अपि तान्येव सन्ति यानि दत्तानि कौमुद्याम्। स्थितौ चास्यामयं निष्कर्षः-काशिकाकारेण तृजकाभ्यां कर्तरि' इत्यत्र कर्तरिपदं षष्ठ्याः विशेषणं कृतम्। कौमुदीकारेण च तत् तृजकयोर्विशेषणम्। कर्तरिचेति सूत्रे काशिकाकारेण कर्तरि पदं तृजकयोर्विशेषणं कृतं, कौमुदीकारण च तत् षष्ठ्या विशेषणम्। यद्यपि फलैक्यमेव वर्तते उभयोः सिद्धान्तयोस्तथापि कतरत् तद्युक्तमितिविचिकित्सायां कौमुद्युक्तमेव प्रतिभाति युक्तं यतो हि–कौमुदीकारव्याख्यानुसारं तृजकाभ्यां कर्तरि' इति सूत्रे समेषां घटकानां सार्थक्यं जायते। कर्तरि तृजकयोः सतोः कर्मणोऽनुक्तत्वेन तत्र षष्ठ्या विधानेऽनुपपत्यभावात्। काशिकाकारानुसारन्तु तृच्प्रत्यययोगे कर्त्तुरभिहितत्वेनतत्र प्रथमाया एवौचित्येन षष्ठ्यप्राप्तौ तृज्ग्रहणस्योत्तरार्थत्वंस्वीकर्त्तव्यं भवति। न चैवं कौमुदीकारेणापि 'तृजकाभ्यां कर्तरि' इति सूत्रतः अकग्रहणस्यानुवर्तनं 'कर्तरि च' इति सूत्रे कर्त्तव्यं भवत्येवेति किं वैषम्यमुभयोरिति वाच्यम्? यत्र काशिकाकारेण तृजकयोरुभयोरनुवृतिः क्रियते तत्र कौमुदीकारेण केवलमकस्यानुवृत्तिः क्रियते, न तु तृचस्तद्योगे कर्त्तुरभिहितत्वेन षष्ठ्यप्राप्तेः। तस्मात् कौमुद्युक्तमेव वरम्।

अथापरमिदं विचार्यते—भुवः भर्त्ता भूभर्त्ता इत्यत्र 'तृजकाभ्यां कर्तरीति-निषेधात् समासः कथं स्यात् ? यदि चोच्यते 'याजकादिभिश्च' सूत्रेण समासस्तद्गणे भर्तृशब्दस्य पठितत्वादितिचेत् 'वज्रस्य भर्त्ता' इत्यत्रापि कथं न समासः ? इत्याशंकायां शाकटायनेनोत्तरद्वयं दत्तम्–उक्तसूत्रेण समासनिषेधस्तत्रैव भवति यत्र कर्मणि स्यात् षष्ठी, किन्तु नात्रासौ कर्मणि, किन्तु भर्तृशब्दस्य पतिपर्यात्वं स्वीकृत्य स्वस्वामिभावसम्बन्धे षष्ठीसूत्रेण । अथवा पत्यर्थभर्तृशब्दस्य याजकादित्वात् समासः । वज्रस्यभर्त्ता इत्यत्र तु न भर्तृशब्दः पतिपर्यायः किन्तु यौगिकः । कौमुदीकारोऽपियाजकादित्वात् समासमवोचत् । न चैवम्–त्रिभुवनविधातुरित्यत्र समासो नैव स्यात् । वर्तते चात्र कर्मणि षष्ठी । न च पठितो याजकादिगणे विधातृशब्दो येन तेन समासः स्यात् इति चेदत्रोच्यते–नात्र तृच्प्रत्ययः । निषेधश्च भवति तृजन्तेन सह । तस्मान्नात्र निषेधः । न च तृन्योगे षष्ठीविधायकसूत्राभावः ? कर्तृकर्मणोः कृति' इति सूत्रे जागरूके तथा वक्तुमशक्यत्वात् । न च नलोकाव्ययेत्यादिना निषेधादत्र षष्ठी न भविष्यतीति वाच्यम् ? तथा सति कर्मणः शेषत्वविवक्षया अत्र षष्ठीविभावनात् । न च यदि 'कर्तृकर्मणोः कृति' इति निषेधस्थले शेषषष्ठी स्यात् तदा 'मुरस्य मुरं वा द्विषन्' इत्यत्रापि कर्मणः शेषत्वेन विवक्षयैव षष्ठ्यां सिद्धायां 'द्विषः शतुर्वेति वार्तिकस्य व्यर्थतामापन्नस्य कारकषष्ठीनिषेधस्थले शेषषष्ठी न भवतीति ज्ञापनात् कथमत्र शेषषष्ठीति वाच्यम् ? न लोकाव्ययेति निषेधस्यानित्यत्वज्ञापनात्, अत्र कर्मण्येव षष्ठ्याः निर्बाधत्वात् । न च तस्यानित्यत्वे प्रमाणाभाव इति वाच्यम् ? यदि तृन्योगेऽपि षष्ठीनिषेधः स्यात् तदा—'त्रकाभ्यां कर्तरि' इत्याकारकेणैव सूत्रेण सिद्धे तृनोव्यावृत्त्यर्थं तृजित्यनुबन्धसहितनिर्देशो व्यर्थः सन् 'न लोकेत्यादिसूत्रस्यानित्यत्वं बोधयति । तेनात्र कर्मणि षष्ठी सिद्धेति तदन्तस्य भवत्येव समासः । अथवा 'जनिकर्त्तुः प्रकृतिरिति-पाणिनिनिर्देशात् 'तृजकाभ्यां कर्तरि' इति निषेधस्यानित्यत्वं वाभ्युपेयताम् । तेन तृचा योगेऽपि समासो वक्तुं शक्य एवेति संक्षेपः ।

क्रियास्वरूपविमर्शः

जगदिदं व्यवहारमूलकम् । व्यवहारस्य च प्रमुखसाधनं क्रिया । जागतिकाः सर्वे प्राणिनो भवन्ति निरन्तरक्रियाशीलाः । तद्द्वारा गमनशयनजागरणादिक्रियाः प्रतिक्षणं बोभूयमानाः सन्ति । अतो निर्विवादं वक्तुं शक्यते यत् क्रियायां त्रैकालिकतावतिष्ठते । शयानं तिष्ठन्तं वा कञ्चन पुरुषविशेषं दृष्ट्वा नेदं वक्तुं शक्यते यदधुना क्रियारहितोऽयं पुरुषः । यतो हि शयनमवस्थानं वा स्वयमेव क्रिया, या च सम्पाद्यते तस्मिन् समये तेन ।

महान् वैयाकरणोभर्तृहरिः स्वकीये वाक्यपदीये क्रियासम्बन्धे प्रौढं विचारं प्रस्तुतीकृतवानस्ति । विचारेणानेन क्रियास्वरूपोपरि विस्तृतः प्रकाशः पतति । यथा—

यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते । वा 3 8/1

साध्यरूपेण यत् किमपि क्रियते सा क्रिया । तच्च साध्यं सिद्धमसिद्धञ्चेति द्वैविध्यमासादयति । सिद्धस्य तात्पर्यं वस्तुनः सम्पन्नरूपेणास्ति । अर्थाद् यद् वस्तु भूतकालिकं स्यात्, तदेवोच्यते सिद्धमिति । असिद्धस्य तात्पर्यं भूतभिन्नेन वर्तमानेन भविष्यता चास्ति । अनेन प्रकारेण भूतभविष्यद्वर्तमानकालेषु सम्पन्नस्य कस्यापि वस्तुनः साध्यरूपेण कथनं तस्य क्रियात्वपरिचायकमस्ति ।

साध्यपदस्येदं तात्पर्यं यत् वस्तुनः स्थितिः साम्प्रतं न सम्पन्ना, अपितु तस्य आरम्भ एव जातः । तच्च सम्पाद्यमानं वर्तते न तु सम्पन्नम् । उदाहरणार्थम् 'पाकः, पचति' इतीमौ द्वौ शब्दौ ग्राह्यौ । पाकशब्दश्रवणसमकालमेव प्रतीयते यत् पचनक्रिया साम्प्रतं सम्पन्ना वर्तते । इदं क्रियायाः सिद्धरूपम् । किन्तु पचति–शब्दश्रवणेन प्रतीयते यत् पाकक्रिया इदानीं यावत् न सम्पन्ना, अपितु प्रचलति । इदं क्रियायाः साध्यरूपम् । अनेन साध्यरूपेण कालत्रये यस्य वस्तुनः कथनं जायेत सा एव क्रिया । इदं क्रियायाः रूढिस्वरूपम् । अग्रे 'आश्रितक्रमरूपत्वात्' इति-पदेन क्रियायाः यौगिकरूपमपि प्रदर्शितम् । अर्थात् साध्यक्रिया क्रमशः स्वकीयं वास्तविकं पूर्णं स्वरूपमासादयति । अतः क्रमरूपेण क्रियात्वं क्रियाया यौगिक-व्याख्यानम् । अनेन प्रकारेण क्रियाशब्दो यौगिकरूढः सिध्यति । यौगिकरूढिशक्त्या क्रियाशब्दो व्यवहारगतानां सर्वासां साध्यक्रियाणां याः प्रतिक्षणम् अनन्तप्राणिभिरनन्तरूपेण क्रियन्ते तासां वाचकोऽस्ति ।

इदमिदानीं विमर्शनीयं यत् या साध्यक्रिया क्रमशो भवन्ती वर्तते, तथा यस्या अवान्तरा अनेके भेदाः सन्ति सा एका क्रियेति कथं वक्तुं शक्यते। उदाहरणार्थम्— 'रामो विद्यालयात् गृहं गच्छतीति वाक्ये गमनक्रियाया उल्लेखः। किन्तु विद्यालयात् गृहगमने नैकवारं पादविक्षेपः कर्त्तव्यो भवति। प्रत्येकं पादविक्षेपाः स्वस्मिन् नवीनतां बिभ्रति। अस्तित्वं च प्रत्येकं पृथगेव। अस्यां स्थितौ भवत्यत्र एका गमनक्रियेति कथं व्यवहारः? भर्तृहरिणा प्रश्नोऽयं समीचीनप्रकारेण समाहितः। उक्तं तेन—

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते।

तात्पर्यमिदं यद् यल्लक्ष्यमुद्दिश्य क्रिया क्रियते तस्य लक्ष्यस्य सिद्धिपर्यन्तं यः कश्चन व्यापारो भवति तस्यैका क्रियते संज्ञा दीयते। इदमपि निश्चितं यदभीष्टलक्ष्यं यावत् गन्तुमनेकेऽवान्तरव्यापारास्तत्र क्रियन्ते। इमे सर्वे व्यापाराः क्षणिकत्वात् झटिति विनश्यन्ति। प्रथमपादविक्षेपानन्तरं द्वितीये पादविक्षेपे कर्त्तव्ये प्रथमपादविक्षेपो विनष्टस्तिष्ठति। अस्यां स्थितौ विनश्वरव्यापाराणां समूहः कथं संभवति? प्रश्नस्य चास्योत्तरे वाक्यपदीयकारः कथयति:—'बुद्ध्याप्रकल्पिताभेदः' अर्थात् तत्राभेदकल्पना बौद्धिकी भवति। क्रियारम्भात् लक्ष्यप्राप्तिपर्यन्तं यावन्तोऽवान्तरव्यापारा भवन्ति, तेषु बौद्धिकैकता कल्प्यते, अथवा एकबुद्धिविषयतां तत्र परिकल्प्य इयमेका गमनक्रिया पठनक्रिया वेति व्यवहारः क्रियते। तत्रत्या अवान्तरभेदा अप्रधानाश्च तां मुख्यक्रियां प्रति समर्पयन्ति आत्मनः। अतएवोपर्युक्तकारिकायाम् अवान्तरव्यापाराः गुणभूतावयवशब्देनाभिहिताः सन्ति।

अनेनोपर्युक्तविवेचनेन स्पष्टं भवति यद् भर्तृहरिः क्रियायाः कृते चत्वारि तत्त्वानि स्वीकुरुते। तानि च साध्यता, क्रमवत्ता, सामूहिकता, भागवत्ता चेति। पठति गच्छति वेति कथनेन एषां तत्त्वानां स्पष्टीकरणं भवति। पठति इत्यनेन प्रतीयते पठनमिदानीं प्रचलदस्ति। एतेनेदमपि स्पष्टं भवति यत् पठनं न किमपि मूर्तिमद् वस्तु यत् स्थूलसिद्धवस्तुवत् तत्र स्थापितं वर्तते तथा तच्च पठ्यते। किन्तु तत् क्रियते। यच्च सम्पाद्यते साध्यरूपेण क्रमशः। क्रियायाः क्रमशो भवनेन तत्र भागवत्ता स्वयमेव सिध्यति। निश्चितावधौ यत् किमपि पठनं तत्र सम्पन्नं तत् क्रमिकरूपेण एकस्मिन् समूहे परिकल्पितं भवति। तस्य समूहस्य पठनक्रियेति नाम क्रियते। ज्वलतो दण्डस्य या चक्राकारप्रतीतिः सा कल्पिताऽपि अलातचक्रेति नाम्ना व्यपदिश्यते। तेनैव प्रकारेण क्रियायाः इदमेकं रूपमिति तथ्यं कल्पितमेव वेदितव्यम्। पतञ्जलिनाप्युक्तम्— 'क्रिया पिण्डीभूता न शक्यते निर्दर्शयितुम्'। क्रिया यदि स्यात् सिद्धरूपा मूर्त्तरूपा च तदासावुत्थाप्य दर्शयितुं योग्या स्यात्। न च सा तथेति तस्याः साध्यरूपत्वमविचिकित्सितम्। साध्यता, क्रमवत्ता चैव क्रियाया असाधारणौ धर्मौ। अस्मादेव कारणात् भवति पार्थक्यं द्रव्यतः क्रियायाः।

द्रव्यं सिद्धं भवति न च प्रतीयते तत्र क्रमवत्ताऽपि । रामो विद्यालयः गङ्गा, हिमालयो वेति शब्दे श्रुते यादृशं समग्रमेकं चित्रं पुरस्तात् प्रस्तुतं भवति, अस्माकम्, न तथा स्थितिः क्रियाया विषये भवति । गच्छति इति शब्दे समुच्चारिते सति एकस्याः गमनक्रियायाः समग्रं रूपं पुरतो न स्फुरति, किन्तु पादविक्षेपद्वारा गमनक्रिया क्रियते इत्येव प्रतीयते तत्र । गन्तव्यस्थले सम्प्राप्ते सति पूर्णा गमनक्रियेति व्यवहारः । गमनक्रियायाः कल्पितामिमामेकरूपतामापादयितुं भवन्ति अनेकेऽवान्तरभागाः । इमे अवान्तभेदा एव क्रियाया भागा इत्युच्यन्ते । यद्यपि भागवत्ता द्रव्येष्वपि भवति, परन्तु भागैः सह क्रमवत्ता क्रियास्वेव भवति । 'राम' इतिकथनेन तदीया अवयवाः प्रतीतिपथमवतरन्ति, परन्तु तैर्भागैः क्रमशो रामः सम्पद्यते इति प्रतीतिस्तु तत्र नैव जायते ।

क्रियायाः क्रमिकता तस्या विकासशीलतायाः पूर्णताया वा परिचायिका । क्रमशो भवन्त्येव काचित् क्रिया पूर्णा भवति । यथा एकां पाकक्रियां पूर्णां विधातुम् अग्निप्रज्वालनादारभ्य तदीयां पाकसंज्ञां यावद् अनेकेऽवान्तरव्यापाराः कर्त्तव्या भवन्ति । तात्पर्यमिदं यद् काचिदपि क्रिया स्वतः सिद्धा सत्या वा न भवति, अपितु भवनस्य, करणस्य च स्थितौ पूर्णा भवति । इदं भवनं करणं वा कालोपरि आधृतं भवति । अत एवोक्तं— 'क्रियाभेदाय कालस्तु' । क्रियाया भेदकः काल एव । अयमेव सर्वेषामाधारः । संसारस्य सर्वाणि वस्तूनि कालस्य परिधावेव जायन्ते । अतः क्रियाया आधारस्तस्या भेदकश्च काल एव । यद्यपि मूर्तिमत्त्वात् किमपि द्रव्यमेव भवति क्रियाया आधारः, परन्तु सर्वं खलु भवति क्रियायाः परिधाविति कालो जगतामाश्रयो मतः । कालोपरि आधृतायाः क्रियायाः परिनिष्पत्तिर्भागशो भवति । कस्मिंश्चिदेकस्मिन् क्षणे जायमाना क्रिया स्वस्मिन्नपूर्णा सती दीर्घकालसाध्यविशिष्टक्रियाया अंशभूता भवति ।

उपर्युक्तेषु साध्यता, क्रमवत्ता, भागवत्ता, सामूहिकतेति तथ्यचतुष्टयेषु साध्यतायाः प्रामुख्यम् । क्रमवत्तादिभिस्त्रिभिस्तथ्यैः साध्यता सम्पन्ना भवति । साध्यता एव क्रियाया असाधारणो धर्मः । इदमेवासत्त्वभूतं रूपं क्रियायाः यत्र लिङ्गसंख्याकारकादयो न प्रतीयन्ते । रामः पठति लता पठति इत्यनयोर्वाक्ययोर्हिन्दीभाषायामनुवादे कृते क्रियाया लिङ्गस्य या प्रतीतिर्भवति सा तु औपचारिकी वर्तते । तत्र कर्तृगतलिङ्गस्य क्रियायां प्रतीतिर्जायते । उक्तञ्च—

> क्रिया न युज्यते लिङ्गैः क्रिया नाधारकारकैः ।
> असत्त्वरूपता तस्या इयमेवावधार्यताम् ।
>
> (वैयाकरणभूषणदर्पणकारिका 4)

अत्रेदं जिज्ञासितं भवति यत् क्रियाया असत्त्वरूपता यथा पचति इत्यत्र वर्तते तथैव 'पाकः' इत्यत्रापि कथं नासत्त्वरूपता ? अत्र तु लिङ्गसंख्याकारकान्वयः स्पष्ट-

मेव प्रतीयते । तस्मात् 'पाक' इत्यत्र क्रियाया असत्त्वरूपतैवेति कथनं तु सर्वथा असंगतमेव । पतञ्जलिनाप्युक्तम्— कृदभिहितो भावो द्रव्यवत् प्रकाशते । द्रव्यवत् इत्यस्यार्थः सत्त्ववत् । पच् धातोर्भावे घञि निष्पद्यते पाकशब्दः । अनेन भावप्रत्ययान्तशब्देन क्रियायाः प्रतीतिः सत्त्वरूपेण भवेदसत्त्वरूपेण वेति जिज्ञासायां वैयाकरणभूषणसारकारस्येदमभिमतं यत्— पश्य मृगो धावति इत्यत्र 'पश्य' 'धावति' इति क्रियाद्वयं तिङन्तम् । अत्रैकैव धावनक्रिया मृगं प्रति साध्यरूपा चेत् दर्शनक्रियां प्रति साधनरूपा वर्तते । मृगकर्तृकं धावनं पश्य इत्येवं प्रकारकेण वाक्यार्थेनास्य तथ्यस्य सम्पुष्टिर्भवति । एवञ्च यथाऽत्र एकैव क्रिया आधारभेदात् साध्यसाधनेत्युभयरूपतां धत्ते तथैव 'पाक' इति कृदन्तप्रयोगे 'पच्' 'घञ्' इतिचांशद्वयम् । तत्र प्रकृत्या क्रियायाः साध्यावस्थाभिव्यज्यते, घञा च सिद्धावस्था । अस्यामेव सिद्धावस्थायामन्वयो भवति लिङ्गसंख्याकारकाणाम् "ओदनस्य पाकः," "क्षीरस्य पाकः" "पायसस्य च पाकः" इत्यादिप्रयोगेषु पाकगतसंख्याप्रतीतिः स्पष्टैव ।

इदमत्रावधेयम्— धातुः क्रियावाचको भवति । 'भूवादयो धातवः' इतिपाणिनिसूत्रस्य व्याख्यानं कुर्वता पतञ्जलिनोक्तम्— 'क्रियावचनो धातुः । भाववचनो धातुः' । कथनेनानेन स्पष्टं भवति यत् क्रिया भावश्चेति एकमेव वस्तु । अत एवोक्तम् भूषणे—

'व्यापारो भावना चैवोत्पादना सैव च क्रिया' इति ।

✓व्यापारः, भावना, उत्पादना, क्रिया, इमे सर्वे भावप्रत्ययान्ताः शब्दा परस्परं पर्यायस्वरूपाः क्रियाया भावस्य वा वाचकाः सन्ति ।

धातुः क्रियावाचको भवति, परन्तु प्रत्ययविहीनो धातुः न क्रियावाचकः । "पठ व्यक्तायां वाचि" इत्यत्र पठितः पठ् धातुः क्रियां न प्रत्याययति, अपि तु "पठति" इति प्रत्ययान्तशब्दघटकः पठ् धातुः पठनक्रियाया वाचको भवति । भर्तृहरिणोक्तम्—

'धात्वादीनां विशुद्धानां लौकिकोऽर्थो न विद्यते'

इदमेव तथ्यं— नहि लोके केवलेन प्रत्ययेनार्थोऽवगम्यते, केन तर्हि सप्रकृति केनेति पतञ्जल्युक्त्या सम्पुष्टं भवति । अत्र प्रत्ययपदं प्रकृतेरुपलक्षणम् । प्रकृतिप्रत्यययोर्योगे एव निराकाङ्क्षार्थबोधः । प्रकृतिश्च द्विधा— धातुः, प्रातिपदिकञ्च । अनयोर्मध्ये धातोः पुरस्तात् तिङ् कृत् चेति प्रत्ययद्वयं भवति । कृत्प्रत्ययानां विचारोऽग्रे करिष्यते । तिङ्प्रत्ययसंयोगेन निष्पन्नाः 'पचति, एधाञ्चक्रे" इत्यादयः शब्दा आख्यातपदेनोच्यन्ते । एतादृशेषु आख्यातशब्देषु प्रकृत्यर्थः प्रधानः प्रत्ययार्थो वेति संशये निरुक्तकारः भावप्रधानमाख्यातमित्यवोचत् । आख्यातपदोपस्थाप्यमुख्यविशेष्यता क्रियास्वेवेति तदर्थः । अस्यां स्थितौ धातुराख्यातञ्चेत्युभयमपि एकमेवेति कथनं भ्रान्तिरेव ।

भावशब्दस्य व्युत्पत्तिः पतञ्जलिना एवं प्रकारेण कृता 'भवनं भावः' अथवा 'भाव्यते यः स भावः'। आभ्यां व्याख्याद्वयाभ्यां भावस्य साध्यरूपता सिध्यति। 'यश्चभवति' अथवा "यो भाव्यते" चेदसावेव भावस्तदा तस्य साध्यरूपतायां कः सन्देहः ? एवञ्च साध्यरूपतायाः समानत्वात् क्रियाभावयोरेकत्वे नास्त्यवकाशः संशयस्य। एवञ्च क्रियाभावयोः पार्थक्ये न दृश्यते किमप्यौचित्यम्।

इदमप्यत्रावधेयं यत् क्रियापर्यायो भावशब्दो व्यापकमर्थं प्रत्याययति। क्रियाः सन्त्यनन्ता बहुरूपाश्चेद् भावा अपि तथैव। एवंभूतस्य व्यापकार्थस्य भावस्य "षड्भावविकारघटकभावेन सह एकरूपतास्वीकरणं निराधारमेव वेदनीयम्।

इदानीं कृत्प्रत्ययोपरि कश्चन विचारोऽपेक्ष्यते। धातोः कृत्प्रत्ययाः कर्मकर्तृभाववाच्येषु भवन्ति। कर्तृवाच्ये प्रत्यये कर्त्तुः प्राधान्यम्। क्रिया च तत्र कर्तृविशेषणीभूता भवति। पाचकपाठकादिशब्देषु तथ्यमिदं द्रष्टुं शक्यमस्ति। 'पठनकर्त्ता'इत्युक्ते क्रियाया विशेषणत्वं कर्तुश्च विशेष्यत्वं स्पष्टमेव। एवमेव कर्मवाच्ये कर्मणःप्राधान्यं, क्रियायाश्च तत्र विशेषणत्वं भवति। भाववाच्ये तु भावस्यैव प्राधान्यम्। भावश्च क्रियेति क्रियाया एव प्राधान्यम्। इयं भावस्य प्रधानता अकर्मकधातुभ्यो भावे प्रत्यये कृते द्रष्टुं शक्यते। यथा-शयितं तेन— इत्यत्र तत्कर्तृकशयनस्यैव प्राधान्यम्। कतिपये कृत्प्रत्यया मुख्यतिङन्तक्रियायाः कार्यं सम्पादयन्ति। तथा 'चैत्रः कार्यम् अकरोत्, रामः अगच्छत् इति तिङन्तघटितवाक्यस्थाने कृदन्ते 'चैत्रेण कार्यं कृतम्' 'रामो गतः' इति प्रयोगो भवति। पार्थक्यञ्चोभयत्र इदमेव यत् कृदन्तीयक्रियापदेषु लिङ्गसंख्यादयोऽन्वीयन्ते यदा, तिङन्तीयक्रियासु इदं न भवति। यथा 'वेदः पठितः', 'गीता पठिता', 'पुस्तकं पठितम्' एषु वाक्यत्रयेषु एकस्यैव पठितशब्दस्य कर्मानुसारं रूपत्रयं सम्पन्नम्। अत एव कृदन्तक्रिया मुख्यक्रियारूपेण न व्यवह्रियते। किञ्च तिङन्तीयक्रियाणां गणना नामसु न भवति, किन्तु कृदन्तीयक्रियाः प्रातिपादिकरूपेण स्वीक्रियन्ते, भवन्ति च प्रातिपदिकप्रयुक्तकार्यण्यपि पुरस्तात्तासाम्। 'नामाख्यातोपसर्गनिपाताश्च' इति पदविभागं कुर्वत यास्केन कृत्प्रत्ययान्ताः शब्दा नाम्नोऽर्न्तभाविताः। कतिपये कृत्प्रत्ययाः पूर्वकालिकीं क्रियाम्, कतिपये च क्रियार्थकक्रियां सूचयितुं प्रयुक्ता भवन्ति। 'पठित्वा गतः' इत्यत्र पठनक्रियायाः पूर्वकालिकता तथा 'पठितुं गच्छती' त्यत्र पठनक्रियायाः उपादेयता च क्त्वातुमुन्प्रत्ययाभ्यां प्रतीयते। एवं भूताः कृदन्तप्रयोगाः संस्कृतव्याकरणे अव्ययनाम्ना प्रसिद्धाः सन्ति यत्र न कदाचिद् काचित् विकृतिः।

सा चेयं क्रिया सदा साध्यरूपा भागशो निष्पन्ना भ्वादिप्रभृतिगणेषु नाना धातुभिरनेकप्रत्ययसम्प्रयोगे नानारूपेण निष्पाद्यमाना अकर्मकसकर्मकद्विकर्मकभेदभिन्ना निखिलं संस्कृतवाङ्मयं व्याप्नोतीत्यलम्।

आख्यातार्थविमर्शः

यद्यपि 'आख्यातम् आख्यातेन क्रिया-सातत्ये' इति मयूरव्यंसकादिगण-सूत्रे आख्यात-शब्देन तिङन्तम् एव गृह्यते। अत एव 'पचतभृज्जता' 'खादतमोदता' इत्यादीनि तद्-उदाहरणानि संगच्छन्ते, परं क्वचिद् आख्यातपदेन केवलं तिङ्-प्रत्यय एव गृह्यते। यथा— "आख्यातार्थ-संख्या-निष्ठ-प्रकारता-निरूपित-विशेष्यताक-शाब्द-बोधं प्रत्य् 'आख्यात-जन्य-कर्तृ-कर्मोपस्थितिः कारणम्' इत्यत्राख्यात-शब्देन केवलस्य तिङो ग्रहणं कृतं वर्तते। एवञ् च वैयाकरणमत आख्यात-शब्देन तिङस् तिङन्तस्य चेत्य् उभयोर् ग्रहणं भवति। नैयायिकमते त्व् आख्यात-शब्देन केवलं तिङ एव ग्रहणं न तु तिङन्तस्याऽपीत्य् अस्ति विशेषः। केचित् त्व् आख्यात-शब्देन केवलं तिङो ग्रहणं मन्वाना व्युत्पादयन्ति यत्— 'आख्यायेते कर्तृ-कर्मणी येन तद् आख्यातं', परं तन् न समीचीनम्। यत एवं सत्य् आख्यायेते फल-व्यापारौ येनाऽसौ धातुर् अप्य् आख्यात-पद-वाच्यतां कथं नाऽर्हेत्? किं चाऽऽख्यायते येन तद् आख्यातम् इत्य् आख्यात-शब्दस्य व्युत्पत्तिर् अव्याप्त्यादि-दोष-ग्रस्तत्वाद् उपेक्षणीयैव। अत आख्यात-शब्दः तिङि तिङन्ते च रूढ इत्येवोचितम्।

प्रस्तुत-लेख आख्यात-शब्देन तिङ एव ग्रहणं कृतम् अस्तीति वेदनीयम्। तत्र वैयाकरण-मते 'आश्रये तु तिङः स्मृता' इत्य् उक्त्याऽऽश्रयस् तिङर्थः। तत्राऽऽश्रय-पदेन कस्याऽऽश्रयो ग्राह्य इति जिज्ञासायां प्रस्तुतत्वात् फल-व्यापारयोर् एवाऽऽश्रयौ ग्राह्यौ भवत इति। फल-व्यापारयोर् धातुर् इत्यनन्तरम् एव 'आश्रये तु तिङः स्मृता' इत्युक्तेः। एवञ् च फलाश्रय-व्यापाराश्रययोर् आख्याताऽर्थत्वे सम्प्राप्ते 'फल-व्यापारयोर्' धातुनैव लाभाद् 'अनन्यलभ्यो हि शब्दार्थ' इति नियमेन केवलम् आश्रयमात्रं तिङ्-अर्थः। स च फलाऽश्रयः कर्म, व्यापाराऽऽश्रयश् च कर्त्तेति कृत्वा कर्त्ता कर्म चाऽऽख्यातस्याऽर्थ इति समायाति।

न चाऽनयोर् आख्याताऽर्थत्वम् अप्रामाणिकम्। यदि चोच्यते, 'येन शब्देन यस्य प्रतीतिः स तस्याऽर्थ' इति व्याप्त्या तिङ्-द्वारा जायमानकर्तृ-कर्मणोः प्रतीतिर् एव तयोर् आख्याताऽर्थत्वे प्रमाणम् इति, तन् न युक्तियुक्तं, तिङो व्यापार-वाचकत्वाऽङ्गीकारेऽपि तद्-आश्रये कर्तरि लक्षणयैव कर्तुर् बोधसिद्धेः। न च तिङः कर्तरि लक्षणया ततो व्यापार-बोधो न स्यात्। न हि तीरे लाक्षणिकेन गंगा-शब्देन प्रवाहस्याऽपि बोधः कस्याऽप्य् अभिमत इति वाच्यम्? शक्त्या व्यापार-बोधः,लक्षणया

च कर्तुर् बोध इत्युभय-विध-व्यवहारस्य समीचीन-वक्तव्यत्वात्। यदि च कथ्यते युगपद् वृत्तिद्वय-विरोध इति, तदा यथा दिवाऽभुञ्जानस्य देवदत्तस्य पीनत्वोपपत्तये रात्रि-भोजनम् आक्षिप्यते, तथैवाऽऽश्रयं विना व्यापारस्याऽनुपपत्याक्षेपाद् एवाऽऽश्रय-भाने सम्पन्ने तस्याऽऽख्याताऽर्थत्व कथनं मुधैव। अथवा भावना क्वचिद् आश्रिता, गुणत्वात्, रसादिवत् इत्यनुमानेनैव कर्तुर् बोधः स्याद् इति तस्याऽऽख्याताऽर्थत्व-कथनम् असंगतम् एव।

ननु व्याप्त्याद्यनुसंधानं विनैवाऽऽख्यात-श्रवण-मात्रेणैव जायमानः कर्तृकर्मणोर् बोधस् तयोस् तद्-अर्थत्वम् एव व्यनक्ति। अन्यथाऽऽक्षिप्तस्य शाब्दबोधे भानाऽभावेन कर्तृ-कर्मणोः शाब्द-बोधे भानम् एव न स्याद् इति चेन् न, 'चैत्रः पचती'त्यादौ प्रथमाऽन्त-पदाऽर्थे चैत्रे तिङ्-अर्थ-व्यापारस्याऽऽकांक्षाऽभास्येनाऽऽश्रयत्व-सम्बन्धेनाऽन्वयाद् अनायासेनैवाऽऽश्रय-लाभे सिद्धे तद्-अर्थं प्रयासस्याकिंचित्-करत्वाद् इति।

अत्रोच्यते— 'लः कर्मणि च भावे चे'त्यादिना सूत्रेण कर्तरि कर्मणि च लकारस्य विधानेन तत् स्थाने जायमानस्य तिङोऽपि कर्तृ-कर्म-वाचकत्वम् अक्षतम्। अन्यथा स्थान्यर्थाऽभिधान-समर्थस्यैवाऽऽदेशत्वम् इति नियमभङ्गाऽऽपत्तिः स्यात्। न च 'लः कर्मणि चे'त्य् अत्र कर्तृ-कर्म-पदस्य धर्म-परत्वं स्वीकृत्य कर्तृत्वे लकार-विधिः स्यात्। कर्तृत्वञ् च कृतिर् इति व्यापार एव लकाराऽर्थः कर्तुश् चाऽऽक्षेप एवेति युक्तम् इति वाच्यम्? तथा सति 'कर्तरि कृद्' इत्यत्राऽपि कर्तरीति पदस्य धर्मपरत्वे जायमाने कृताम् अपि कर्तृ-वाचकत्वं मीमांसकाऽभिमतं न सिद्ध्येत्। अत एव 'पक्ता देवदत्त' इत्यत्र तृजर्थकर्तुर् देवदत्तेन सहाऽभेदान्वयवत् तिङन्त-स्थलेऽपि 'पचति देवदत्त' इत्यादौ देवदत्ताऽभिन्न-कर्तृ-वृत्ति-वर्तमान-कालिको व्यापार इत्य् अभेद-बोधो जायते। न चाऽभेद-बोधे समान-विभक्तिकत्वम् एव नियामकम्। तच् च कृदन्त एव दृश्यते न तु तिङन्तेऽपीति वाच्यम्। 'सोमेन यजेत्, स्तोकं पचति, राजपुरुष' इत्यत्र समानविभक्तिकत्वाऽभावेऽपि क्रमशः 'सोमवद्-अभिन्न-यागेनेष्टं भावयेत्' स्तोकाभिन्नविक्लितिः, 'राजसम्बन्ध्यभिन्नः पुरुष' इत्यादिरूपेण बोधदर्शनाद् अभेदाऽन्वयबोधं प्रति समान-विभक्तिकत्वस्याऽकिञ्चित्करत्वात्। एवञ् च कृदन्त-स्थल इव तिङन्त-स्थलेऽपि सर्वाऽनुभवसिद्ध-स्याऽभेदाऽन्वय-बोधस्याऽपलपितुम् अशक्यतया कर्तृ-कर्मणोर् आख्यातार्थत्वम् उररीकरणीयम् एव।

अत्र नैयायिकाः— यदि 'लः कर्मणि चे'त्याद्यनुशासनाद् आख्यातस्य कर्तरि शक्तिर् अभ्युपेयते तदा कर्तृत्वं शक्यताऽवच्छेदकं स्यात्। कर्तृत्वञ् च कृतिमत्त्वं, तच् च कृतिर् एव। सा च कृतिः प्रतिकर्तृ भिन्ना भिन्नेति शक्यताऽवच्छेदकानन्त्यापत्तिः। एवञ् च 'लः कर्मणि चे'त्यादौ कर्तृ-कर्म-पदे न धर्मि-परके किन्तु

धर्म-परे स्तः । तस्मात् कृतौ फल एव च जायते लकारः । शक्यतावच्छेदकञ् च भवति एकम् एव कृतित्वम् । सा च कृतिश् चैत्रादौ कर्तरि प्रकारतया भासमाना विशिनष्टि कर्तारम् । न चैवम् आख्यातस्य कृतौ शक्ति-स्वीकारे कर्तुर् अनुक्ततया 'चैत्रः पचती' त्यादौ कर्तृपदात् तृतीया स्याद् इति वाच्यम् । उक्तत्वाऽनुक्तत्वं प्रति संख्याऽभिधानस्य कारणत्व-स्वीकारेण प्रकृते चैत्रगतैकत्व-संख्यायाः तिङोक्तत्वेन कर्तुर् अप्य् उक्तत्वात् । संख्याऽभिधान-योग्यश् चेतर-पदार्थ-निष्ठ-विशेष्यता-निरूपित- प्रकारताऽनाश्रयः प्रथमान्तपदोस्थाप्यो भवति । तेन 'चैत्र इव मैत्रो गच्छती' त्यत्रेवाऽर्थ-सादृश्ये विशेषणीभूते चैत्रे न संख्याऽन्वयः । एवं 'चैत्रस् तण्डुलं पचती'त्यत्र तण्डुले न भवत्य् आख्यातार्थ-संख्याऽन्वयः, तस्य द्वितीयाऽन्त-पदोपस्थाप्यत्वात् ।

परन्त्व् एतत् सर्वम् आपातत एव रमणीयम् । आख्यातस्य कृतौ शक्ति-स्वीकारे 'रथो गच्छती'त्यत्राऽचेतने रथे चेतनमात्र-निष्ठायाः कृतेर् अविद्यमानतया व्यापारे आश्रयत्वे वा लक्षणा वक्तव्या स्यात् । एवम् एव 'घटं जानाती'-त्यत्र 'घट-विषयक-ज्ञानाऽनुकूल-कृतिमान्' इत्याकारकः शाब्द-बोधो जायते, परञ् चाऽयं शाब्ध-बोधः सर्वथैवाऽसमञ्जसः । 'ज्ञान-जन्या भवेद् इच्छा, इच्छा-जन्या भवेत् कृतिः' इत्युक्त्यनुसारं ज्ञान-जन्म-जन्यायाः कृतेः ज्ञानाऽनुकूलत्वस्य वक्तुम् अशक्यत्वात् । तथा च 'घटं जानाति'• इत्यादाव् अपि लक्षणाऽऽश्रयणेनैव घट-विषयक-ज्ञानाऽऽश्रयत्र् चैत्र इत्याकारको बोधः कर्त्तव्यः स्यात् ।

कृताव् आख्यातस्य शक्ति-स्वीकारेऽपरम् इदं दूषणम् आपतति यद् युष्मद्-अस्मदोर् लकारेण सह समानाधिकरण्याऽभावेन मध्यमोत्तम-पुरुष-व्यवस्था न स्यात् । शतृ-शानजादीनाम् अपि तिबादिवल् लादेशत्वेन तेभ्योऽपि कृतिमात्रस्यैव बोधाऽऽपत्तिः स्याद् नत्व् अभीष्टोऽपि कर्तुर् बोधः । वस्तुतस्तु फल-व्यापारयोर्-धातुनैव लभ्यत्वाद् अनन्य-लभ्यस्य च शब्दाऽर्थत्वाद् आख्यातस्य कृति-फल-वाचकत्वम् अयुक्तम् एव । केश्चित् त्व् आख्यातस्य न यत्ने न वा व्यापारेऽपितु भावनायां शक्तिः स्वीक्रियते, इयं च भावनोत्पादनस्वरूपा, चेतनाऽचेतनसाधारणी । तेन 'ओदनं पचति' इत्यत्र पाकम् उत्पादयति । जानातीत्यत्र ज्ञानम् उत्पादयतीत्यादयो मुख्याः प्रयोगा भवन्तीति । परञ् चैतद् अपि नाऽस्ति समीचीनम् । यतो हि— केयम् उत्पादना भवद्-अभिमता ? यदि च 'व्यापारो भावना चैवोत्पादना चैव सा क्रिया' इत्युक्त्या व्यापाराऽनतिरिक्ता सा उत्पादना, तर्हि पूर्वोक्त मीमांसक-मत-सम्बन्धि दूषणम् अत्राऽप्य् आपतत्य् एव । किञ्च 'उत्पादयति' इत्यत्रांशद्वयम्— 'उत्पादि' इत्येकः 'ति' इति चाऽपरोंऽशः । तत्र यदि 'ति-'प्रत्ययस्यैव 'उत्पादना'-रूपोऽर्थः तर्हि विवरणे पुनः तेर् उपन्यासो व्यर्थ एव । एवञ् च गड्डभूतोऽयं सिद्धान्तो न तथ्यम् अवलम्बते ।

एवञ् च वैयाकरण-सिद्धान्तानुसारं कर्ता, कर्म चाऽऽख्यातस्यार्थः । तथा 'द्व्येकयोर् द्विवचनैकवचने' इत्याद्यनुरोधाद् 'वर्तमाने लट्' 'परोक्षे लिट्' इत्याद्यनुरोधाच् च संख्या कालश् चाऽऽख्यातार्थ इति कृत्वा कर्तृ-कर्म-संख्याकाला आख्यातार्थाः सन्ति । तत्र पञ्चकं प्रातिपदिकार्थ इव पञ्चकं धात्वर्थ इति मतानुसारम् इमे सर्वेऽपि धातोर् एवार्थाः, तिबादयस् तु केवलं तेषां द्योतकाः । अत एव—

'द्योतिका वाचिका वा स्युर् द्वित्वादीनां विभक्तयः'

इति कथनम् अपि संगतं भवति । अयं च द्योतकत्व-पक्षो वाचकत्वपक्षश् च वाक्यपदीयादौ विस्तरेण स्पष्टीकृत इत्यलं पल्लवितेन ।

विशेषणविभक्त्यर्थ-विचारः

शाब्द-बोधो हि निखिल-शास्त्रोपयोगी । स च क्रिया-कारकाऽऽदिघटित-पद-कदम्बकाज् जायमानो निराकाङ्क्ष-बोध-हेतुर् इति प्रथितम् एव । तत्र च शाब्द-बोधे केचन पदार्था विशेषणताम् उपयान्ति, अपरे च विशेष्यताम् । तत्र ये पदार्था विशेषणताम् उपयान्ति, तद् वाचक पदान्य् अपि विशेषणानीत्य् उच्यन्ते । तादृशेभ्यो विशेषण-वाचक-पदेभ्यः समायातानां विभक्तीनां कोऽर्थः ? इति जिज्ञासायां प्रस्तूयते तावद् विचारः ।

पदार्थानां परस्परम् अन्वयः प्रकार-द्वयेन क्रियते—भेद-सम्बन्धेन, अभेद-सम्बन्धेन च । तत्र भेद-सम्बन्धेनाऽन्वयस् तत्रैव जायते यत्र विभिन्न विभक्तिकानि पदानि स्युः । यथा 'राज्ञः पुरुषः' इति । अत्र राज-पदार्थस्य आकाङ्क्षा-भास्येन स्वत्व-सम्बन्धेन पुरुष-पदार्थेऽन्वयः, तेन स्वत्व-सम्बन्धेन राजवान् पुरुष इति बोधः । इदम् अप्य् अत्र विज्ञेयम्—यस्य पदार्थस्य कुत्राऽप्य् अन्वयः क्रियते सोऽन्वयस्य (सम्बन्धस्य) प्रतियोगी, यत्र च तस्याऽन्वयः स खलु सम्बन्धस्याऽनुयोगीत्य् उच्यते । किञ्च, यस्याऽन्वय स प्रकारो विशेषणं वा, यत्र चाऽन्वयः स विशेष्यम् इति चोच्यते । एवञ्च विशेषणे विशेषणता, सम्बन्धीया प्रतियोगिता च तिष्ठतश् चेद् विशेष्ये विशेष्यता, सम्बन्धीयाऽनुयोगिता च वर्तेते । इमाः सर्वाः प्रतियोगिताऽनुयोगिता-विशेष्यतादयो विषयता-पदेनोच्यन्ते । तत्र येन सम्बन्धेन विशेषणता स सम्बन्धो विशेषण-निष्ठो धर्मश् च तत्र वर्तमानाया विशेषणताया अवच्छेदको भवतीति विशेषणताऽपि तत्सम्बन्धाऽवच्छिन्ना तद्धर्माऽवच्छिन्ना च जायते । एषैव गतिः सर्वासां विषयतानां कृते वेदनीया । तेनोपर्युक्त-स्थले स्वत्वसम्बन्धाऽवच्छिन्न-राजत्वाऽवच्छिन्न प्रकारता-निरूपित-पुरुषत्वाऽवच्छिन्न विशेष्यताकः शाब्द-बोधः सम्पद्यते ।

'नीलो घटः' इत्यादौ तु नील-पदार्थस्याऽभेद-सम्बन्धेन घट-पदार्थेऽन्वयः । अभेदाऽन्वय-बोधं प्रति समान-विभक्तिकत्वस्य प्रयोजकत्वात् । एवञ्चाऽत्र अभेद-सम्बन्धाऽवच्छिन्ननीलत्वाऽवच्छिन्न-प्रकारता-निरूपित- घटत्वावच्छिन्न विशेष्यताकः शाब्द-बोधः । अत्र नील-पदार्थे पूर्वत्र राजपदार्थे च या विशेषणता वर्तते सा क्रमशः अभेद-सम्बन्धेन भेद-सम्बन्धेन चेति स्थितिः । एतत् सर्व संसर्गता-वादिनां मतम् ।

एषां नये हि भेदाऽन्वयो भवेद् अभेदाऽन्वयो वा स्यात्, विशेषणवाचकात् समायाता विभक्तिः केवलं पद-साधुत्व-मात्र-प्रयोजनिका, न तु संख्यादिकं किम् अपि

तदीयं वाच्यम् अभ्युपगतम् । अत एवाऽत्र मते 'राज्ञः पुरुषः' 'नीलो घटः' इत्यादौ सर्वत्रैव विशेषण-विभक्तिर् निरर्थिका । राजनीलादि-पदार्थास् त्व् आकाङ्क्षा-भास्येनैव सम्बन्धेन परस्परम् अन्वयम् उपगच्छन्ति । यत्रापि 'राज्ञः पुरुषः राजपुरुषः' नीलश्चासौ घटः नीलघटः' इति समस्त-स्थलं वर्तते, तत्राप्य् आकाङ्क्षा-भास्येनैव स्वत्वाऽभेदसम्बन्धेन पदार्थानां परस्परम् अन्वयः । राज-पदार्थस्य पुरुष-पदार्थेन सह भेदाऽन्वयस्यैवाऽऽकाङ्क्षा, नील-पदार्थस्य घट-पदार्थेन सहाऽभेदान्वयस्यैवाकाङ्क्षेति न काऽप्य् अव्यवस्था । 'प्रातिपदिकार्थस्य प्रत्ययार्थेन सह निपातार्थेन वा सहैव भेदाऽन्वयो न तु प्रातिपदिकार्थ-द्वयस्य परस्परं भेदाऽन्वयः' इति नियमे प्रमाणाऽभावेन राज-पदार्थ-पुरुषपदार्थयोर् भेदान्वये नास्ति किम् अपि बाधकम् । यत्र 'दधि पश्य' इत्यादौ 'स्वमोर्नपुंसकाद्' इति सूत्रेण लुग् भवति तत्र लुप्त-विभक्त्यनुसन्धानद्वारा यद्यपि बोधोऽभिमतस् तथापि सामासिक-लुक्-स्थले लुप्त-विभक्त्यनुसन्धानम् अन्तरैव बोधोऽभीष्ट इति समास-स्थले यद्य् आकाङ्क्षा-भास्येन सम्बन्धेनाऽन्वयः सिद्ध एव, तर्हि को लाभोऽसमस्त-स्थले विशेषण विभक्तेः सार्थकत्वाभ्युपगमेन ? तस्माद् विशेषणवाचकात् समायाता विभक्तिः पदसम्पादनेन कृतार्था न कम् अप्य् अर्थविशेषं पुष्णाति, अपि तु निरर्थिकैवेति संसर्गता-वादिनः ।

अत्र प्रकारता-वादिनः—समास-स्थले लुप्त-विभक्त्यनुसन्धानस्याऽभावेऽप्य् अन्वय-बोधस्याऽभीष्टतया जायतां नाम संसर्ग मर्यादया भानम्, किन्तु यत्र समासो नास्ति तत्र 'नीलो घट' इत्यादौ समानविभक्तिकस्थले विशेषण-विभक्तेरभेदबोधकत्वम् । भिन्नविभक्तिकस्थलेतु स्वत्वाऽऽधेयत्वादि-भेद बोधकत्वम् । सचाऽयं विभक्त्यर्थः प्रकृत्यर्थ-निष्ठ-प्रकारता निरूपित-विशेष्यताऽऽश्रयोऽपि विशेष्यार्थ-निष्ठ-विशेष्यता-निरूपित प्रकारताऽऽश्रयोऽपि भवतीति विभक्त्यर्थस्य प्रकारताऽऽश्रयतया मतम् इदं प्रकारतावादरूपेण ख्यातिं गतम् । यथा 'नीलो घटः' इत्य् अत्र नील-पदार्थः प्रथमार्थेऽभेदे विशेषणम्, स च घटपदार्थे विशेषणम् । एवञ्च 'नीलाऽभेदवान् घट' इति बोधः । एवं 'राज्ञः पुरुषः' इत्य् अत्र राज-पदार्थस्य निरूपितत्व सम्बन्धेन षष्ठ्यर्थ-स्वत्वेऽन्वयः, तस्य च आश्रयत्व-सम्बन्धेन पुरुषेऽन्वय इति राज-निरूपित स्वत्वाऽऽश्रयः पुरुषः' इति बोधः ।

अथेदं विमृश्यते—अत्र मते समान-विभक्तिक-स्थले विशेषण विभक्तेर् यः खलु अभेद-रूपोऽर्थः स्वीकृतस् तस्याऽभेदस्य कोर्थः ? यदि च अभेदो नाम भेदाऽभावः स च भेदत्वाऽवच्छिन्नत्वे सति भेदत्वेतर-धर्माऽनवच्छिन्नप्रतियोगिताकाऽभाव इत्य् उच्यते, तदा यस्य कस्यचिद् भेदस्य सर्वत्रैव वर्तमानतया एतादृशस्याऽभावस्य सुतराम् अप्रसिद्धिः । यदि चैनाम् अप्रसिद्धिम् अपाकर्तुं भेदाऽभावो भेदनिष्ठ-प्रतियोगिताकाऽभाव इत्य् उच्यते, तदा प्रसिद्धिस् तु कथञ्चिद् यास्यति । भेदस्य सार्वत्रिकत्वेऽपि भेदघटोभयं नास्तीति रीत्या उभयाऽभावम् आदाय भेद-स्थलेऽपि तदभावस्य वक्तुं शक्यत्वात् । परन्तु कृते चैवं नीलं जलम्' इति वाक्यस्याऽपि प्रामा-

ण्याऽऽपत्तिः स्यात्, यतो हि—यद्यपि जले शुक्ल-रूपस्य विद्यमानतया तत्र नील-भेदस्य सत्त्वेन नीलं जलम् इति प्रयोक्तुम् अशक्यम् तथापि जले नीलभेदघटोभयं नास्तीति रीत्या नील-भेदाऽभावस्य सत्त्वेन नीलं जलम् इति प्रयोगस्य प्रामाण्यं केन वार्यताम् ? न च नील-भेदत्वाऽवच्छिन्न-प्रतियोगिकताकाऽभाव एव सोर् अर्थः तथा चाऽस्य अभावस्य जले वक्तुम् अशक्यतया न भवितुम् अर्हति प्रामाण्यं नीलं जलम् इति वाक्यस्येति चेत्—विभक्तेर् एव नीलभेदाऽभाव इत्य् एतावन्मात्रार्थकत्वे प्रकारताऽवच्छेदक-भेदस्य विशेष्यताऽवच्छेदकेऽभावात् नील रूप-प्रकृत्यर्थस्य विभक्त्-यर्थैकदेशे नीलेऽभेदेनाऽनन्वय-प्रसङ्ग । यदि च भेद-प्रतियोगिकाऽभावस्य विशेषण-विभक्त्यर्थत्वम् अभ्युपगम्य नीलं जलम् इत्यादौ नीलपद-समभिव्याहाराद् नील-भेदत्वाऽवच्छिन्नाऽभावः प्रतीयते इत्य् उच्यते, तद् अपि न शोभनम्, एक पदार्थेऽपर-पदार्थस्यैव संसर्ग आकाङ्क्षा-भास्यो भवतीति नियमे जागरूके सत्य् अभाव-रूप पदार्थे भेदरूप पदार्थताऽवच्छेदक सम्बन्धस्याऽऽकाङ्क्षा-भास्यत्वाऽभावात् । तस्मात् कस् तावद् अभेद-पदार्थ इति चेद् ? अत्रोच्यते-भेदेऽभावे च विशेषण-विभक्तेः खण्डशः शक्तिः । तथा च भेदाऽभावयोर् उभयोः पदार्थत्वेन पदार्थ-द्वय-संसर्गस्याऽऽ-काङ्क्षाभास्यत्वेन च विशिष्ट-बोधो यास्यत्य् आकाङ्क्षया । 'नीलं घटः' इत्यादौ तु नाऽभेद-प्रकारको बोधः, द्वितीयान्त-विशेषणवाचकपदेनाऽभेद-बोधने द्वितीया-विभक्त्यन्त-विशेष्य-वाचक-पद समभिव्याहारस्यैव तन्त्रत्वात् । परन्त्व् एवं रीत्या विशेषण-विभक्तेर् भेदेऽभावे च खण्डशः शक्तौ स्वीकृतायाम् अपि परापतन्ति बहूनि दूषणानि । तद्यथा—निखिलस्य वस्तुनः प्रमेयत्वेन प्रमेयत्व-प्रतियोगिक-भेदस्य वक्तुम् अशक्यतया 'प्रमेयो घटः' इत्यादौ शाब्द-बोधाऽनापत्तिः । एवं 'कम्बुग्रीवादि-मान् घटः' इत्यादौ कम्बुग्रीवादिमत्त्वस्य गुरु-धर्मस्य प्रतियोगिताऽनवच्छेदकतया तदवच्छिन्नाऽभावस्याऽप्य् अप्रसिद्धिः । यदि च विशेषणताऽवच्छेदकीभूतं नीलत्वम्, प्रमेयत्वम्, कम्बुग्रीवादिमत्वादिकम् एव विशेषण-विभक्त्यर्थं इत्य् अभ्युपेयते चेत्, तावताऽपि न निस्तारः । नील-पदोत्तरं वर्तमानस्य सु-प्रत्ययस्य नीलत्वम् इत्य् अर्थे कृते नीलत्व-विशिष्टस्य प्रकृत्यर्थस्य प्रत्ययार्थे नीलत्वे कथम् अन्वयो जायताम् ? यथा हि तद्धर्म-विशिष्टे तद्धर्मस्याऽधिकरणता-सम्बन्धेनाऽन्वयोऽव्युत्पन्नस् तथैव तद्धर्म-विशिष्टस्याऽप्य् आधेयतया तद्धर्मेऽन्वयोऽव्युत्पन्न एव । अतः पन्थानम् इमम् अपाकृत्य विशेषण-विभक्त्यर्थोऽभेदः, तादात्म्यम् एवेति स्वीक्रियताम्, अनु-मन्यतां च तादात्म्यं स्ववृत्यसाधारणो धर्मः । असाधारण्यञ्चैकव्यक्ति-मात्र-वृत्तित्वम् । तच्च तद् व्यक्तित्वम् एवेति फलितम् । तथा च नीलो घट इत्यादौ नील-पदार्थस्य वृत्तित्व-सम्बन्धेन तद् व्यक्तित्वेऽन्वयः, तस्य च स्वरूप-सम्बन्धेन घटेऽन्वय इति 'नीलवृत्ति-तद्-व्यक्तित्ववान् घटः' इति जायते बोधः । संसर्गता-वादिनाऽप्य् एतादृश स्थले तादात्म्यम् एव संसर्गः स्वीकार्यः, न त्व् अभेदः संसर्गः । यतो ह्य् अभेदस्य संसर्गत्वे तत्तद्व्यक्तित्वाऽवच्छिन्न-प्रतियोगिताक-भेदाऽभावरूपे तस्य पर्यवसानम् । तथा च संसर्ग-भेदेन अभावस्यापि वैभिन्न्यम् । यथा संयोगेन घटा-

भावो भिन्नः, समवायेन भिन्नः, कालिकेन सम्बन्धेन च भिन्न एव। एवञ्चाऽभेदस्य संसर्गता-वादिना तत्तद्-व्यक्तित्वाऽवच्छिन्न-प्रतियोगिताक-भेदाऽभाव-संसर्गेण नील-पदार्थस्य घटेऽन्वयः कार्यः। तत्र च तद्व्यक्तित्वभेदेन तद्घटित-सम्बन्धस्याऽपि नानात्वं स्वत एव समायाति। एवञ्चाऽत्र मते 'नीलो घटः' इति वाक्याद् अननुगत-सम्बन्धेन नीलवान् घट इति बोधे समापतिते सति 'घटो न नीलः' इति नञ्-घटित वाक्याद् अननुगतसम्बन्धावच्छिन्न–प्रतियोगिताकाऽननुगत-नीलाऽभावा घटे भासेरन्, न तु नीलवृत्तिर् एकोऽभावो भासेत। यदि तादात्म्य-सम्बन्धेन नील–पदार्थो घट-पदार्थेऽन्वेति तदा तादात्म्य सम्बन्धेन नीलवान् घट इति बोधे संजाते, नञ्-सत्त्वे तादात्म्य-सम्बन्धाऽवच्छिन्नप्रतियोगिताक नीलाऽभाववान् घट इति जायते साधुः शाब्दबोधः।

तस्मात् समान-विभक्तिकाऽसमस्त-स्थले प्रकारता-वादिना विशेषण-विभक्त्-यर्थस् तादात्म्यं यथा स्वीकृतं तथैव तत्र स्थले विभक्तेर् नैरर्थक्यम् आकाङ्क्षा–भास्येन सम्बन्धेन विशेष्य-विशेषणयोः परस्परम् अन्वयश् चेति स्वीकुर्वता संसर्गता-वादिनापि तादात्म्यम् एव संसर्गः स्वीकार्यः। वस्तुतस् तु तादात्म्यस्य संसर्गत्वे स्वीक्रियमाणे एव नञो भेद–बोधकत्वम् उपपद्यते। भेदो नाम अन्योऽन्याऽभावः। अन्योऽन्याऽभावश् च तादात्म्य सम्बन्धाऽवच्छिन्न-प्रतियोगिताक इति प्रसिद्धम् एव। एवञ्चाऽभेदस्य प्रकारत्वम् इति पक्षेऽभेदे विशेषणविभक्तेः शक्ति स्वीकरणम् तथा नीलस्य भेदे भेदस्य चाऽभावेऽन्वयार्थं सम्बन्ध-द्वयम् आकाङ्क्षा-भास्यम् इति स्वी-करणम्, इति भूयो गौरवम् अङ्गीकृत्यापि 'नीलो घटः' इति वाक्यात् स्वरूप-सम्बन्धेन नीलवान् घट इति बोधे कृते, पश्चात् समायाते नञि, 'घटो न नीलः' इति वाक्यात् स्वरूप-सम्बन्धाऽवच्छिन्न-प्रतियोगिताक-नीलाऽभाववान् घट इत्य् एव बोधः स्यान् न तु तादात्म्य-सम्बन्धाऽवच्छिन्न-प्रतियोगिताकोऽपि। नञोऽसत्त्वे येन सम्बन्धेन, येन धर्मेण यत्र धर्मिणि यद्वत्ता प्रतीयते, समागते नञि, तत्र धर्मिणि तत्सम्बन्धाऽवच्छिन्न-तद्धर्माऽवच्छिन्न-प्रतियोगिताकाऽभाववत्त्वस्य प्रतीतेर् अभ्युपग-मात्। एवञ्च प्रकारतावादिमते गौरवग्रस्तेऽपि नञो भेदबोधकत्वं नैवोपपद्यते। अभेदस्य स्थाने तादात्म्यस्य विशेषणविभक्त्यर्थत्वम् अङ्गीकृत्य स्वरूपसम्बन्धेन तस्य घटादाव् अन्वयेऽपि स्वरूप सम्बन्धाऽवच्छिन्न प्रतियोगिताक नील तादात्म्याऽ–भाववान् घट इति बोधः स्यान् न तु तादात्म्यसम्बन्धाऽवच्छिन्नप्रतियोगिताको भेदः। एवञ्च न दृश्यते कश्चनाऽभ्युपायः प्रकारतावादिनये नञो भेदबोधकत्वं सम्पादयितुम्।

तस्मात् तादात्म्यं संसर्ग एव। स च आकाङ्क्षा भास्यः, न तु विशेषण–विभक्तौ तन्निरूपिता शक्तिः। एवञ्च आकाङ्क्षाभास्येन तादात्म्यसंसर्गेण 'नीलो घटः' इत्यादौ समान विभक्तिकस्थले नीलादिपदार्थानां घटादाव् अन्वयोपगमे नञोऽभावे तादात्म्य सम्बन्धेन नीलवान् घट इति बोधे सम्प्रतिपन्ने, समागते नञि,

'घटो न नीलः' इत्य् अत्र तादात्म्य सम्बन्धाऽवच्छिन्नप्रतियोगिताकनीलाऽभाववान् घट इति जायते शाब्दधीः। तथा च नञो भेदबोधकत्वम् उपपद्यते। एवैंव सरणिः सर्वत्राऽभेदान्वयस्थले बोध्या।

ननु 'मुखं चन्द्रः' इत्यादाव् अपि तादात्म्येन चन्द्रस्य मुखेऽन्वयोपगमे 'तादात्म्यसम्बन्धेन चन्द्रवन्मुखम्' इति बोधः प्राप्नोति। प्रसिद्ध्यनुरोधाद् इष्यते तु चन्द्रपदस्य चन्द्र सदृशे लक्षणया, तेन सह मुखस्याऽभेदाऽन्वये चन्द्रसदृशाऽभिन्नं मुखम् इति, न च प्रसिद्धिर् अपलाप्येति चेद्? न यतो हि 'मुखं चन्द्रः' इति गौणसारोप लक्षणायाः स्थलम्। सा चेयं लक्षणा रूपकालंकारस्य बीजम्। रूपकालंकारे भवत्य् आहार्यारोपः। आहार्यारोपो हि बाधकालिकेच्छाजन्यं ज्ञानम्। मुखे चन्द्रत्वस्य बाधितत्वेऽपि चमत्कार प्रतिपादनेच्छया तत्र चन्द्रत्वम् आरोप्यते। नहि तत्र चन्द्रत्वप्रतीतिं बिना चन्द्रत्वनियतगुणवत्त्व धीः शक्योपपादयितुम्। न च मुखं चन्द्रत्वाभाववद् इति बाधज्ञाने जागरूके सति कथं मुखं चन्द्रत्ववद इत्य् आहार्य ज्ञानं सम्पादयितुं शक्यम् इति वाच्यम्ः बाधनिश्चय प्रतिबध्यतावच्छेदक कोटाव् आहार्यातिरिक्तत्वस्य निवेशनीयत्वात्।

तस्मात् तादात्म्यातिरिक्त सम्बन्धेन समानविभक्तिकस्थले नामर्थयोर् न परस्परम् अन्वयः। तादात्म्यञ्च तद्वृत्तिधर्मवत्त्वम्एवञ्च मुखं चन्द्र इत्यादौ मुखे चन्द्रवृत्याह्लादकत्वमूलको भवति चन्द्रत्वारोपः, तत एव च चमत्कार इत्य् आलंकारिक समयः।

एवञ्च भेदान्वय स्थले अभेदान्वयस्थले च सर्वत्रैव विशेषणविभक्तिः केवलं पदसम्पादनमात्र प्रयोजनिका, न तु किम् अपि तदीयं वाच्यम् अपि तत्वम् अभ्युपेयत इति बोध्यम्।

भेदान्वयविचारः

अन्वयबोधः प्रत्येकं शास्त्रे प्रतिवाक्यं नान्तरीयकतामापद्यमानो वर्तत इति प्रथितमेव प्रेक्षावताम् । अन्वयबोधस्यापरं नाम वाक्यार्थबोधोऽपि वर्तते । अजहत्स्वार्थायां वृत्तौ वाक्यघटकानां प्रत्येकं पदानां सार्थकतया केवलं तेषां पारस्परिकसंसर्गस्यैव वाक्यार्थबोधरूपतयाभिमतत्वेन अन्वयबोधो नाम संसर्गबोध इत्यभ्युपेयते । तत्र पदार्थद्वयस्य परस्परमन्वयः क्वचित् भेदेन क्वचिच्चाभेदेनेति तयोर्मध्ये प्रस्तूयते भेदान्वयविचारः । यत्र कस्यापि पदार्थस्य पदार्थान्तरेऽन्वयः क्रियते तत्र यस्यान्वयः स प्रतियोगी यत्र चान्वयः स अनुयोगी कथ्यते । तत्र अनुयोगिवृत्तिः यो धर्मः स एव सम्बन्धो भवति । यथा घटत्वस्य घटे ऽन्वयः क्रियते चेत् घटत्वं प्रतियोगि, घटश्चानुयोगी । तत्र घटे अधिकरणत्वम् आश्रयत्वं वा वर्तत इति घटत्वस्याश्रयत्वसम्बन्धेन घटेऽन्वयः । यत्र च घटत्वे एव घटान्वयस्तत्र घटः प्रतियोगी, घटत्वञ्चानुयोगि । घटत्वे च तिष्ठति आधेयता इति घटस्याधेयत्व–सम्बन्धेन घटत्वे ऽन्वयो जायते । इयमेव परम्परा सर्वत्रान्वयकरणे वेदितव्या ।

तत्र प्रातिपदिकार्थस्य भेदसम्बन्धेनान्वयःप्रत्ययार्थेन सह, क्वचिच्च निपातार्थेन सह वा जायते, नतु प्रातिपदिकार्थद्वयस्य परस्परं जायते भेदान्वयः कदाचन । यथा तण्डुलं पचतीत्यत्र तण्डुलस्याधेयत्वसम्बन्धेनामर्थकर्मत्वे ऽन्वये तण्डुलनिष्ठाधिकरणतानिरूपिताधेयतावत्कर्मत्वनिरूपकपाकानुकूलकृतिमानिति बोधः । चन्द्र इव मुखमित्यत्र चन्द्ररूपप्रातिपदिकार्थस्य स्वप्रतियोगिकत्वसम्बन्धेन इवार्थे सादृश्ये ऽन्वयः । इव च निपातः ।

एवमेव धात्वर्थस्यापि प्रत्ययार्थे निपातार्थे वा भवति भेदान्वयः, नतु प्रातिपदिकार्थधात्वर्थयोः परस्परं साक्षात् भेदान्वयः । 'पचति' इत्यत्र धात्वर्थपाकस्य जनकत्वसम्बन्धेन तिबर्थकृतावन्वयो भवतीति प्रसिद्धमेव । यदि चायं नियमो न स्वीकृतः स्यात् तदा 'राजा पुरुषः' इत्यत्रापि पदार्थोपस्थितियोग्यताज्ञानादिरूपकारणकलापसमवधानात् राजपदार्थस्य पुरुषपदार्थेन सह स्वत्वसम्बन्धेनान्वये स्वत्वसम्बन्धेन राजवान् पुरुष इति बोधः आपद्येत । एवं भूतलं घट इत्यत्रापि भूतलस्याधेयत्वसम्बन्धेन घटेऽन्वयः स्यात् । प्रत्ययार्थमन्तराकृत्य प्रातिपदिकार्थद्वयस्य भेदान्वय इति वदतां मते तु स्वत्वाधेयत्वयोरुपस्थापकयोः ङस्ङिप्रत्यययोरभावान्न तादृशापत्तिः । धात्वर्थप्रातिपदिकार्थयोः साक्षात्भेदान्वये स्वीक्रियमाणे

तण्डुलः पचतीत्यत्रापि तण्डुलस्य स्वकर्मकत्वसम्बन्धेन धात्वर्थे पाके अन्वयापत्तिः स्यात् ।

एतत् सर्वं विशेषणविभक्तेः सार्थकत्वमभ्युपगम्य तदर्थस्य स्वत्वस्य आधेयत्वस्य च प्रकारत्वमभ्युपगच्छतां प्रकारतावादिनां मतानुसारं बोध्यम् । एतन्मतानुसारं 'राज्ञः पुरुषः' इत्यत्र राजपदार्थस्य ङसर्थे स्वत्वे ऽन्वयः, तस्य चाश्रयत्वसम्बन्धेन पुरुषेऽन्वय इति राजनिरूपितस्वत्वाश्रयः पुरुषः इति बोधः । 'राज्ञः पुरुषः' इत्यत्र राजपदार्थस्य ङसर्थे स्वत्वेऽन्वयः, तस्य चाश्रयत्वसम्बन्धेन पुरुषे ऽन्वय इति राजनिरूपितस्वत्वाश्रयः पुरुषः इति बोधः । 'राजा पुरुषः' इत्यत्र न भवति तादृशो बोधः प्रातिपदिकार्थद्वयस्य साक्षात् भेदसम्बन्धेनान्वयानभ्युपगमात् ।

विशेषणविभक्तेः नैरर्थक्यमिति स्वीकृत्य स्वत्वाधेयत्वादीनाम् आकांक्षाभास्यसंसर्गत्वमिति वदतां संसर्गतावादिनां मतानुसारं 'राज्ञः पुरुषः' इति वाक्याज्जायते स्वत्वसम्बन्धेन राजवान् पुरुष इति बोधः । अत्र स्वत्वम् आकांक्षाभास्यसंसर्गः, तेन सम्बन्धेन राजपदार्थः पुरुषपदार्थे विशेषणतामुपयाति । ङस्विभक्तिस्तु केवलं पदसाधुत्वमात्रप्रयोजनिका, न तु तस्याः स्वत्वादिकं किमपि वाच्यमभ्युपगतं वर्तते । प्रकारतावादिमते तु ङस्प्रत्यये स्वत्वनिरूपिता शक्तिः स्वीक्रियते । तत्र च स्वत्वे राजपदार्थस्यान्वयार्थंनिरूपितत्वसंसर्गः, तथा राजनिरूपितस्वत्वस्य पुरुषेऽन्वयार्थम् आश्रयत्वसंसर्गः, इति रीत्या संसर्गद्वयस्याकांक्षाभास्यत्वं स्वीकरणीयं भवतीति भूयो गौरवं सोढव्यं भवति ।

एवञ्च प्रातिपदिकार्थद्वयस्यापि परस्परं साक्षात् भेदान्वये संभवे प्रकारतावादिभिः यदुक्तं प्रातिपदिकार्थस्य प्रत्ययार्थेन सह, निपातार्थेन वा सह जायते भेदान्वय इति, तत्कथनमसमञ्जसमेव । एवमेव तण्डुलं पचतीत्यत्रापि तण्डुलस्य आकांक्षाभास्येन स्वनिष्ठकर्मतानिरूपकत्वसम्बन्धेन धात्वर्थे पाके साक्षादेवान्वयो ऽभ्युपगन्तव्यः । अम्प्रत्ययश्च तत्रापि पदसाधुत्वमात्रप्रयोजनकः, नतु कर्मत्वाद्यर्थवाचकः । यत्र च 'राजपुरुषः' इत्यादौ समासस्थले विभक्तेः लुक् भवति तत्रापि स्वत्वसम्बन्धेन 'राजवान् पुरुषः' इत्येव बोधः । अयं समासस्थलीयः व्यासस्थलीयश्च शाब्दबोधः 'राजा पुरुषः' इत्यत्र तु नापादयितुं शक्यः, उक्तस्थलद्वयीयसमभिहाररूपसामग्र्याः 'राजा पुरुषः' इत्यत्रासंभवात् ।

प्रकारतावादिभिस्तु भेदसम्बन्धावच्छिन्ननामार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति प्रत्ययनिपातान्यतरजन्योपस्थितेःकारणत्वमुररीक्रियते । तन्नये च 'राजपुरुषः' इति समासे ङस्प्रत्ययाभावेन तज्जन्योपस्थितेरभावात् कथं जायतां 'राजनिरूपितस्वत्वाश्रयः पुरुषः' इति बोधः ? न च लुप्तविभक्तेरनुसन्धानं कर्तुं शक्यं, सामासिकलुक्स्थले लुप्तविभक्तेरनुसन्धानस्य

तैरनङ्गीकारात् । तस्मात्तत्र राजपदस्य राजसम्बिन्धिनि लक्षणां विधाय तेन समं पुरुषस्याभेदान्वये 'राजसम्बन्ध्यभिन्नः पुरुषः' इति सम्पादनीयो भवति बोधः । एवञ्च व्यासस्थले भिन्नः समासस्थले च ततो विभिन्नः शाब्दबोध इति प्रकारतावादिमतं सर्वथैव गौरवग्रस्तम् । न च 'राजपुरुषः' इत्यत्र राजपदस्य राजसम्बधिनि अर्थे स्वारसिकलक्षणाग्रहसत्त्वे 'राजसम्बन्ध्यभिन्नःपुरुषः' इतिबोधः संसर्गतावादिनाऽप्यवश्यमेवाङ्गीकार्य इति राजपुरुषसमुदायस्य क्वचित्भेदान्वयं प्रति क्वचिच्चाभेदान्वयं प्रति कारणता अत्र मते ऽपि समापतिता । विशेषता तु केवलमियमेव यत् प्रकारतावादिमते षष्ठीतत्पुरुषः स्यात् कर्मधारयो वा स्यात् 'राजपुरुषः' इत्यतः अभेदान्वयबोध एव भवति । संसर्गतावादिना चोक्तवाक्यादभेदान्वयार्थं केवलं कर्मधारय एव समासःस्वीक्रियते । परं किमेतावता विभिन्नबोधापत्तिस्तु संसर्गतामतेऽपि दुर्निवार्येति चेत् भेदविषयकत्वाभेदविषयकत्वरूपं विषयमनिवेश्य केवलं राजपुरुष इति वाक्याज्जायमानं बोधं प्रति तादृशसमभिव्याहारस्यकारणत्वस्वीकारेणात्र मते गौरवस्याभावात् ।

तस्मात् नामार्थस्य नामार्थेन सह धात्वर्थेन वा समं भेदान्वये नावलोक्यते किमपि बाधकम् इति संसर्गतावादिनः ।

अत्र प्रकारतावादिनः नञोऽसत्वे यत्र धर्मिणि येन सम्बन्धेन यद्वत्ता प्रतीयते, समागते नञि तत्रैव धर्मिणि तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभाववत्ताप्रतीतिर्जायते इति सर्वमान्यः सिद्धान्तः । एवं स्थिते 'राज्ञः पुरुषः' इत्यादौ स्वत्वसम्बधेन राजपदार्थस्य पुरुषेऽन्वये कृते समागते नञि 'स्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभाववान् पुरुषः' इति शाब्दबोधो वक्तव्यः स्यात् संसर्गतावादिना । स च वक्तुमप्यशक्यः, स्वत्वसम्बन्धस्य वृत्त्यनियामकतया अभावीयप्रतियोगितानवच्छेदकत्वात् । भवन्ति च संयोगसमवायाश्रयत्वादयः वृत्तिनियामकसम्बन्धा एव अभावीयप्रतियोगितावच्छेदकाः । स्वत्वस्व षठ्यर्थत्वे तु राजनिरूपितस्वत्वस्य आश्रयत्वसम्बन्धेन पुरुषे ऽन्वये समागते नञि 'पुरुषोन राज्ञः' इति वाक्यात् आश्रयत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजनिरूपितस्वत्वाभाववान् पुरुषः' इति बोधः सम्पद्यते सारल्येन । आश्रयत्वस्य वृत्तितानियामकतया अभावीयप्रतियोगितावच्छेदकत्वस्य तत्र वक्तुं शक्यत्वात् । यदि च वृत्त्यनियामकस्यापि स्वत्वादिसम्बन्धस्य अभावीयप्रतियोगितावच्छेदकत्वमभ्युपगम्यते, तदा ऽपि स्वत्वस्य षष्ठ्यर्थत्वं नूनमङ्गीकरणीयम् । अन्यथा 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इत्याकारकं विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं प्रति 'राज्ञः पुरुषः' इति वाक्यजन्यशाब्दबोधसामग्र्याः प्रतिबन्धकत्वकल्पनं भविष्यति संसर्गतामते । प्रकारतावादिमते तु उक्तप्रत्यक्षस्य कारणं यद् 'राजस्वत्वाभाववान् पुरुषः' इति विशेष्यतावच्छेदप्रकारकं ज्ञानं वर्तते तत्तु शाब्दबोधं प्रति या बाधसामग्री "राजस्वत्वाभाववान्" रूपा तद्घटितमेवेति

शाब्दबोधप्रत्यक्षयोः समकालिकप्राप्त्यभावात् बाध्यबाधकभावकल्पनं नैव कर्त्तव्यं भवति।

एवञ्च ङस्प्रभृतिसमेषां प्रत्ययानां सार्थकत्वं सिद्धमिति तत्रैव प्रातिपदिकस्यार्थस्य साक्षात् भेदसम्बन्धेनान्वयः। प्रातिपदिकार्थद्वयस्य तु न मिथः साक्षात् भेदान्वयः।

वैयाकरणसम्प्रदाये कौमुदीकारो भट्टोजिदीक्षितोऽपि प्रकारतावादमेवाभिप्रैति। प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यताश्रयः प्रत्ययार्थः पदार्थान्तरनिष्ठविशेष्यतानिरूपितप्रकारताश्रयोऽपि भवतीति प्रकारतावादाभिमतम्। अत एव प्रातिपदिकार्थसूत्रव्याख्यानप्रसंगे परिमाणमात्रस्योदाहरणम् 'द्रोणो व्रीहिः' इति प्रस्तुत्य अत्र प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम् प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमित्यवोचत्। नागेशेन तु अभेदेनेत्यस्य इतरसम्बन्धानवच्छिन्नविशेषणविशेष्यभावेन इत्यर्थद्वारा प्रकारतावादस्य पुष्टिं कुर्वतापि षष्ठीसूत्रव्याख्यानावसरे षष्ठ्यर्थस्य संसर्गविधयैव भानमित्युक्त्या संसर्गतावादस्यैव समर्थनं कृतम्। स्वत्वस्याकांक्षाभास्यत्वे पूर्वोक्तः प्रतिबध्यप्रतिबन्धकभावस्तु नैवाशंकनीयः, तादृशस्थले प्रत्यक्षशाब्दात्मकस्यैकस्यैव समूहालम्बनात्मकज्ञानस्य तत्र तत्र स्वीकारेण प्रतिबध्यप्रतिबन्धकभावस्य तत्र वक्तुमशक्यत्वात्।

वस्तुतस्तु वैयाकरणानुसारं विभक्तीनां सार्थकत्वमभ्युपगम्य तत्रैव प्रातिपदिकार्थस्य भेदान्वयं चाङ्गीकृत्य प्रकारतावादपक्ष एव युक्ततरः प्रतिभाति। अत एव द्वितीयातृतीयासप्तमीनामाश्रयो ऽर्थस्तत्र चाश्रये प्रकृत्यर्थस्यान्वयः, इति प्रतिपादितं भूषणे। न च विभक्तीनां सार्थकत्वे 'पञ्चकं प्रातिपदिकार्थः' इति नियमभंगापत्तिरिति वाच्यम्? "द्योतिका वाचिका वा स्युः द्वित्वादीनां विभक्तयः' इत्युक्त्यैव तादृशाशंकायाः निराकरणात्। अत एव 'तण्डुलं पचति' इत्यत्र तण्डुलनिष्ठाश्रयतानिरूपकविक्लित्यनुकूलो वर्तमानकालिको व्यापार इति द्वितीयार्थाश्रयत्वप्रकारकः, विक्लित्यात्मकधात्वर्थफलविशेष्यकः शाब्दबोधः सम्पद्यत इत्यलं विस्तरेण।

एकार्थीभावो व्यपेक्षा च

नान्तरीयकता खल्वतिरोहिता पदानां संश्लिष्टतायाः । दशदाडिमानि इत्यादीनि असम्बद्धानि पदानि गुरुतरवाक्यप्रयोजकानि भवन्त्यपार्थानि च। तत्र स्वस्वप्रकृतिविभक्तिनिराकरणपूर्वकं सम्मिलितेषु पदेषु निष्पन्ने च समासाख्ये समस्ते पदे तद्घटकपदशक्त्यतिरिक्ता विशिष्टार्थबोधिका शक्तिरस्तीति विधिपक्षो वैयाकरणानां, पदशक्त्यैव निर्वाहे नास्ति समासेऽतिरिक्ता शक्तिरिति निषेधपक्षश्च नैयायिकादीनाम् ।

अत्र पदत्वावच्छिन्नविधेयताश्रयस्य पदविधेः समर्थाश्रितत्वं मन्यमानेन भगवता पाणिनिना समर्थः पदविधिः[1] इति व्यरचि सूत्रम् । सुप्त्वं तद्व्याप्यधर्मं चोद्दिश्य विधीयमानः समासविधिः पदविधिः । सनादेः पदविधित्वं च पदविधि-सहचरितत्वात् बोध्यम् । पदविधिसहचरितत्वञ्च पदत्वावच्छिन्नोद्देश्यतानिरूपित-विधेयताश्रयीभूतप्रत्ययविधायकशास्त्रघटितपादघटकशास्त्रविधेयत्वम् । यथा—पदत्वा-वच्छिन्नोद्देश्यतानिरूपितविधेयताश्रयः क्यच्, तद्विधायकं शास्त्रं— 'सुपः आत्मनः क्यच्'[2] इति, तद्घटितो यस्तृतीयाध्यायस्य प्रथमः पादः, तद्घटक यद् धातोः[3] कर्मणः—इत्यादि शास्त्रं तद् विधेयताश्रयस्य सनः पदविधित्वं सुस्पष्टम् । एतादृशः पदविधिः समर्थः, समर्थाश्रितो भवति । यत्र सामर्थ्यमवतिष्ठते तत्रैव समासादि—पदविधिर्भवतीति भावः । अत्र समर्थपदस्य समर्थाश्रिते लक्षणा वेदितव्या । अन्यथा तु 'पदविधिः समर्थः सामर्थ्यवान्' इत्येतादृशोऽर्थः कृतः स्यात् । तदा च सम्पद्येत महती विसङ्गतिः । सा चेत्थम्— पदविधिः समर्थः सामर्थ्यवानित्यस्मिन्नर्थे सामर्थ्यं पदविधौ साक्षादेव विशेषणं स्यात्, न च संभवति तत् यतोहि— पदविधिः समासादिः 'राजपुरुषः' इति पदे तिष्ठति, ·····'राजन्-ङस्-पुरुष-सु' इति समुदाय-स्यैव समाससंज्ञाविधानात् । तत्रैव च 'राजपुरुषः' इति पदे सामर्थ्यमपि तिष्ठति । अतः 'राजपुरुषः' इत्येव सामर्थ्यवान् समर्थो वा शक्यते वक्तुम् । पदविधेस्तु साम-र्थ्येन सह एकाधिकरणवृत्तित्वमेव न तु सामर्थ्यस्याऽऽधारः पदविधिः । एवञ्चोभयोर-प्येक एवाधार इत्यनुलक्ष्य समर्थपदस्य समर्थाश्रिते लक्षणां कृत्वा प्रोच्यते—पदविधिः समर्थाश्रितोऽर्थात् सामर्थ्यवति तिष्ठति ।

---

1. पाणिन्यष्टाध्यायी 2/1/1
2. तत्रैव 3/1/7
3. तत्रैव 3/1/8

तच्चेदं सामर्थ्यमेकार्थीभावो व्यपेक्षा चेति द्विविधम् । तत्रैकार्थीभावं लक्षयता भाष्यकारेणोक्तम्— यत्र पदानि उपसर्जनीभूतस्वार्थानि, निवृत्तस्वार्थानि वा प्रधानार्थोपपादनाद् व्यर्थानि, अर्थान्तराभिधायीनि वा स एकार्थीभावः[1] । अस्यायं भावः— वृत्तिविषये जहत्स्वार्थपक्षः, अजहत्स्वार्थपक्षश्चेति पक्षद्वयम् । तत्र उपसर्जनीभूतः स्वार्थो येषां तानि उपसर्जनीभूतस्वार्थानि इति व्युत्पाद्य 'इतरपदार्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वमेवाजहत्स्वार्थत्वमुपसर्जनीभूतस्वार्थत्वं वा वाच्यम् । अस्य पक्षस्य स्वीकारादेव 'महान्तौ बाहू यस्यासौ महाबाहु' रित्यत्र सार्थकस्य महतस्तकारस्य आकारादेशो भवति । किं वा 'मुनित्रयं नमस्कृत्य' इत्यत्र सार्थकस्य नमःपदस्य योगे चतुर्थी प्राप्ता भवति, या च निवार्यते 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति परिभाषया ।

निवृत्तः सर्वथा परित्यक्तोऽर्थो यत्रासौ निवृत्तस्वार्थपक्षः । अयमेव पक्षः जहत्स्वार्थपक्षशब्देन व्यवह्रियते । पक्षेऽस्मिन्नुपर्युक्तोदाहरणद्वये महच्छब्दस्य नमःपदस्य च निरर्थकतया आत्वं दुर्लभं स्यात्, चतुर्थीप्राप्तिश्च दुर्लभैव स्यात् । एतेन स्पष्टं यत् पृथगुपस्थितिविषयार्थकत्वेन दृष्टानां पदानां विशिष्टविषयकैकशक्त्या विशिष्टार्थप्रतिपादकत्वमेकार्थीभावत्वम् । तत्र 'राजपुरुषः' इत्यादौ समासे चैकार्थीभावात्मकं सामर्थ्यमवतिष्ठते ।

'परस्परव्यपेक्षा [2]सामर्थ्यमेके' इत्येवंरूपेण व्यपेक्षां लक्षयाञ्चकार भाष्यकारः । स्वार्थपर्यवसायिनां पदानाम् आकाङ्क्षादिवशाद् यः परस्परान्वयः तदेव व्यपेक्षानामकं सामर्थ्यम् । इदं सामर्थ्यं 'राज्ञः पुरुषः' इत्यादावसमस्तस्थल एवावतिष्ठते । तत्र 'राजन्'-शब्दो राजरूपार्थमेवाचष्टे । तस्य च प्रकारतावादानुसारेण ङसर्थे स्वत्वे निरूपितत्वसम्बन्धेनान्वयः, तस्य च स्वत्वस्याश्रयत्वसम्बन्धेन पुरुषे । तस्मात्— 'राजनिरूपितस्वत्वाश्रयः पुरुष' इति बोधः । ङस्विभक्तिरिह पदसाधुत्वमात्रप्रयोजनिका । तस्मात् राजपदार्थस्याकाङ्क्षाभास्येन स्वत्वसम्बन्धेन पुरुषेऽन्वय इति स्वत्वसम्बन्धेन राजवान् पुरुष इति व्यपेक्षापक्षीयो बोधः संसर्गतावादपक्षे भवति ।

सामासादिवृत्तिषु तु एकार्थीभावरूपमेव सामर्थ्यम् । अतस्तत्र विशिष्टसमुदायशक्तिरेकैव । अतो राजपुरुषयोर्वृत्तौ संसृष्टतया राजपदार्थस्य पृथगनुपस्थित्या अजहत्स्वार्थायां वृत्तौ राजपदार्थस्य पदार्थैकदेशतया न भवति तत्र ऋद्धस्येति बाहीकस्य पदार्थस्यान्वयः, पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति नियमस्य जागरूकत्वात् । यदि च राजपदार्थस्यान्वयो वृत्त्यघटकेन ऋद्धपदार्थेन सममभिलषितः स्यात् तदा राजपदार्थस्य सापेक्षतया पुरुषशब्दप्रकृतिकेन सुबन्तेन सह

1. महाभाष्ये– पृ. 314
2. समर्थसूत्रे नवाह्निकभाष्यम् पृ. 332

तद्वाचकस्य समासो दुर्घट एव स्यात् सापेक्षस्यासमर्थत्वात् । न च सापेक्षस्यासमर्थत्वे 'देवदत्तस्य गुरुकुलम्' इत्यत्रापि समासो न स्यात् । वर्तते चात्र कुले गुर्विशेषणम्, गुरौ च गुरुत्वं विशेषणं, तत्र च गुरुत्वे निरूपितत्वसम्बन्धेन देवदत्तो विशेषणमिति वृत्त्यघटकपदार्थेन सापेक्षत्वमिति चेदत्रोच्यते— अत्र गमकत्वात् समासस्तथा पदार्थैकदेशेऽन्वयश्च सूपपादनीयः । गमकत्वञ्च-वाक्यजन्यशाब्दबोधीय-परस्परनिरूप्यनिरूपकभावापन्नविषयताविलक्षणविषयताकशाब्दबुद्धित्वावच्छिन्नाजनकत्वे सति तावदर्थविषयकशाब्दबोधजनकत्वम् । अर्थात् यत्र वृत्तिविग्रहयोः समानार्थकत्वं तत्रैव भवति गमकत्वम् । देवदत्तनिरूपितगुरुत्ववतः कुलमिति वृत्त्यर्थात् नातिरिच्यते देवदत्तस्य गुरोः कुलमित्यतो विग्रहाज्जायमानः प्रत्ययः । अतोऽत्र पदार्थैकदेशेऽपि पदार्थस्यान्वयो भवति च सापेक्षत्वेऽपि समासः । 'ऋद्धस्य राज्ञः पुरुषः' इत्यत्र तु ऋद्धाभिन्नो यो राजा तस्य पुरुषः इत्यर्थः प्रतीयते । 'ऋद्धस्य राजपुरुषः' इत्युच्यमाने तु ऋद्धपदार्थः पुरुषेऽन्वेति न तु राजनि । अतोऽत्रोभयत्र समानार्थकत्वाभावेन गमकत्वाभावान्न समास इति भावः ।

न चैवं 'राजपुरुषो दर्शनीयः' अत्रापि न स्यात् समासः । अत्रापि पुरुषपदार्थो वर्तते बाह्यीकेन दर्शनीयपदार्थेन सहान्वित इति सापेक्षत्वस्य स्पष्टत्वादिति वाच्यम् ? अत्रोच्यते— सापेक्षमत्र प्रधानं पुरुषः । भवति च समासः प्रधानस्य सापेक्षत्वेऽपि । प्रधानस्य सापेक्षत्वं न भवति सामर्थ्यविघातकम् । न चात्र प्रमाणाभावः ? 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति सूत्रे 'पुरुषो व्याघ्र इव शूरः' इति सामान्यधर्मप्रयोगे समासवारणाय कृतस्य 'सामान्याप्रयोगे' इति ग्रहणस्यैव तत्र मानत्वात् । अन्यथा प्रधानस्य पुरुषस्यात्र शूरेण सह सापेक्षतया असामर्थ्यादेव समासाभावे सिद्धे तदभावार्थं कृतस्य सामान्याप्रयोगे इत्यस्य ग्रहणं व्यर्थमेव स्यात् । तस्मात् प्रधानस्य सापेक्षत्वं सामर्थ्यविघातकं न भवतीति निश्चितम् ।

न चैवं 'भाष्याब्धिः क्वातिगम्भीरः' इति प्रयोगोऽनुपपन्नः, अतिगम्भीरपदार्थेन बाह्यीकेन सहात्रापि सापेक्षत्वस्य स्पष्टत्वादिति वाच्यम् ? नात्र भाष्यमब्धिरिवेति उपमितिसमासो येन भाष्यस्य प्राधान्यम् अब्धेश्चाप्राधान्यं, तत्प्रयुक्तसमासाभावश्च स्यात् । किन्तु अत्र तु भाष्यमेवाब्धिरिति रूपकसमासः । रूपकसमासे चोपमेयस्याप्राधान्यमुपमानस्य प्राधान्यं च भवति । अत्र भाष्ये अब्धित्वारोपात् अब्धेरेव प्राधान्यम् । स एव चात्र अतिगम्भीरपदार्थेन सह साकांक्ष इति प्रधानस्यात्र सापेक्षत्वं न भवति सामर्थ्यविघातकमिति बोध्यम् । अप्रधानस्य सापेक्षत्वमेव वृत्तिविघातकमिति सिद्धान्तः । अत एव— 'ऋद्धस्य राज्ञो मातङ्गाः', तिष्ठ त्वं शङ्कुलया खण्डो धावति मुसलेन' 'सुखं गोभ्यो हितं देवदत्ताय', 'मेधाविनो गर्गस्यापत्यमित्यादौ' बाह्यीकेन ऋद्धादिपदार्थेन सह सापेक्षतया न भवति समासस्तद्धितादिवृत्तिश्च ।

अयञ्चैकार्थीभावः 'राजन् + ङस्-पुरुष + सु' इत्यलौकिकविग्रहवाक्य एव कल्प्यते । यथा— गच्छतीत्यादौ कर्तृरूपार्थबोधिकां तिबादिशक्तिं तत्स्थानिनि लकारे प्रकल्प्य कर्मणि कर्त्तरि च विधीयते लकारस्तद्वत् 'राजपुरुषः' इति समस्त-पदनिष्ठा बोधकताशक्तिः परिकल्प्यते तदीयेऽलौकिके विग्रहवाक्ये । एवञ्च लौकिकविग्रहवाक्ये श्रूयमाणानां पदानां क्लृप्ता या शक्तिस्तस्यास्त्यागे मानाभावात् प्रत्येकं शक्तिसहकारेण समुदायशक्त्या विशिष्टार्थबोध इति साधीयान् पन्थाः । जहत्स्वार्थवृत्तिपक्षस्तु तत्रैवाङ्गीकार्यो यत्रावयवार्थविरुद्धः समुदायार्थः स्यात् । तदुक्तम्— 'जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी'[1] । अश्वगन्धाश्वकर्णादिशब्देषु स्पष्टमेव भासते अवयवार्थविरुद्धः समुदायार्थः ओषधिविशेषो व्यक्तिविशेषश्च । अतोऽत्रावयवार्थमतिरिच्य समुदायशक्त्यैव जायते बोधः ।

न च लोके प्रयोगार्हे लौकिके विग्रहवाक्ये 'राज्ञः पुरुषः' इत्यादावेव कथं न कल्प्यते एकार्थीभावः ? अलौकिके विग्रहवाक्ये तत्कल्पनस्य किमौचित्यमिति चेदवधार्यताम्— लौकिके विग्रहवाक्ये 'राज्ञः पुरुषः' इत्यादौ व्यपेक्षैव तिष्ठति न कदाचिदेकार्थीभावः । यद्यत्रापि समुदायनिष्ठैकैव शक्तिः स्यात् संश्लिष्टश्चैक एवार्थः प्रत्याय्येत तदा कावश्यकता 'राजपुरुषादिसमस्तरूपाणाम् ? अतो लौकिके विग्रहवाक्ये व्यस्तानि पदानि पृथक् पृथक् शक्तिमन्ति सन्ति स्वार्थबोधपराण्येव । 'राजपुरुषः' इति परिनिष्ठते यः खलु एकार्थीभावस्तस्य परिकल्पनं यदा तदीयेऽलौकिकविग्रहवाक्ये क्रियते तदैव परिनिष्ठितानां राजपुरुषादीनां साधुत्वमुपपद्यते । सिद्धानामन्वाख्यानं व्याकरणम् । 'राजपुरुषः' इत्यादिसिद्धं पदम् । एतेषामन्वाख्यानार्थं सूत्रप्रवृत्तिरभीष्टा । समासादिविधायकसूत्राणि तावत् प्रवर्त्तितुं न शक्नुवन्ति यावत्तत्र सामर्थ्यं न स्यात्, पदविधेः समर्थमात्राश्रितत्वात् । अतः राजपुरुष इति पदे वर्तमान एकार्थीभावः पूर्वं तदीयेऽलौकिके विग्रहवाक्ये परिकल्प्यते, ततः सामर्थ्यमनुलक्ष्य समासादिकार्येण 'राजपुरुषः' इति रूपं सिद्ध्यति । एवञ्च रूपसिद्ध्युपायत्वेन परिकल्प्यतेऽलौकिकविग्रहवाक्य एव एकार्थीभाव इति स्पष्टम् ।

इदमत्र विज्ञेयम्— वैयाकरणमते व्यपेक्षात्मके सामर्थ्ये समासो न भवति, तत्र वाक्यमेवावतिष्ठते । समासप्रकरणे विभाषाधिकारस्याभिमतत्वेऽपि यत्र 'पारे मध्ये षष्ठ्या वा,[2] 'द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्[3] इत्यादौ विकल्पवाचकानि पदान्युपन्यस्तानि सन्ति तत्रैकार्थीभावमात्रे पाक्षिकत्वं विधीयते न तु व्यपेक्षाया अपि, तादृशविकल्पस्य विभाषाधिकारेणैव सिद्धत्वात् । अतएव

1. समर्थसूत्रे लघुशब्देन्दुशेखरे
2. अष्टाध्यायी सूत्रम् 7/1/18
3. तत्रैव 2/7/3

'पारेगङ्गम्' इत्यस्याभावपक्षेऽपि एकार्थीभावसद्भावात् षष्ठीसमासेन गङ्गापारमित्यपि सिद्धयति। विभाषाधिकारात् व्यपेक्षया च 'गङ्गायाः पारमिति वाक्यमपीति विस्पष्टं भाष्यादौ।

अत्र नैयायिकाः— पदमेव शक्तम्। अर्थनिरूपिता शक्तिः पदे एव तिष्ठति, न तु वाक्येऽपि। तदुक्तम्— 'वाक्ये तु शक्तेरभावात् शक्यसम्बन्धरूपा लक्षणापि नास्ति[1]। वाक्यञ्चानेकपदघटितं भवति। अनेकानि पदानि च समासे सन्त्येवेति तत्र पदशक्त्यैव निर्वाहे न वर्तते तत्र काचिद् विशिष्टा शक्तिः। 'राजपुरुष' इत्यादौ राजपदार्थोपस्थापकस्य पुरुषपदार्थोपस्थापकस्य च सत्त्वेऽपि सम्बन्धरूपार्थस्योपस्थापने कृतं समुदायशक्तिस्वीकारेण पदार्थद्वयसंसर्गस्याकांक्षाभास्यत्वनियमाभ्युपगमेनैव सिद्धेः। तथा च स्वत्वसम्बन्धेन राजवान् पुरुषः इत्येव तत्र बोधः। येषां तु मते संसर्गस्य प्रकारत्वं तेषामपि राजसम्बन्धिनि लक्षणया तेन सह संभवति पुरुषस्याभेदान्वयः। ततश्च तत्राप्यनवकाशैव विशिष्टशक्तिशरणागतिः।

एवं च सर्वत्रैव नाङ्गीकार्या विशिष्टा शक्तिः, तत्स्वीकारमन्तराऽपि कार्यसिद्धेर्दृष्टत्वात्। अयमजहत्स्वार्थपक्ष एव व्यपेक्षाशब्देनोच्यते नैयायिकैः। वृत्तिघटकानां पदानां सार्थकतया तत्र बाहीकस्य पदार्थान्तरान्वयस्य वारणं तु 'सविशेषणानां वृत्तिर्न, वृत्तस्य च विशेषणयोगो न इति सिद्धान्तमुररीकृत्य कुर्वन्ति ते।

अत्र विमृश्यते— यथा तन्नये पङ्कजशब्दे अवयवशक्त्यतिरिक्ता समुदायशक्तिः स्वीकृता तथैव 'राजपुरुषः' इत्यादौ समासेऽपि अवयवशक्तितो भिन्ना समुदायशक्तिः स्वीकार्या। समासे विशिष्टशक्तिस्वीकारादेव जायते तस्यार्थवत्त्वं प्रातिपदिकत्वञ्च। किञ्च विशिष्टशक्तिस्वीकारमन्तरा 'चित्रगुः' इत्यत्र स्वाम्याद्यर्थप्रतीतिर्नैव स्यात्। न च लक्षणया सेति वाच्यम्? चित्रपदस्य तत्र लक्षणायां 'चित्रस्वामिगौः' इत्यर्थापत्तेः। गोपदस्य च तत्र लक्षणया चित्रापदार्थेन सहान्वये 'चित्राभिन्नगोस्वामी' इत्यर्थापत्तेः। चित्राभिन्नगौरिति बोधानन्तरं स्वामिनि लक्षणेति चेत्, विनिगमनाविरहः अतोऽनेकक्लिष्टकल्पनापेक्षया वरं समासेऽतिरिक्तशक्तिकल्पनमेव। एवञ्च पदविधेः समासस्य समर्थाश्रितत्वात् यत्रैकार्थीभावरूपं सामर्थ्यं तत्र समासः, यत्र तु व्यपेक्षारूपं सामर्थ्यं तत्र वाक्यमिति साधीयान् पन्थाः॥

1. न्यायसिद्धान्तमुक्तावलीशब्दखण्डे

शाब्दबोधप्रक्रिया

प्रस्तूयते इदानीं शाब्दबोधप्रक्रिया व्याकरणसाहित्यादिशास्त्रेषु व्युत्पित्सूनां तज्जिज्ञासूनाञ्च कृते । शाब्दबोधो नाम शब्दजन्यो बोधः । किन्तु कस्माच्चिदपि शब्दात् कस्याप्यर्थस्य बोधस्तावन्न भवति यावत्तदर्थस्योपस्थितिः तस्मात् शब्दात् न जायेत । एवं तस्मात् शब्दात् तस्यार्थस्योपस्थितिरपि तावन्न जायते यावत् तदर्थनिरूपिता शक्तिः तस्मिन् शब्दे गृहीता न भवेत् । इदमत्रावधेयं यदर्थनिरूपिता शक्तिः पदे तिष्ठति, न तु अस्य पदस्यास्मिन्नर्थे शक्तिरिति भ्रमितव्यं कदाचित् । शक्त्याश्रयत्वादेव पदं शक्तमित्युच्यते । एवञ्च पूर्वं शक्तिग्रहः, ततः उपस्थितिः, ततः शाब्दबोध इत्यस्ति शक्तिग्रहपदार्थोपस्थितिशाब्दबोधानां पौर्वापर्यक्रमः । तत्र यत्प्रकारकयद्विशेष्यकशक्तिग्रहो जायते, तादृशी एवोपस्थितिः, तथा शाब्दबोधोऽपि तत्प्रकारकतद्विशेष्यक एव भवति । यथा घटपदे 'घटत्वप्रकारकघटविशेष्यकार्थ-निरूपिता शक्तिः गृहीता वर्तते इति गृहीततादृशशक्तिकस्य श्रोतुः जायते घटत्व-प्रकारको घटविशेष्यकः अयं घटः' इत्याकारकः शाब्दबोधः, न तु घटप्रकारक-घटत्वविशेष्यकोऽपि बोधः । उक्तञ्च—

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलन्तत्र शक्तिधीः सहकारिणी ।।

शाब्दबोधे पदज्ञानं करणं भवति, न तु वर्तमानकालिकश्रावणप्रत्यक्षविषय-तावच्छेदकधर्मावच्छिन्नं पदं शाब्दबोधे कारणम् । अत एव मौनिश्लोकस्य श्रावण-प्रत्यक्षाभावेऽपि जायते ततः शाब्दबोधः । तत्र करणन्तु व्यापारवदसाधारणं कारणं भवतीति कृत्वा पदज्ञानस्य को हि भवति व्यापार इति जिज्ञसायामाह-द्वारं तत्र पदार्थ-धीः । द्वारत्वञ्च व्यापारत्वम् । तच्च तज्जन्यत्वे सति तज्जन्यजनकत्व-रूपम् । भवति हि पदार्थज्ञानस्य पदजन्यत्वे सति पदज्ञानजन्यशाब्दबोधजनकत्वात् द्वारत्वम् । इदञ्च पदार्थज्ञानं पदनिष्ठवृत्तिज्ञानाधीनोपस्थितिविषयत्वेनाभिमत-मस्ति । अत एव 'एकसम्बन्धिज्ञानं भवति अपरसम्बन्धिस्मारकमिति नियमानुसारं घटपदात् समवायसम्बन्धेन आकाशस्मरणे जातेऽपि न भवति तद्विषयकः शाब्दबोधः आकाशोपस्थितेः वृत्तिज्ञानजन्यत्वाभावात् ।

इयन्तु साधारणी प्रक्रिया शाब्दबोधस्य । वस्तुतस्तु 'सर्वं वाक्यं 'क्रियायां परिसमाप्यते' इति नियमात् क्रियामन्तरा कीदृशोऽपि निराकांक्षः शाब्दबोधः भवितुं नार्हतीति शाब्दबोधपदेन वाक्यार्थबोध एव गृह्यते । तत्र च भवन्त्येनकानि पदानि,

जायते च तेषां पारस्परिको ऽन्वय इति शाब्दबोधस्य नामान्तरम् अन्वयबोधो ऽप्यस्तीति वेदनीयम् । अतस्तदौपयिकभूताः सिद्धान्तास्तावत्प्रदर्श्यन्ते यैः जायते तादृशो विशिष्टोऽन्वयबोधः ।

शाब्दबोधस्य मुख्यं साधनं क्रिया । क्रियावाचको भवति धातुः । धातोश्च फलं व्यापारश्च' इत्यर्थद्वयम् । तत्र फलं व्यापारेण जन्यते इति भवति फलव्यापारयोः जन्यजनकभावः संबंधः । धातोः उत्तरं तिबादिप्रत्ययसंयोगेन निष्पाद्यते तिङन्तं क्रियापदव्यवहार्यम् । तिङ्प्रत्ययस्यापरं नाम 'आख्यातम्' अप्यस्ति इति न विस्मरणीयम् । तत्र कर्तृकर्मसंख्याकालाः तिङ्प्रत्ययार्थाः भवन्ति । तत्र च कर्त्ता वृत्तित्वसम्बन्धेन व्यापारे, तथा कर्मापि वृत्तित्वसम्बन्धेन फले विशेषणं भवति । यतो हि फलव्यापारौ वृत्तित्वसम्बन्धेन कर्तृकर्मणोरेव वर्तेते । तिबर्थसंख्या च कर्तृवाच्ये कर्तरि कर्मवाच्ये च कर्मणि विशेषणं भवति । तिङर्थः कालश्च वृत्तित्वसम्बन्धेन व्यापारे विशेषणं भवति, व्यापारश्च शाब्दबोधे मुख्यविशेष्यतां भजते । यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमिति नियमानुसारं धातुरूपप्रकृत्यर्थस्य व्यापारस्य शाब्दबोधे प्राधान्यमयुक्तं, तथापि 'भावप्रधानमाख्यातमिति 'अभियुक्त्यनुसारं शाब्दबोधे व्यापारस्य प्राधान्यमिति वदन्ति वैयाकरणाः ।

यथा 'रामो ग्रामं गच्छति' इति वाक्ये गम्धातोः संयोगानुकूलो व्यापारः अर्थः । तत्र संयोगरूपे फले ग्रामस्य वृत्तित्वसम्बन्धेनान्वयः, व्यापारे च रामस्य वृत्तित्वेनान्वयः, एकत्वसंख्या च रामे विशेषणीभूता, वर्तमानकालश्च व्यापारे विशेषणतां गत इति—रामाभिन्नैकत्वावच्छिन्नकर्तृवृत्तिः ग्रामनिष्ठसंयोगानुकूलो वर्तमानकालिको व्यापार इति बोधः ।

नैयायिकाश्च— आख्यातस्य कर्तरि कर्मणि च शक्तिस्वीकारे कृतिमत्त्वं कर्मत्वञ्च शक्यतावच्छेदकं स्यात् । तच्च कृतिमत्त्वं कृतिरेव । सा च कृतिः प्रत्येकं कर्तरि भिन्ना भिन्नेति नानाशक्यतावच्छेदकप्रयुक्तं गौरवमुद्भाव्य न कर्तरि कर्मणि चाख्यातस्य शक्तिः, किन्तु कृतौ फले चास्तीति वदन्ति । इयं कृतिः चैत्रादौ कर्तरि प्रकारीभूय भासते । यत्र वैयाकरणैः आख्यातार्थसंख्यायाः कर्तृकर्मणोरन्वयमभ्युपेत्य आख्यातार्थसंख्यानिष्ठप्रकारता निरूपितविशेष्यता सम्बन्धेन शाब्दबोधं प्रति आख्यातजन्यकर्तृकर्मणोरुपस्थितिः कारणमिति कार्यकारणभावः स्वीकृतः, तत्र नैयायिकैः संख्यायाः प्रथमान्तार्थे अन्वयमभ्युपेत्य आख्यातार्थसंख्याप्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति ब्रुवते । यद्यपि कर्तृवाच्ये कर्तुः कर्मवाच्ये कर्मणश्च प्रथमान्तत्वेन तत्र संख्यान्वयमभ्युपगच्छता वैयाकरणसिद्धान्तेन न प्रतीयते कश्चन भेदो नैयायिकसिद्धान्ते तथापि अत्र मते 'चन्द्र इव मुखं दृश्यते' इत्यत्र मुखे एकत्वसंख्यान्वय इव चन्द्रस्यापि प्रथमान्तत्वात् तत्रापि संख्यान्वयापत्तिः स्यात् । अतः एतादृशस्थले दोषोद्धाराय संख्यान्वयं प्रति इतराविशेषणीभूतप्रथमान्तोपस्थितिः

कारणमिति कार्यकारणभावः स्वीकरणीयः । तथा चात्र चंद्रस्य इवार्थसादृश्ये विशेषणतया न तत्र संख्यान्वयः । एवञ्चात्र मते गौरवं स्पष्टमेव ।

'प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमिति नियममधिष्ठाय एतन्मते धात्वर्थो व्यापारः प्रत्ययार्थे कृतौ विशेषणं भवति । अतोऽत्र मते— चैत्रो ग्रामं गच्छतीति वाक्यस्य 'ग्रामाभिन्नाश्रयवृत्तिसंयोगानुकूलव्यापारानुकूल वर्तमानकालिककृतिमानेकत्वावच्छिन्नः चैत्रः' इति प्रथमान्तार्थविशेष्यकः शाब्दबोधः । परञ्च नैतत् युक्तम्—यतो हि उत्कटधावनप्रतिपिपादयिषया प्रयुक्ते 'पश्य मृगो धावतीति' वाक्येवैयाकरणानुसारं शाब्दबोधे भावनायाः प्राधान्ये 'मृगकर्तृकं यद् धावनं तत्कर्मकं दर्शनमित्येकवाक्यं भवति । यद्यप्यत्र धावनस्य दर्शनकर्मत्वं वर्तते तथापि तद्वाचकस्य धातोः सत्वात्, ततश्च सुबादीनामभावात् न भवति ततो द्वितीया । नैयायिकरीत्या प्रथमान्तार्थस्य शाब्दबोधे प्राधान्ये स्वीक्रियमाणे 'धावनाश्रयो यो मृगस्तत् कर्मकं दर्शनमिति बोधे मृगस्य कर्मत्वात् ततो द्वितीयापत्तौ 'मृगो धावति मृगं पश्य' इत्येवं वाक्यद्वयापत्तिः स्यात् । एवं नैयायिकरीत्या आख्यातस्य कृतिफलवाचकत्वमपि न युक्तम् । फलव्यापारयोः धातुनैव लभ्यत्वात्, तिङस्तदंशे शक्तिकल्पने गौरवात् । एवञ्च शाब्दबोधे व्यापारस्यैव प्राधान्यमिति सुस्थिरः पक्षः ।

तत्र च शाब्दबोधे एकपदार्थे अपरपदार्थस्य यः संसर्गः तस्य भानेऽपि मतद्वयमस्ति । यथा 'मुखं चन्द्रः' इत्यत्र मुखे यः चन्द्रस्य आहार्यभेदो भासते 'चन्द्राभिन्नं मुखमिति' बुबोधयिषया तस्य अभिहितान्वयवादिभिः तात्पर्यनामिकका वृत्तिः स्वीकृता । तदुक्तम्—

> तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने ।
> तात्पर्यार्थं तदर्थं तु वाक्यं तद्बोधकं परे ।।

संसर्गबोधस्येयं परम्परा न्यायशास्त्रे संसर्गमर्यादापदेनोच्यते । अर्थात् एकपदार्थनिष्ठानुयोगितानिरूपकः अपरपदार्थनिष्ठप्रतियोगितानिरूपकः संसर्गः संसर्गमर्यादया अर्थात् आकांक्षया भासते । यस्य पदार्थस्य येन पदार्थेन सह यादृशान्वयस्य भवति आकांक्षा तादृशः सम्बन्धस्तत्र आकांक्षाबोधविषयो भवति । तत्र च नास्ति कस्यापि पदस्य शक्तिः । यथोपर्युक्तोदाहरणे मुखचन्द्रयोर्भेदस्यैवाकांक्षेति तत्र भासते अभेदः । 'राज्ञः पुरुषः' इत्यादौ भेदस्यैवाकांक्षा इति तत्र भेदो भासते । मतमिदं संसर्गतावादपदेनोच्यते ।

प्रकारतावादिनस्तु समानविभक्तिकस्थले अभेद एव विशेषणविभक्तेरर्थः । 'विरुद्धविभक्तिकस्थले राज्ञः पुरुषः' इत्यादौ अभेदातिरिक्तः स्वत्वाधेयत्वादिकः सम्बन्धः विशेषणविभक्त्यर्थो भवति । स च सम्बन्धः प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यताश्रयोऽपि स्वोत्तरनामार्थनिष्ठ-- विशेष्यतानिरूपितप्रकारताश्रयोऽपि

भवतीति मतमिदं प्रकारतावादपदेनोच्यते । सम्बन्धस्य वैभिन्न्येपि भेदाभेदयोर्मध्ये सर्वेषां गतार्थतया क्वचिद् अभेदसम्बन्धेन शाब्दबोधः, क्वचिच्च भेदसम्बन्धेन शाब्दबोध इति जायते तस्य द्वैविध्यं प्रकारेणानेन ।

इदमप्यत्र विज्ञेयम्— यस्य पदार्थस्य कुत्रापि अन्वयः क्रियते स अन्वयस्य प्रतियोगी कथ्यते । यत्र च तस्यान्वयः स खलु अन्वयस्य (सम्बन्धस्य) अनुयोगीत्युच्यते । किञ्च यस्यान्वयो जातः स विशेषणं यत्र चान्वयः स विशेष्य इत्यपि भवति व्यवहारः । एवञ्च विशेषणे विशेषणता सम्बन्धीया प्रतियोगिता तिष्ठति चेत् विशेष्ये, विशेष्यता, सम्बन्धस्यानुयोगिता च तिष्ठति ।

इमाः प्रतियोगितानुयोगिताविशेष्यतादयो विषयतापदेनोच्यन्ते । तत्र येन सम्बन्धेन विशेषणता भवति स सम्बन्धः तथा विशेषणनिष्ठो धर्मश्च तत्र वर्तमानायाः विशेषणतायाः अवच्छेदको भवतीति विशेषणतापि तत्सम्बन्धावच्छिन्ना तद्धर्मावच्छिन्ना चोच्यते । एवैव गतिः सर्वासां विषयतानां भवति । यथा 'नीलो घटः' इत्यत्र नीलपदार्थस्य अभेदसम्बन्धेन घटपदार्थे अन्वय इति नीले विशेषणताख्या विषयता, घटे च विशेष्यताख्या विषयता, सम्बन्धश्च तयोः अभेद इति—

अभेदसम्बन्धावच्छिन्ननीलत्वावच्छिन्नप्रकारतानिरूपित घटत्वावच्छिन्नविशेष्यताकः शाब्दबोध जायते । एवं 'मुखं चन्द्रः' इत्यत्र चन्द्रपदस्य चन्द्रसदृशे लक्षणां विधाय तस्य मुखेन सहाभेदान्वये-अभेदसम्बन्धावच्छिन्नचन्द्रसदृशत्वावच्छिन्नप्रकारतानिरूपितमुखत्वावच्छिन्नविशेष्यताकः शाब्दबोधः । यत्रद्वयोः पदयोः समानविभक्तिकत्वं भवति तत्र अभेदान्वयो जायते, यथा उपर्युक्तोदाहरणद्वये । यत्र द्वयोः पदयोः भिन्नविभक्तिकत्वं तत्र जायते भेदान्वयः यथा 'राज्ञः पुरुषः' इत्यत्र राजपदार्थस्य स्वत्वसम्बन्धेन पुरुषे ऽन्वये कृते 'स्वत्वसम्बन्धावच्छिन्नराजत्वावच्छिन्नराजनिष्ठप्रकारतानिरूपित पुरुषत्वावच्छिन्नविशेष्यताकः शाब्दबोधः । स चायं शाब्दबोधः आत्मनिष्ठप्रत्यासत्त्या, विषयनिष्ठप्रत्यासत्त्या च द्वैविध्यमासादयतीत्यन्यत्र विस्तरः ।

शब्दशास्त्रीयमेकं विवेचनम्

इदानीं प्रस्तूयते शब्दशास्त्रीयं प्रश्नद्वयं, तदीयं समाधानं च समीक्षणाय विदुषाम् । तत्र तावत् प्रथमः प्रश्नः- उभयप्राप्तौ कर्मणीति सूत्रेण कृतस्य कर्मणि षष्ठीनियमस्य 'शेषे विभाषा' इतिवार्तिकेन स्त्रीप्रत्ययाकाकारभिन्नेषु कृत्सु विकल्पितत्वेन नियमाप्रवृत्तिपक्षे आश्चर्यो गवां दोहोऽगोपेनेत्यत्र अगोपस्येत्यत्र कर्तर्यपि षष्ठी प्राप्नोति । एवं रामेण रावणस्य हननमित्यत्र रामस्येत्यपि । घञ्ल्युटोः स्त्रीप्रत्ययाकाकारभिन्नत्वात् । न चेष्टापत्तिः ? अविदितकथासन्दर्भाणां रामस्य रावणस्य हननमित्यत्र रामरावणयोः कर्मकर्तृभावस्य वैपरीत्येनापि प्रतीत्यापत्तेः । एवं प्रदर्शितोदाहरणद्वये 'गोदोहः' 'रावणहननम्' इतिकर्मणि षष्ठ्याः समासोऽपि प्राप्नोति षष्ठीति सूत्रेण । कर्मणिचेति समासनिषेधस्य उभयप्राप्तौ कर्मणीतिसूत्रनियमितषष्ठीमात्रविषयत्वात् । प्रकृते च नियमाप्रवृत्तिपक्षे कर्तृकर्मणोः कृतीत्यनेनैव षष्ठ्याः प्राप्तत्वेन समासस्यनिर्बाधत्वात् । न च समासेऽपीष्टापत्तिः ? कर्तरि षष्ठ्याः समासः कर्मणि षष्ठ्या वा समास इति संशयापत्तेः । उभयत्रापि षष्ठ्याः समाससंभवात् । एवं शंकरविजयः, रावणवधः देवानां विजयः, असुराणां पराजयः, इत्यादिस्थलेषु कर्तृकर्मभावव्यवस्था कथम् ?

द्वितीयप्रश्नस्तु सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च । अत्र बालमनोरमा– सप्तम्यन्तोपमानसहिते पूर्वपदे यस्य तत् सप्तम्युपमानपूर्वपदं, तस्य समस्तपदस्य पदान्तरेण बहुव्रीहिर्वाच्यः कण्ठेस्थः कालोयस्य स कण्ठेकाल इति । इदं विग्रहप्रदर्शनं कथं संगच्छते ? कण्ठेस्थः कालो यस्येत्यत्र हि सप्तम्यन्तसहितं कण्ठेस्थ इत्येतदेव न तु कण्ठ इत्येतत् । तस्य केवलं सप्तम्यन्तत्वेन सप्तम्यन्तसहितत्वाभावात् । तथा च सप्तम्यन्तसहितं कण्ठेस्थ इत्येतत् पूर्वपदं यस्य इति क्रियमाणे विग्रहे यस्येत्यनेन कण्ठेस्थकालशब्द एव ग्रहीतव्यो भवति । तस्य च समस्तपदस्य पदान्तरेण समासो नास्त्येव ।

एवम् उष्ट्रमुखमिव मुखं यस्येत्यत्रापि उपमानसहितम् उष्ट्रमुखमुखम् इत्येतदेव न तु उष्ट्रमुखमित्येतत्, तस्य केवलमुपमानत्वेन उपमानसहितत्वाभावात् । तथा चोपमानसहितम् उष्ट्रमुखमुखमित्येतत् पूर्वपदं यस्येति विग्रहे क्रियमाणे यस्येत्यनेन ग्रहीतव्यं समस्तपदमेव न दृश्यते । कुतस्तस्य पदान्तरेण समासः ? इति—

अत्र समाधीयते— यदप्युक्तम् उभयप्राप्तौ कर्मणि इति सूत्रेण कृतः कर्मणि षष्ठीतिनियमः 'शेषे विभाषा' इत्यनेन स्त्रीप्रत्ययाकाकारभिन्नेषु कृत्सु विकल्प्यत इति तन्न मनोरमम् । यतोहि–एकस्मिन् कृति कर्तृकर्मणोरुभयोः प्राप्तायां षष्ठ्यां कर्मण्येवेति नियमनेन कर्तरि षष्ठीप्रतिषेधे एवास्यतात्पर्यं न तु कर्मणि षष्ठी-विधाने । एवञ्च कर्मण्येव षष्ठी न तु कर्तरि इति यो नियमः प्रस्तुतीकृतः स तु 'स्त्रियां क्तिन्' इत्यधिकारे विहितयोरकाकारयो निषिध्यते । अर्थात् तत्र कर्तर्यपि षष्ठी जायत एव । अनेन वार्तिकेन अकाकारयोः सतोः साधिता षष्ठी आभ्यां-भिन्ने 'स्त्रियां क्तिन्' इत्यधिकारविहिते प्रत्यये विकल्पेन भवतीत्यत्रैव 'शेषे विभाषा' इत्यस्य तात्पर्यम् । उदाहृतश्च भाष्ये—शोभना खलु पाणिनेः सूत्रस्य कृतिः । शोभना खलु पाणिनिना सूत्रस्य कृतिरिति ।

'आश्चर्यो गवां दोहोऽगोपेन' इत्यत्र यो घञ् प्रत्ययो, नासौ 'स्त्रियां क्तिन्' इत्यधिकारस्थः । एवमेव रामेण रावणस्य हननमित्यत्र जायमानो ल्युडपि स्त्र्यधि-कारबहिर्भूत एवेति नात्र कर्तरि षष्ठ्यवकाशः कथञ्चिदपि । यदि च शेषे विभाषा इत्यत्र शेषपदेन अकाकाराभ्यां व्यतिरिक्तः स्त्र्यधिकारस्थः प्रत्यय एव केवलं न गृह्यते अपितु अविशेषेण विभाषा अभिलष्यते तदा उपर्युक्तोदाहरणद्वये कर्तर्यपि पाक्षिकी षष्ठी प्राप्नोति, न तु केवलं षष्ठ्येव । तेन पक्षे तृतीयाया अपि जाय-मानत्वेन कर्तुरभिज्ञानं सुलभमेव । यथोदाहृतम्— शब्दानामनुशासनमाचार्येण आचार्यस्य वेति । अत्र च आचार्यरूपस्य कर्तुःपरिचयः सुस्पष्ट एव । एवमेव रामेण रामस्य वा रावणस्य हननमिति जायमाने वाक्ये रामकर्तृकं रावणकर्मकमेव हननं बोधयिष्यते पाक्षिकतृतीययेत्यविदितकथासन्दर्भाणामपि न भ्रान्तत्वापत्तिः । शेषे-विभाषा' इत्यत्राविशेषेण विभाषाग्रहणपक्षे कर्तरि क्रियमाणषष्ठ्या सह जायमाना नान्तरीयतृतीया पूर्णसशक्ता कर्तृत्वं द्योतयितुमिति नास्त्यवसरः कस्यापि वैपरी-त्यस्य ।

अग्रे यदुक्तं 'गोदोहः' 'रावणहननम्' कर्मणि षष्ठ्याः 'षष्ठीति सूत्रेण समासो-ऽपिप्राप्नोति । कर्मणिचेति समासनिषेधस्य उभयप्राप्तिसूत्रनियमितषष्ठीमात्रविष-यत्वात् । प्रकृते च नियमाप्रवृत्तिपक्षे कर्तृकर्मणोः कृतीत्यनेनैव षष्ठ्याः प्राप्तत्वेन समासस्य निर्बाधत्वात् ।

अत्रोच्यते— केयमत्र नियमस्याप्रवृत्तिर्नाम ? नियमस्याप्रवृत्तेस्तात्पर्यमिदन्तु कथमपि न विभावनीयं यत् सूत्रमेव न प्रवर्तते, किन्तु कर्मण्येवेति नियमो न प्रवर्तत इत्येव तदीयं तात्पर्यमवधारणीयम् । अत एव विचित्रा सूत्राणां कृतिः पाणिनेः पाणिनिना वा इत्यत्र कर्तरि पाक्षिकी षष्ठी सम्पन्ना । यत्र च कर्तुरप्रयोगः किन्तु केवलं कर्मण एव प्रयोगस्तत्र न भवति प्रवृत्तिः 'उभयप्राप्तौ कर्मणीत्यस्य । यतोहि 'कृत्वोऽर्थप्रयोगे' इत्यतः प्रयोगे इत्यनुवर्त्य उभयोः प्रयोगे एव तस्य प्रवृत्तेः ।

एवञ्चैतादृशस्थले कर्तृकर्मणोः कृति' इत्यस्यैव प्रवृत्तिरिति तद्विहितषष्ठयाः समासस्य सिद्धत्वेन 'गोदोहः रावणहननमित्यादयः प्रयोगाः सिद्ध्यन्ति । अत एव अथ शब्दानुशासनमिति भाष्यप्रयोगः संगच्छते । यत्र तु उभयोः प्रयोगस्तत्र उभयप्राप्तौ कर्मणि 'इत्यनेन कर्मणि षष्ठ्यां कृतायामपि शेषे विभाषेत्यनेन कर्तरि अपि षष्ठ्याः विकल्पितत्वेन शब्दानामनुशासनमाचार्येण आचार्यस्य वेत्यादयः प्रयोगा जायन्ते । न चात्र अनुशासनस्य कर्मवाचकशब्दप्रकृतिकसुबन्तेन समासः तस्य कर्मणिचेत्यनेन निषेधात् । न वा कर्तृवाचकशब्दप्रकृतिकसुबन्तेनैव समासः तेन सह तस्य सामर्थ्याभावात् । न चात्र मानाभावः ? आकांक्षावैचित्र्यस्यैव मानत्वात् ।

शंकरविजयः, रावणवधः, देवानां विजयः असुराणां पराजयः, इत्यादौ कर्तृ-कर्मव्यवस्था कथमिति जिज्ञासायामिदमस्ति वक्तव्यं यत् जयवधादयः शब्दा भाव-प्रत्ययान्ताः सम्बन्धिनि नित्यसाकांक्षाः सन्ति । शंकरस्य विजयः शंकरविजयः, इत्यत्र जये कर्तृकत्वस्यैवाकांक्षा न तु अन्यकर्तृकशंकरकर्मकविजयोऽत्र भासते । रावणस्य वधः रावणवधः इत्यत्र वधे रावणनिष्ठं कर्मत्वमेव भासते नतु कर्तृत्वम् । अन्यतरोपादाने कर्तृकर्मणोः कृति' इत्यनेन षष्ठीति जायत एव तत्र समासः । उभयोरूपादाने तु रामेण रावणस्य वधः इति प्रयोगे स्पष्टमेव भासते कर्तृत्वं कर्म-त्वञ्चेति न काप्यनुपपत्तिः । अत्र समासस्तु कथमपि शंकनीय एव नहि, वधस्योभयत्र सांकाक्षत्वेनान्यतरेण सहासामर्थ्यात् ।

द्वितीयप्रश्नस्य प्रसंगे वक्तव्यमिदमास्ते यत्— सप्तम्युपमानपूर्वपदस्योत्तर-पदलोपश्च इति वार्तिकस्य व्याख्यानं स्वयमेव भाष्यकृता एवं कृतम्— सप्तमीपूर्व-पदस्योपमानपूर्वपदस्य च बहुव्रीहिर्वक्तव्यः । उत्तरपदस्य च लोपो वक्तव्यः । अत्र सप्तमीपदेन प्रत्ययग्रहणे' इति परिभाषया सप्तम्यन्तं ग्राह्यम् । तथा च सप्तम्यन्त-पूर्वपदस्य पदान्तरेण बहुव्रीहि र्वाच्य इति वार्तिकार्थः सम्पद्यते । एवञ्च कण्ठे तिष्ठतीति कण्ठेस्थः— उपपदसमासः । इदं कण्ठेस्थ इति पदं सप्तम्यन्तपूर्वपदक-मस्त्यवेति अस्य पदान्तरेण काल इति प्रथमान्तेन समासे उत्तरपदस्य 'स्थ' इत्यस्य लोपे च कृते 'कण्ठेकालः' इति सिद्धौ समुपेक्षणीया अत्रत्या बालमनोरमेति हृदयम् । वस्तुतस्तु-'सप्तमीबहुव्रीहौ' इत्यत्र सप्तमीग्रहणात् न केवलं समानाधिकरणानामेव बहुव्रीहिरपि तु व्यधिकरणानामपीति कण्ठे कालो यस्येति न्याय्यो विग्रहः । उष्ट्रमुखमित्यत्र तु उष्ट्र एवोपमानम् । उष्ट्रः मुखं यस्येति विग्रहे उष्ट्रे मुखत्वस्य बाधितत्वात् तस्य स्वमुखसदृशे लक्षणा भवति । एवञ्च उष्ट्रमुखमिति पदमुपमान-पूर्वपदकं भवति, तस्य च उष्ट्रमुखमिव मुखं यस्येति विग्रहे पदान्तरेण मुखमित्यनेन समासो भवतीति न काप्यनुपपत्तिः ।

अक्षरविवेचने ऋकारलृकारौ

विप्रतिपद्यन्ते केचित् स्वर एवाक्षरम्, न तु व्यञ्जनमपि । तत्रापि ऋकारलृकारौ न स्वरौ किन्तु व्यञ्जनवर्णौ । स्वरमात्रस्याक्षरत्वप्रसाधिकेयं विप्रतिपत्तिर्नास्त्यहैतुकी यजुः प्रातिशाख्ये 'स्वरोऽक्षरम्' 1।89 इति सूत्रेण तथा ऋक्प्रातिशाख्येऽपि— 'सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम्' 18।32 इति सूत्रेण च केवलं स्वराणामेवाक्षरत्वव्यवस्थापनेन तत्र सहेतुकत्वस्य स्पष्टं वक्तव्यत्वात् । अत एव स्वर्यते शब्द्यते व्यञ्जनं येन स स्वरः । विगतम् अञ्जनम्— उच्चारणं यस्य तत् व्यञ्जनम् अर्थात् यस्योच्चारणं न स्यात् तदेव व्यञ्जनमित्युभयोर्व्युत्पत्तिः शक्यते कर्त्तुम् । अतएव छन्दः-शास्त्रे केवलं स्वराणामेव मात्रागणना कृता न तु व्यञ्जनानामपि । अतः स्वरा एवाक्षराणि इति सिद्ध्यति ।

अत्रोच्यते नहि व्यञ्जनशब्दस्य व्युत्पत्तिः— विगतमञ्जनमुच्चारणं यस्येति युज्यते वक्तुम्, विशिष्टम् अञ्जनमुच्चारणं यस्येति व्युत्पत्तेरपि संभवात् । उच्चारणे वैशिष्ट्यञ्च-स्वरप्रयोज्यम् । अतएव स्वर्यते शब्द्यते येनेति स्वरशब्दस्य व्युत्पत्तिरपि संगता भवति । अत एव अचमन्तरेण व्यञ्जनस्योच्चारणमपि न संभवतीति भाष्यमपि संगच्छते । तस्मात् स्वर इव व्यञ्जनमपि अक्षरमिति शक्यते वक्तुम् । अतएव 'वर्णैकदेशा वर्णग्रहणेन चेत् सन्ध्यक्षरे समानाक्षरविधिप्रतिषेधः'[1] इति भाष्यप्रदीपोद्योते 'अ आ इ ई उ ऊ ॠ ऋ लृ ॡ' दश समाना इत्युक्त्वा समानाक्षरेषु ऋलृवर्णयोर्ग्रहणं कृतं संगच्छते । ऋक्प्रातिशाख्येऽपि 'अष्टौ सामानाक्षराण्यादितः' 1।9 सूत्रे वर्णसमाम्नायस्यादावक्षराणि समानाक्षरसंज्ञकानि भवन्तीत्युक्तम् । यद्यपि भाष्योद्योते दशवर्णानां समानाक्षरत्वं इह चाष्टौ वर्णानां तदिति पार्थक्यं वर्तते, तथापि लृकारमतिरिच्य ऋकारस्य तु अक्षरत्वम् ऋक्प्रातिशाख्यतोऽपि साधितमेव । किञ्च लृकारस्याक्षरत्वं तत्राप्यच्त्वं तस्य 'ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि'[2] इति सूत्रव्याख्याने निपुणमेव प्रसाधितम् । तत्र ह्युक्तम्— 'तत इत्यनयैव पञ्चम्या सन्ध्यक्षराणां समानाक्षरैः सहानन्तर्ये सिद्धे यदुत्तराणीति वदति तदन्तरा लृ ॡ इत्यनयोः स्वरयोः प्रतिषेधार्थम् ।' अत्र नामग्राहम् लृकारस्य स्वरत्वमुक्तं तेन तस्य अक्षरत्वञ्चापि सिद्ध्यत्येव । नह्यक्षरत्वमन्तरा तदधिकरणकं स्वरत्वं शक्यते वक्तुम् ।

1. नवाह्निकमहाभाष्यम् पृ. 116 ।
2. ऋग्वेदप्रातिशाख्यम्-श्री मंगलदेवशास्त्रिसम्पादितम् पृष्ठम् 24 ।

किञ्च वर्णानां मात्राप्रयुक्तह्रस्वादिसंज्ञाविधानावसरे "मात्रा ह्रस्वः"[1] इति सूत्रव्याख्यानं कुर्वता "ह्रस्वस्वरो मात्राकालो वेदितव्यः । यथा अ इ उ ऌ" इत्युदाहरणं च प्रदर्श्य ऌकारस्य स्वरत्वं तद्ज्ञाप्यमच्त्वञ्च निपुणं प्रादर्शि ।

यदि चोच्येत— एवं चेत् यजुःप्रातिशाख्ये 'स्वरोऽक्षरम्' तथा ऋग्वेदप्रातिशाख्ये च 'सानुस्वारः सव्यञ्जनः शुद्धो वापि स्वरोऽक्षरम्' इति स्वरमात्रस्याक्षरसंज्ञाविधानमपार्थमेवेति चेदत्र ब्रूमः— वेदे स्वराणामुच्चारणस्य महती प्रधानता दत्ता वर्तते । 'यो वा इमां स्वरशोऽक्षरशश्च वाचं विदधाति' तथा 'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह' इत्यादि भाष्येण चैतदेव ध्वन्यते । तत्र स्वरपदेन क्वचिदुदात्तादयः क्वचिच्च स्वरपदेनाकारादयो गृह्यन्ते । एवमेव उच्चारणप्राधान्यमधिष्ठायाक्षरपदमपि तत्र पारिभाषिकमेवावतिष्ठते । उक्तञ्च 'उभये त्वक्षराणि'[2] 1।19 इति सूत्रभाष्ये उव्वटेन 'ननु कस्मात् प्रकृता एव स्वरा दीर्घा ह्रस्वाश्चोभयग्रहणेन नान्तर्भाव्यन्ते । येनेमौ व्यवहितावपि ऌकारप्लुतावुभयग्रहणेनान्तर्भाव्येते इति । शृणु तन्त्रान्तरे 'स्वरोऽक्षरम्'[3] इति स्वरमात्रस्याक्षरसंज्ञा विधीयते । अयमपि 'सव्यञ्जनः सानुस्वरः शुद्धो वापि स्वरोऽक्षरम् 18।32 इति स्वरस्याक्षरसंज्ञां विधास्यति । न चाक्षरसंज्ञां विनोदात्तादयस्तदाश्रयाः स्युः । किञ्च गुरुलघुपूर्वाङ्गपराङ्गचिन्तामक्षरस्यैवेदानीं वक्ष्यति' । एतेन सिद्ध्यति यत् प्रयोजनविशेषानुरोधात् वैदिकाक्षरसंज्ञा पारिभाषिकी । तत्रार्धमात्राकालावच्छिन्नव्यञ्जनानामनुपयोगिता एवेति न कृता तेषां पारिभाषिक्यक्षरसंज्ञावैदिके विधाने । अन्यत्र तु सर्वत्राक्षरशब्देन स्वराणामिव व्यञ्जनानां चापि ग्रहणं दृश्यते । उक्तञ्च याज्ञवल्क्येन—

संयोगे तु परं स्वार्यं परं संयोगनायकम् ।
संयुक्तस्य तु वर्णस्य न स्वार्यं पूर्वमक्षरम् ।[4]

अर्थात् व्यञ्जनानां संयोगे परं व्यञ्जनं स्वार्यं=स्वरसहितं कार्यं, तदेव च संयोगनायकम् । पूर्वमक्षरं व्यञ्जनं न स्वार्यं न स्वरसहितं कार्यमिति । अत्राक्षरशब्देन व्यञ्जनग्रहणं स्पष्टतया कृतम् ।

अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये ।
द्विरोष्ठ्यौ तु विगृह्णीयात् यत्रौकारवकारयोः ।।[5]

---

1. ऋक्प्रातिशाख्यम् पृष्ठम् 36 ।
2. तत्रैव पृष्ठम् 31 ।
3. अथ. प्रा. 1/93 ।
4. याज्ञवल्क्य शिक्षा ।
5. पाणिनीयशिक्षा ।

अत्राक्षरशब्देन संयुक्तव्यञ्जनद्वयस्य ग्रहणं कृत्वा व्यञ्जनानामक्षरत्वं साधितमेव।

अतएव अक्षराणां गणनावसरे ऋक्प्रतिशाख्ये अष्टौ समानाक्षराण्यादितः इत्यारभ्य 'सर्वः शेषो व्यञ्जनानि'[1] इत्यन्तं यावदक्षरविभागः कृतः। तत्र च अक्षरपदेन स्वराणां व्यञ्जनानामुभयेषां गणना कृता। एवमेव यजुःप्रातिशाख्येऽपि 'अथातो वर्णसमाम्नायं व्याख्यास्यामः' इति प्रकरणे स्वरव्यञ्जनयोरुभयोर्ग्रहणं कृतम्। भगवता भाष्यकृताऽपि स्वरव्यञ्जनसमुदायत्मकचतुर्दशसूत्राणामक्षरसमाम्नायत्वं व्याहृतम्— 'सोऽयमक्षरसमाम्नायः पुष्पितः फलितः चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिरिति'[2]। किञ्च— अक्षरशब्दस्य व्याख्यानं कुर्वता भाष्यकारेण प्रत्याहाराह्निके 'अक्षरं न क्षरं विद्यात्' इत्युक्तम्। तत्र न क्षरतीति न क्षीयते वा यत् तदक्षरम्। अथवा 'अश् व्याप्तौ' अस्मात् औणादिके सरन्प्रत्यये निष्पन्नोऽक्षरशब्दो व्यापकार्थकः। 'अथवा वर्णं वाहुः पूर्वसूत्रे' अर्थात् पूर्वेषामाचार्याणां सूत्रे वर्णा अक्षराणीति इति वर्णानामेव अक्षरसंज्ञा कृता। एवञ्चोपर्युक्तप्रपञ्चेनेदं निश्चप्रचं यद् अक्षरशब्दो वर्णपर्यायः। स च द्विविधः स्वरो व्यञ्जनश्च। स्वतन्त्रोच्चारणविषयः स्वरः। स्वराधीनोच्चारणविषयो व्यञ्जनमिति ज्यायसी व्यवस्था। छन्दःशास्त्रे मात्राणामावश्यकतामनुरुध्य स्वराणामेव ताः परिगणिताः न तु अनुपयोगिन्यो व्यञ्जनमात्राः। नैतावता व्यञ्जनानामक्षरत्वाभावः शंकनीयः कदाचित्।

यदप्युच्यते– ऋकारऌकारौ न स्वरौ, किन्तु व्यञ्जने, यतो हि 'पदाद्यन्तयोर्नऌकारःस्वरेषु'[3] इति सूत्रेण ऌकारस्य स्वरेभ्यः पृथक्करणस्य दृष्टचरत्वात्। किञ्च 'धातौ स्वरः कल्पयतावॢकारः'[4] इति सूत्रे कृप्धातोः ऋकारस्य ऌकारभावे तस्य स्वरत्वं साधितम्। तच्च साध्यतेपूर्वतोऽसिद्धमेव। यदि ऌकारे पूर्वत एव स्वरत्वं स्यात् तदा तस्य तद्विधानं व्यर्थमेव स्यात्। किञ्चानयोः ऋकारऌकारयोः मध्ये रश्रुतिःलकारश्रुतिश्चापि अनयोः स्वरत्वाभावमेव व्यञ्जयति। नह्यन्यस्मिन् कस्मिंश्चिदपि स्वरे भवति श्रुतिर्व्यञ्जनवर्णस्य। तस्मादनयोर्व्यञ्जनत्वमेव युक्तमिति।

अत्र विचार्यते—ऋकारऌकारावुभावपि स्वरावेव। अक्षरसमाम्नाये, शिक्षायाम्, 'एते स्वराः' इति ऋक्प्रातिशाख्ये च स्वरमध्ये तयोरपि परिगणनस्य दृष्टत्वात्। याज्ञवल्क्येनापि—

"ऌकारस्य तु दीर्घत्वं नास्ति वाजसनेयिनः"

1. ऋक्प्रातिशाख्यम् पृष्ठम् 28
2. नवाह्निकं भाष्यम् पृ. 147
3. ऋक्प्रातिशाख्यम् पृ. 18
4. तत्रैव पृ. 393

इत्युक्त्वा लृकारस्य स्वरत्वं स्वीकृतमेव । दीर्घत्वादयः स्वरधर्माः सन्ति । अतः स्वरत्वाभावे लृकारस्य दीर्घनिषेधः सर्वथैवासंगतः स्यात् । यद्यपि 'कृपो रोलः[1] इति सूत्रव्याख्यानात् 'ऋति ऋवा'[2] 'लृति लृवा'[3] इति वार्तिकद्वयव्याख्यानाच्च 'ऋकारलृकारमध्ये रकारलकारौ स्तः' इति प्रतीयते तथापि नैतावता तयोरस्वरत्वं व्यञ्जनत्वं वा साधयितुं शक्यये, यतो हि ऋलृवर्णयोर्विषये प्रकारद्वयस्योज्जृम्भणात् । तत्र प्रथमः प्रकारोऽयं वर्तते यद् अक्षरसमाम्नाये– 'ऋलृक्' इति सूत्रे पठितौ हि ऋलृवर्णौ विवृतप्रयत्नवन्तावेकमात्रिकौ स्वरौ । अतस्तयोः परत्वे 'दध्यृकार' दध्य्लृकारः इत्यादीनि यण्घटितानि उदाहरणानि द्रष्टुं शक्यन्ते । अनयोश्च परस्परस्थानभेदात् सावर्ण्यं न प्राप्नोतीति ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यमिति प्रावोचत् वार्तिककारः । तेन ऋतः सवर्णे ऋति लृति च होतॄकारः इति दीर्घघटितं रूपं भवति । भाष्यकारेण च 'ऋति ॠ वा वचनम्,' लृति ॡ वा वचनम्' इति रूपेणापरोऽपि पक्षःप्रस्तुतीकृतः । अत्र वार्तिकद्वये विधेयं वर्णद्वयं द्विमात्रम् । तयोराद्यस्य ॠकारस्य मध्ये द्वौरेफौ तयोरेका मात्रा, तदुभयतः अज्भक्तेरपरा मात्रा । एवं 'लृतिल्लृ वा' इति वार्तिकविधेये द्वौ लकारौ तयोश्चैका मात्रा, लकारद्वयञ्चाभितोऽज्भक्तेरपरा मात्रा । एवं चेमौ ॠकारल्लृकारौ न विवृतप्रयत्नवन्तौ किन्तु रकारलकारद्वयवत् सादृश्यात् ईषत्स्पृष्टप्रयत्नवन्तौ बिभृतः कञ्चित् विशेषं स्वात्मनि । ईषत्स्पृष्टकरणत्वाच्चानयोरनच्त्वमिति संभावनायामाह–भाष्यकारः– 'ॠकारस्य लृकारस्य'चाच्त्वं वक्ष्यामि' इति भाष्यवचनमिदं विवृण्वता कैयटेनोक्तम्— 'ॠ वा वचनं ल्लृ वा वचनं'[4] इति ब्रुवता अच्त्वमनयोर्वक्तव्यम् । अन्यथा विधानमात्रमनयोः स्यात् नाच्कार्यं प्लुतः । सति त्वच्त्वे ताभ्यां त्रिमात्रयोरपि सावर्ण्यात् ग्रहणे सति प्लुतसिद्धिः[5] । तच्च समीहितमच्त्वमनयोः 'अइउण्' सूत्रानन्तरं पाठाद्‌बोध्यम् ।

एतेनोपर्युक्तप्रपञ्चेन ऋकारलृकारयोर्द्वैविध्यं तत्र च तयोरच्त्वमिति प्रसाधितम् । इदमत्रापरं विज्ञेयम्— इह समुदाया अप्युपदिश्यन्ते, अवयवा अपि । समुदायास्तावत् ऋ–लृ–ए–ओ–ऐ–औ इति । अवयवास्तु—अइउणरट्लण् इति । तत्र य एते वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतयः सन्ति तेषामवयवसदृशवर्णग्रहणेन ग्रहणेऽभिप्रेते प्रलूय इत्यत्र दीर्घोकारेऽपि ह्रस्वत्वप्रयुक्तस्तुक् इव, किं वा, खट्वाभिरित्यत्र ह्रस्वाकारप्रयुक्तो भिसः स्थाने ऐस् इव 'प्रातर्–ऋतम्' इत्यत्र

1. वैयाकरणसिद्धान्तकौमुदी बालमनोरमा पृ. 109
2. नवाह्निकं महाभाष्यम् पृ. 248
3. तत्रैव
4. तत्रैव पृ. 249
5. तत्रैव पृ. 350

[1]रोरीति सूत्रेण रकारलोपविषयकं शंकासमाधानं न कृतं भाष्ये। किञ्च यदि वर्णावयवा वर्णग्रहणेन गृह्येरन् तावतापि 'मातॄणाम्' इत्यत्र 'रषाभ्यां नो णः समानपदे'[2] इत्यनेन नकारस्य णत्वं न सेत्स्यति यतो 'यत्तद्रेफात् परं [3]भक्तेः इत्युक्त्यनुसारं ऋकारगतस्य रभागस्य सर्वतोऽज्भागेन व्यवहितत्वमिति रकारनकारयोरनान्तर्यात्।

विवेचनेनानेन यद्यपि प्रतिभासते ऋकारे रकारो लृकारे च लकारस्तथापि प्रतीतिरियं भ्रान्तिजन्यैवेति प्रतीमः। उक्तञ्च– कैयटेन 'नरसिंहवद् वर्णान्तरत्वात् सादृश्याच्च प्रत्यभिज्ञानात् तत्त्वासिद्ध्या पृथगुपलब्धानां वर्णानां समुदाये नास्ति सत्वम्। भ्रान्तिवशात्तु अवयवप्रतीतिः[4]। कैयटोक्तेरस्या व्याख्यानं कुर्वतोद्योतकारेणोक्तं 'सत्यपि गोसादृश्ये गवये गोत्वस्येव सन्ध्यक्षराद्यवयवेषु अत्वादिजातेरभावात् अकारादिग्रहणेन ग्रहणं नेति भावः। ऐकारादीनामेकेच्छाप्रयत्नजन्यत्वेनैकत्वमेव, अकारादिवत्। अत एवैषां पदवन्न वर्णसमूहत्वेन प्रतिभासः। भ्रान्तिगृहीतावयवाश्रयेण समुदायवाचोयुक्तिरिति[5]। एतेन निर्विवादं शक्यते वक्तुं यद् समुदायवत् प्रतीयमानानि वस्तुतोऽसमुदायरूपाणि सन्ध्यक्षराणि स्वतन्त्रसत्ताकानि सन्ति। भ्रान्त्या प्रतिभासन्तां तत्रावयवा इत्यन्यदेतत्। अतएव 'मातॄणामित्यादौ णत्वसिद्ध्यर्थं पठ्यते', 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति।

इदमपरमप्यविचारितरमणीयं विवेचनीयतामापद्यते यत् "अ–इ–उ" इति स्वराणामुच्चारणकाल इव ऋलृवर्णयोरुच्चारणकाले जिह्वा शिथिला सती पतिता न तिष्ठति। तेन मन्तव्यम् 'ऋकारलृकारौ न स्वराविति। तत्रोच्यते अ–इ–उ स्वराणामुच्चारणकाल इव 'ए ऐ ओ औ' इति वर्णानामुच्चारणकालेऽपि जिह्वा शिथिला सती पतिता न तिष्ठति। किमेतेन एषां वर्णानां व्यञ्जनत्वं स्वीकर्तुं शक्यते केनापि। नो चेत् ऋकारलृकारयोरेव कृते मुधैव एतादृश आग्रहः। वस्तुतः प्रत्येकं वर्णानामुच्चारणस्थानं भिन्नं भिन्नं भवति। तत्र स्थानप्रयत्नानुकूलैव जिह्वायाः स्थितिः। अतस्तद्द्वारा स्वरव्यजनविभागो न शोभनः। अतएव एकेनैव कण्ठेनोच्चार्यते अकारेण समं व्यञ्जनं कवर्गो ऽपि। स्वेन राजन्ते, स्वर्यन्ते वा यैस्ते स्वराः। एतादृशञ्च स्वरत्वम् अकारादीनामिव ऋकारलृकारयोरप्यव्याहतमेव। यथा अकारो व्यञ्जनानामुच्चारणे साहाय्यमाचरति, तथैव कृष्णशब्दघटकककारोच्चारणे ऋकारस्य तथा 'क्लृप्तशिखः' इत्यत्र ककारोच्चारणे लृकारस्य

1. सिद्धान्तकौमुदी बालमनोरमा पृ. 112
2. तत्रैव पृ. 154
3. नवाह्निकं भाष्यम् पृ. 121
4. तत्रैव पृ. 119
5. तत्रैव पृ. 120

साहाय्यं न केनापि तिरोहितम् । तेनास्थाने खलु सन्देहोदयः ऋकारलृकारयोरज्-विषयकः ।

'यत्तद् रेफात् परं भक्तेः' इति भाष्ये 'अभितोऽज्भक्तेरपरा मात्रा' इति कौमुद्याञ्च समापतितो भक्तिशब्दोऽपि नालम्बतेऽनालोचनताम् । तत्र भक्तिशब्दार्थो भागः । तेन रेफाद्भक्तेरित्यस्य रेफसदृशो यो भागः ऋकारे वर्तते तस्मात् परः अचो भाग एवाज्भक्तिः । तेन व्यवहितत्वात् मातृ़णामित्यादौ नस्य णत्वानापत्त्या आरभ्यते 'ऋवर्णान्नस्य णत्वं वाच्यमिति' । तस्मादकारादावचि स्वातन्त्र्येण यथा तेषामेव सर्वस्वम् तथैव ऋकारलृकारयोरप्यचोः यो रेफसदृशो लकारसदृशो वा भागस्तस्मात् परस्तस्यैव स्वकीयोऽज्भागो वर्तते, न तु तत्र अकारादिस्वराणां भागः कथंचित् शंकनीयः । "किरति गिरति," इत्यत्र ऋकारस्य, इरादेशः "मातुः" इत्यादौ तु उरादेशः "देवर्षिः" इत्यादौ च अरादेशः "ऋत्[1] इद्धातोः" "ऋत[2]उत्" इत्यादिसूत्रद्वारा यथादिष्टं लक्ष्यैकचक्षुष्कैस्तथैव भवति न तु तत्र अकारादीनां भक्तिं स्वीकृत्य विधीयते किमपि । अतः अक्षरशब्देन स्वरव्य-ञ्जनयोरुभयोर्ग्रहणम् । ऋकारलृकारौ चेत्युभावपि स्वरावेवेति नास्ति संशीति लेशः ।।

1. सिद्धान्तकौमुदी बालमनोरमा भ्वादौ पृ. 148
2. तत्रैव पूर्वार्धे पृ. 183

अवच्छेदकताविमर्शः

भवन्ति प्रत्येकं शास्त्राणां पारिभाषिकाः शब्दाः । तत्र प्रतियोगिता, अनुयोगिता, आधेयता, अधिकरणता, कार्यता, कारणतादयः पारिभाषिकाः शब्दा न्यायशास्त्रे प्रथितिं गताः सन्ति । इमाः कार्यताकारणतादयो विषयतापदेनोच्यन्ते । घटः कार्यम् तं प्रति कपालद्वयञ्च कारणमिति घटे कार्यताख्या विषयता, कपालद्वये च कारणताख्या विषयता । एवमेव "भूतले घटः" इत्यत्र घटे आधेयताख्या विषयता, भूतले चाधिकरणताख्या विषयता । एवमेव प्रतियोगिताख्या विषयता, अनुयोगिताख्या च विषयता प्रसिद्धैव । तत्र प्रतियोगिता, द्विविधा । सम्बन्धीया प्रतियोगिता, अभावीया प्रतियोगिता च । सम्बन्धस्य द्विष्ठत्वात् यस्य सम्बन्धः ... ापि प्रोच्यते तत्र सम्बन्धस्य प्रतियोगिता, यत्र च प्रोच्यते सम्बन्धस्तत्र अनुयोगि- ...ख्या विषयता । चन्द्रवन्मुखमित्यत्र चन्द्रसादृश्यं मुखेप्रोच्यत इति चन्द्रप्रतियोगिकं मुखानुयोगिकं सादृश्यमिति तत्र प्रत्ययः ।

अभावस्थले च यस्याभावः स प्रतियोगी । यत्र चाभावः स भवत्यनुयोगी । इदंप्रथमतयाऽत्राभावीयप्रतियोगितां प्रस्तुत्य तस्या अवच्छेदकं तदावश्यकत्वञ्च विचार्यते ।

तत्राभावो नामैकप्रकारस्यान्धकारः ! यथा जाते पुत्राभावे (विनष्टे पुत्रे) ब्रवीति तद्पिता यन्ममकृते जातोऽन्धकारः ! यथा प्रकाशात् बिभेति अन्धकारस्तथा घटाभावोऽपि घटाद् बिभेति ! घटस्तु प्रकाशस्वरूपः । यत्र स्थास्यति घटस्तत्र घटाभावः स्थातुं न शक्नोति । अर्थात् घटे घटाभावं दूरं कर्त्तुंशक्तिरस्ति ! घटो हि घटाभावस्यशत्रुरतः स प्रतियोगीति तत्रत्याशक्तिरुच्यते प्रतियोगितापदेन ! वयं घटं नाशयितुं क्षमाः सन्तोऽपि घटाभावमपाकर्त्तुमक्षमा एव । यद्यभिलषितं घटाभावस्यापाकरणं तदा घट आनेय एव भवति ।

तत्र घटे'''पृथिवी नास्ति, द्रव्यं नास्ति, घटो नास्ति, इत्यभावत्रयस्यापाकरणशक्तिरस्ति । परन्तु सा शक्तिः भिन्ना भिन्ना वर्तते । तत्र घटाभावदूरकरणशक्तिः घटत्वाधीना, द्रव्याभाव दूरकरणशक्तिश्च द्रव्यत्वाधीना । घटे यदि घटत्वं न स्यात् तदासौ घटाभावं दूरं कर्त्तुं न शक्ष्यति । अतः प्रतियोगिनिशक्तिनियंतृत्वेन स्थितं घटत्वादिकमेव अवच्छेदकपदेनोच्यते ! तेषामवच्छेदकानां विभिन्नतया घटनिष्ठाभावपलायनकारिका शक्तिरपि भिन्नैव । किन्तु तत्र यदवच्छेदकं स्वीकृतं

तत्रापि यदि शक्ति र्न स्यात् र्तर्हि तत् प्रतियोगिनि शक्तिनियामकं कथं स्यात् ? यथा क्षेत्रं परितो जलावरोधके (बांधइतिभाषायाम्) शक्ति र्न स्यात्तदाऽसौजलमवरोद्धुं नालं भवति। अतः अवच्छेदकेऽपि एका शक्तिः स्वीक्रियते या चोच्यते अवच्छेदकता पदेन। इदमत्रावधेयं यत्–अवच्छेदकं हि शक्तिं नियत्रयति, किन्तु एकः सम्बन्धो भवति यः शक्तेः प्रभावक्षेत्रं निरूपयति। घटो घटाभावं दूरं करोति चेत् केन सम्बन्धेनेति जिज्ञासा। दृश्यते तावत् संयोगेन घटवति भूतले समवायसम्बन्धावच्छिन्नप्रतियोगिताको घटाभावः। अतो वाच्यमेवं यत् संयोगसम्बन्धेन वर्तमानो घटः संयोगेन घटो नास्तीत्यभावस्यैव दूरकरणे समर्थः, अतः धर्मवत् सम्बन्धोऽपि भवत्यवच्छेदकम्।

यद्यवच्छेदकस्य स्वीकरणं न स्यात् तदा घटो नास्तीत्यभावस्य द्रव्यं नास्तीत्यभावेन सह किमपि वैलक्षण्यं न स्यात्। घटो नास्तीत्यभावस्य घटनिष्ठप्रतियोगितानिरूपकाभाव इत्यर्थः। द्रव्यं नास्तीत्यस्य द्रव्यनिष्ठप्रतियोगिताकाभाव इत्यर्थः। एवञ्च घटस्यापि द्रव्यत्वेन घटो नास्तीत्यभावोऽपि द्रव्यनिष्ठप्रतियोगिताकाभावो जात एव। द्रव्यत्वस्य व्यापकत्वेन यदा तन्निष्ठप्रतियोगिताकाभावो बहुषु स्थलेषु गतस्तर्हि घटाभावेऽपिगत एवेति घटाभावोऽपि द्रव्यत्वावच्छिन्नप्रतियोगिताकाभावपदेन व्यवहार्यतां यास्यति। एवञ्च घटाभावद्रव्याभावयो रैक्ये सम्पन्ने घटवति भूतले द्रव्यं नास्तीत्यभावो वक्तुमनर्हः। एवं घटशून्ये पटवति भूतले घटाभावस्य वक्तव्यत्वेऽपि द्रव्यं नास्तीत्यभावोवक्तुमशक्य एव स्यात्। पटरूप द्रव्यस्य तत्र वर्तमानत्वात्। अतः घटाभावद्रव्याभावयोरैक्यमनभिमतम्। तच्चोभयोः पार्थक्यं तावन्नोपपद्यते यावदवच्छेकं स्वीकृतं न स्यात्। अतः घटो नास्तीत्यभावीयप्रतियोगिताया अवच्छेदकं घटत्वं तथा द्रव्यं नास्तीत्यभावीयप्रतियोगिताया अवच्छेदकं द्रव्यत्वमिति अवच्छेदकभेदेनोभयोरभावयोः पार्थक्यं सिद्ध्यति।

एवमेव धर्मवत् सम्बन्धोऽपि अवच्छेदकं भवति। अन्यथा संयोगेन घटो नास्ति, समवायेन घटो नास्तीत्यभावयोः परस्परं वैभिन्न्यं न स्यात्। सम्बन्धस्यावच्छेदकत्वाभावेन उभयत्रापि घटत्वावच्छिन्नप्रतियोगिताकाभावस्यैव वक्तुं शक्यत्वात्। वस्तुतस्तु उभावपि अभावौ भिन्नौ। अत एव संयोगेन घटवति भूतले समवायेन घटो नास्तीत्युच्यते सर्वैः। संयोगेन घटाभावीया प्रतियोगिता संयोगसम्बन्धावच्छिन्ना, समवायेन च सा समवायसम्बन्धावच्छिन्नेति भवति विवेकः।

यो धर्मः यश्च सम्बन्धो यस्या अवच्छेदकः सा तत् धर्मावच्छिन्ना तत्सम्बन्धावच्छिन्ना च भवति। यथा समवायसम्बन्धेन घटं प्रति तादात्म्यसम्बन्धेन कपालद्वयंकारणम्। कार्यकारणयोरेकाधिकरणवृत्तित्वनियमात् तादात्म्येन कपालद्वयवति कपालद्वये समवायेनोत्पद्यते घटः। अवयवावयविनोः समवायस्य नियमात्

कपालद्वये समवायेनैव घटोत्पत्तिः। तत्रघटे या कार्यता सा समवायसम्बन्धेन घटत्वेन रूपेण च वर्तते। एवं कपाले या करणता सा तादात्म्यसम्बन्धेन कपालत्वेन धर्मेण च भवति। यो धर्मः यश्च सम्बन्धः यस्या अवच्छेदकः सा तद्धर्मावच्छिन्ना तत्सम्बन्धावच्छिन्ना च भवति। अतः घटनिष्ठाकार्यता–समवायसम्बन्धावच्छिन्ना घटत्वावच्छिन्ना च भवति। एवं कपालनिष्ठा कारणता तादात्म्यसम्बन्धावच्छिन्ना कपालत्वावच्छिन्ना च भवति। कार्यताकारणतादिविषयतानां परस्परं भवति निरूप्यनिरूपकभावसम्बन्धः। यथा घटनिष्ठकार्यताया निरूपिका कपालनिष्ठ-कारणता चेत् सा कार्यता तादृशकारणतानिरूपिता जातैव। तस्मादेवमुच्यते—समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपिता या तादात्म्यसम्बन्धाव-वच्छिन्ना कपालत्वावच्छिन्नाकपालनिष्ठाकारणता तादृशकारणतावत् कपाल-द्वयमिति।

इदमप्यवधेयम्—अन्यूनानतिप्रसक्तधर्म एवावच्छेदको भवति। घटनिष्ठकार्य-ताया अवच्छेदकं घटत्वमेव भवति न तु द्रव्यत्वं पृथिवीत्वं वा। यतोहि द्रव्यत्वं पृथिवीत्वं वा घटत्वापेक्षया अधिकदेशवृत्तिधर्मोऽस्ति। यदि नियमोऽयं न स्वीकृतः स्यात्तदा बहूपप्लवः स्यात् यथा निरूपितं पूर्वम्। तस्मात् समनियतधर्मस्यैवावच्छेद-कत्वं स्वीक्रियते। तेन सर्वमुपपन्नं भवतीत्यलम्।

असंगसूत्राणि सभाष्याणि

१. एकतादर्शनं शान्तिबीजम्

'तत्सृष्ट्वा तत्रैवानुप्राविशत्' तस्य भासा सर्वमिदं विभाति इत्याद्यौपनिषदवाक्यै विज्ञायते यत् विवधवैचित्र्योपेस्तस्यास्य जगतःआश्रयः प्रकाशकश्चैक एव। दध्निसर्पिरिव तिलेषु तैलमिव वा सर्वस्मिन्नसावोतप्रोतः। बहिर्दृश्यमानो भेदः काल्पनिको व्यावहारिकश्च। भेदमिमं पश्यतापि जनेन यदि आन्तरिकी एकताऽनुभूयेत तदा नास्त्यवकाशोऽशान्तेः कदाचन।

२. स्वपरिष्कारः सर्वविकासमूलम्

स्वशब्दोऽत्रात्मीयमनोबुद्ध्यहंकारादिपरः, सर्वशुद्धस्य निर्विकारस्यात्मनः परिष्कारासंभवात्। चिन्तनसाधनं मनः। इदमेव हेतुर्बन्धमोक्षयोः। आत्ममनः संयोगो ज्ञानकारणम्। ज्ञानं प्रवृत्तिमूलम्। असत् संकल्पात्, असदेवानुष्ठीयते। एको जनोऽसत्प्रवृत्तिपरः पश्यत्यनवरतमपरस्य दोषजातम्। एवमेव समाजस्य, राष्ट्रस्य आन्ताराष्ट्रिया च स्वार्थपरायणा परदोषनिरीक्षणपरा प्रवृत्तिरुज्जृम्भते विश्वस्मिञ्जगति। फलतः व्यक्तेः समाजस्य, राष्ट्रस्य चाभ्युन्नतिः संशयदोलादोदुल्यमानावतिष्ठते। अत आवश्यकमिदं स्वस्य मनोबुद्ध्यादेः परिष्कारः स्यात्। परिष्कृते तस्मिन् सात्विकविचारास्तत्प्रयुक्तानि सदनुष्ठानानि च जगद्व्याप्तानि स्युः। अस्यां स्थितौ सर्वेषां विकासः सुतरामेव।

३. अकर्त्तव्यत्यागः

द्वन्द्वात्मकं जगत्। रात्रिन्दिवम् सुखदुःखे, धर्माधर्मौ, पुण्यपापे, स्वर्गनरके, कर्त्तव्याकर्तव्ये इत्यादिरूपेण द्वन्द्वप्रसिद्धिः। तत्र कर्मणा विन्दतेऽमृतम् इत्युक्त्या कर्म सर्वैरनुष्ठेयम्। न कश्चिदपि तिष्ठति क्षणमप्यकर्मकृत्। अतोऽनिच्छताऽपि जनेन कर्मानुष्ठानं कर्त्तव्यमेव।

कर्माकर्मभेदेन कर्मणो द्वैविध्यम्। तत्रानुष्ठेयं तु कर्म एव न तु अकर्म कदाचन। उभयोः परिचायकं किमिति विसंवादे शास्त्रमेव मानम्। तत्प्रदर्शितं यथा अकर्त्तव्यं विज्ञाय तत्परित्यागेन कर्त्तव्यपालनं सुतराम्। प्रत्येकं जनेन क्रियमाणे कर्त्तव्यपालनेऽर्थात् अकर्त्तव्यत्यागे जगद्व्यवहारो भवितुमर्हति साधीयानिति संशीतिरहितं तथ्यम्।

४. परदोषदर्शनं महत्पातकम्

दोषदृष्टिरसूयामूला । असूया चित्तवृत्तिविशेषरूपा । निरन्तरं तदनुचिन्तनं स्वस्य दोषाधायकत्वसम्पादकम् । सति दोषाधायकत्वेऽसदनुष्ठानं, तच्च प्रत्यवायजनकं व्यवस्थाविभञ्जकञ्च । नास्त्यतो किमपि पातकं निरयसाधनम् । भगवदुन्मुखतासम्पादनमेव जीवनलक्ष्यम् । तच्च सर्वथा विनश्यति परदोषदर्शनेन । अतो ग्राह्याः परकीयगुणाः । तत्र सन्तोऽपि कथञ्चित् दोषाः सर्वथैवोपेक्षणीयाः । अत्रैव क्षेमङ्करत्वम् ।

५. सुखाशा दुःखजननी

सर्वे कामयन्ते सुखम् । परं नास्ति सुखमनवरतं क्षीयमाणेऽदृश्ये विलयपथारूढे दृश्यमात्रे । यच्च क्षणिकं स्वयमेव निरन्तरं विलीयमानं न कदाचिदपि हस्तगतं भवितुमर्हति तादृशं सांसारिकं वस्तुजातं सुखजनकं भविष्यतीति दुराशामात्रम् । दृश्यते च विपरीतमेव । अद्य महती धावनिका वर्तते सांसारिकस्य वस्तुनः समुपलब्धये । फलमपि नास्त्यविदितं सर्वेषां दुःखानुभवस्य परितापस्य च । अतः कुत्रापि वस्तुनि न कार्या सुखाशा । तावतैव सुखोपलब्धिरन्यथा तु दुःखमेव सर्वतः।

६. वर्तमानोपयोगः विकासमूलम्

मानवः सर्वश्रेष्ठः प्राणी । अस्त्ययं विवेकशीलो नेतरे प्राणिनः । अस्मिन्नेव जन्मनि शक्यतेऽनुष्ठातुं कर्म । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः । अतो वर्तमानस्यशरीरेन्द्रियादेरुपयोगो विकासार्थंकार्यः । विकासश्च आत्मस्वरूपोपलब्धिरेव । दृश्यादृश्यात्मकं शरीरं जगच्च । तत्र दृश्यमसत् अदृश्यमेव सत् । दृश्यं जडात्मकं चेददृश्यं चेतनात्मकम् । दृश्यं क्षीयतेऽनवरतमदृश्यञ्चास्ति शाश्वतिकमविकारितत्त्वम् । तदेवात्मस्वरूपम् । नास्ति कश्चन सम्बन्धः सतोऽसता ऋतेऽध्यासात् । अध्यास आरोपोऽवास्तविकः । शरीरादिकमसत् न स्वकीयमपितु मिलितम् । अतो मिलितस्यास्य जडात्मनः सदुपयोगः कार्यो जडात्मने जगते । त्याज्या चात्र ममत्वभावना । तावतैवोपलब्धिरवस्थिति र्वा स्वस्वरूपे । अयमेवचरमो विकासो मानवस्य ।

७. प्रसन्नतामूलमुदारता

प्रसन्नता आनन्दमयता चेत्यनर्थान्तरम् । सर्वैः काम्य आनन्दः । परं न सर्वत्रोपलब्धिस्तस्य । अहन्ता ममता च तद् विरोधिन्यौ । तद्बीजन्तु भेदबुद्धिः । जागरूकायां भेदबुद्धौ कथमुदियादुदारता । असत्यामुदारतायां भेदाच्छादितेऽन्तःकरणे प्रसन्नतानुभूतिः खपुष्पायिता । बाह्यजगति दृश्यमानभेदेष्वनुस्यूतोऽभेदः । सर्वत्रैतद्दर्शनं भेदबुद्धिप्रतिबन्धकम् । विलीनायां भेदबुद्धौ सर्वत्रैवाभेददर्शनम् । एक-

त्वमनुपश्यतो वर्धत उदारता। तस्य निखिलं कर्म भवति प्रसन्नताप्रेरितम्। कर्मणा अमृतं विन्दति। कर्म यच्च भवति समीहापूर्वकं तदेवोद्वेजकम्। यच्चासमीहितं कर्त्तव्यत्वेनानुष्ठेयं तत्तु औदार्यप्रचोदितमतः प्रसन्नतामूलमानन्दोपलब्धिजनकमिति विवेकः।

८. यस्मान्नास्ति भयं सोऽभयः

संसारेऽत्र समुज्जृम्भते भयसाम्राज्यम्। भयहेतुरविवेकः। यः खलु उद्विजते यश्चोद्वेजयति उभावप्यविवेकिनौ। अविवेकमूला जगत्यशान्तिः। दृश्यं यन्निरन्तरं वियोगाग्निना दंदह्यमानं वर्तते तत्प्राप्तिसमीहैवानर्थमूलम्। न चोपलभ्यते दृश्यं कदापि केनापि' इति वास्तविकतापरिज्ञानविधुराः कथं न कलहायन्ताम्। अग्निकणो यथा न पृथक् अग्नेः, सामुद्रिकतरंगस्य यथा वा अनतिरिक्ता सत्ता समुद्रात् तथैव सर्वे प्राणिनस्तस्यैवैकस्य परमात्मनः अंशभूताः। समुद्रतरंगयो र्मध्ये वायुरिवात्रापि शरीरादीनि सन्त्युपाधिभूतानि। अत औपाधिकं भेदमपहाय वास्तविकैकतादर्शनं कर्त्तव्यं सर्वत्र। ततो न कश्चन भवितुमर्हति द्वेष्टा उद्वेजयिता वा कस्यापि। यस्मान्नासावुद्वेजयिता तदा तस्य कथं जायन्तामुद्वेजयितारः। तस्मात्तस्याभयत्वं निरवद्यम्।

९. त्याज्यः खलसंसर्गः

सुखं दुःखम्, रात्रिः दिनम्, पुण्यं पापमित्यादिवत् खलसज्जनयो र्द्वन्द्वः प्रथितिं गतः। अकारणाविष्कृतवैरदारुणाः खलाः मायामारीचकल्पाः केवलं बहिरेव मनोहरा निरयागताः कटूक्त्या गरलमुद्गिरन्तोऽतर्कितकल्पनीयं मूर्तयन्तः सज्जनजननिसर्गशत्रवो निखिलंशुद्धं वातावरणं विशेषतः शैक्षिकंयज्ञविधानं विनाशयन्तः सार्वत्रिकविकृतिं परिकल्पयन्ति। अनुष्ठेयं नानुष्ठितं स्यात्, सन्तोऽपवादभा गो मरीम्रियमाणाः स्यु र्न च जायेत कस्यापि कदाचन यशो लाभ इति तेषां प्राथमि मुद्देश्यम्। एवं भूताः कालनेमिनिभाः खला विश्वस्यानिष्टायैवोकल्पन्ते। एते समुपेक्षा त्यागो वा हितावहः। तावतैव स्वस्थता निरापदता च स्थास्यतीति वि क ल्पातीतोऽर्थः।

१०. सुखाशा दुःखमूलम्

सुखं सर्वे कामयन्ते। दुःखं नेच्छति कोऽपि कदाचित्। परमनभिलषितमपि दुःखमायात्येव। अभिलषितमपि सुखमपयात्येव। जागतिकानि निखिलवस्तूनि न सुखात्मकानि अपि तु उद्वेजकान्येव। पुत्रधनदारादौ सुखसमीहा तावदेवावतिष्ठते यावत् वर्तेरन् तेऽनुकूलताम्। प्रतिकूलतामुपगतेषु तेषु वैरस्यं दुःखजनकत्वञ्च सर्वानुभवसिद्धम्। सुखन्तु आत्मस्वरूपम्। तस्याभासमात्रं विलसति जगति। अतः आभासानुधावनं कथं न जायतामुद्वेजकम्। मरुमरीचिकायां नोपशान्तिः पिपासायाः।

११. आत्मदोषद्रष्टा एव निर्दोषः

गुणदोषमयीयं सृष्टिः । सच्छास्त्रप्रतिपादिताः सद्भिरनुष्ठिता औदार्यसौजन्य दयादाक्षिण्यादय एव गुणाः । क्रौर्यासूयासहिष्णुतादयोऽसद्भिरुपास्या एव दोषाः । सत्वरजस्तमसां परिणामात्मके जगज्जाले गुणदोषयो र्नान्तरीयकता । सत्प्रकृतिकेषु जनेषु गुणानां भूयस्त्वं दोषाणाञ्चाल्पीयस्त्वं चन्द्रमसि कलङ्क इव । असज्जनेषु क्रौर्यादीनां प्राबल्यं गुणानाञ्चात्यन्ताभावोऽमायां चन्द्रदर्शनमिव । लेशमात्रमपि दोषोऽपाकरणीय इति सज्जनोद्देश्यम् । दैनन्दिनं दोषोपचयः खलप्रकृतिः । यावत् सरलं परकीयं दोषदर्शनम् ततः शतकोटिकठिनं स्वदोषदर्शनम् । इयं प्रवृत्तिरेव जगत्यशान्तिप्रयोजिका । विचेयतारकितं नभ इव दोषलेशाः सज्जनास्तुच्छमपि स्वदोषं परिहर्त्तुकामा नक्तंदिवं प्रयतमाना परकीयं दोषजालं मनसाऽप्यपरिभावयन्तो निर्दोषा एवेति तथ्यम् ।

१२. अभिमानो विनाशमूलम्

विद्याबलं धनं रूपं स्याचेदुपलब्धं तस्य सद्विनियोगो वरम् । दीयतां ज्ञानं विद्यया, रक्ष्यतामरक्षितः शक्त्या, तर्प्यताम् दीनो धनेन, गीयतां सर्वेश्वर प्रदानाय सुरूपम् । एतद् विपरीतमाचरणमनिष्टायैवोपकल्पते । निःश्वासान्ध आदर्श इवाभिमानपूरितान्तः करणे तमसाच्छन्ने कथमुदियात् सद्वृत्तिः । फलतोऽनिवार्यता कदाचरणस्य । ततः प्रतीतिः फलस्य सपत्नजयो वा प्रतिभासमात्रं समूलोन्मूकलमेव । विदित-चरोऽहङ्कारपराणां विनाशः सार्वकालिकः । स्वाभिमानो वरं न तु कदाचन अभि-मानोऽपि । स तु विनाशयत्येवेतिप्रथितचरम् ।

१३. अनन्तरसा ह्यभिन्नता

यतो वा इमानि भूतानि जतानि, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति 'इत्याद्युक्त्या एकस्मादेवेदं वैचित्र्योपेतं वैविध्यम् । तस्मादिष्यतेऽनुभूतिरभिन्नतायाः सार्वत्रिकी । परं दृश्यते वैपरीत्यम् अनुभूयते प्रातिकूल्यम्, पर्यवलोक्यते वैभिन्न्यम्, फलमपीहानिष्टजनकं विपरीतमेवेति शक्यते वक्तुम् । हेतुश्चात्र क इति प्रश्ने बाह्यजगति परिदृश्यमानाऽनेकतैवेति सतामाकूतम् । तिराययति दृश्यमानो भेदोऽन्तर्निगूढमभेदम् । परिणामतः समुद्वेजकता दुरुपपादाऽपाकर्त्तुम् । बहिर्भिन्नता, अन्तश्चाभिन्नता, दृश्यमाना भिन्नता, अदृश्या चाभिन्नता, बहिरशाश्वतिकता, अन्तश्च परमार्थनित्यता, दृश्यमानो भेद औपाधिको न वास्तविकः । सत्यामेवमनुभूतावायात्यनुभवपथमभिन्नताऽनन्तप्राणिपरिप्लुता । ततश्च प्रसादिकाऽनुभूतिरनन्तरसा स्वसंवेद्या ।

१४. अनुपममौषधं प्रातिकूल्यम्

अनुकूलता प्रतिकूलता च सर्वानुभवसिद्धे । अनुकूलतायां प्रसादः, प्रतिकूलतायाञ्चविषादः सार्वजनीनः । अनुकूलताया गमनमागमनञ्च प्रतिकूलताया न भवति

सुखदं किन्तु भवाटवीचंक्रमणप्रयोजिकाया अनुकूलताया दासता तावन्न गच्छति दूरं यावन्नायाति प्रतिकूलता । अनुकूलता हि विमोहयति मानवमनांसि प्रदर्श्यासारमपि ससारवत् । आपाततः सरसे भोगे निमग्ना जननजराव्याधिसमाकीर्णाः सतृष्णा लालाक्लिन्नमुखा व्यादायमुखमितस्ततो वैषयिकमन्विष्यमाणास्तातप्यमाना दैवं कदर्थयन्तो नोपयान्ति लवलेशमपीह शान्तेः कदाचन । प्रतिकूलता हि जननी असंगतायाः प्रदर्शिका असारतायाः, विबोधिका परमार्थतायाः सेव्यते पारदर्शिभिः कैश्चित् पुण्यवद्भिः । असङ्गतामन्तरा नायात्यभिन्नता चिन्मयेन स्वाधीनजीवनेन । एवं प्रतिकूलतैव विकासभूमिः । अनुकूलता तु यदि स्यात् कथञ्चिदौदार्यापादिका तदा वरम् । परं मानवोऽनुकूलतां प्रयुनक्ति स्वात्महिताय केवलम् । ततः शं चिकीर्षया आपादमस्तकं जगज्जालसमाच्छन्नमुपयाति प्रतिकूलता । सा चेदनुमन्येत भवत्येवासौ कल्याणाधायिकेति शास्त्रीयो घोषः ।

जगन्मीमांसा

विविधवैचित्र्योपेतमिदं जगत् । पश्यतु मनाक्-मध्येनभो दृश्यमानोऽयं सूर्यः प्रखरतेजोराशि र्महतां महीयाननवरतं प्रकाशमानो भासयति जगत्स्थलीम् । परितस्तं परिवारयन्ति संख्यातीता नक्षत्रराशयः । को नून्मत्तः समुत्सहेत परिगणयितुं तानि ? एषु कोटयधिकसंख्याकेषु ग्रहेषूपग्रहेषु च प्रत्येकमाकर्षणं विकषर्णञ्चैतादृशं नियमबद्धं यन्न भवत्यतिक्रमो मर्यादायाः कदाचिदपि कथञ्चिदपि । स्वकीयकक्षायां सततं भ्रमन्तो ग्रहा न चोपयान्ति संघट्टमणुमात्रमपि। अप्यहो नियमबद्धता ? अपरमिदं दृश्यताम्— दिवा अम्बरमणितिग्मरश्मिभिः सन्ताप्यमानं जगदिदमाप्लावयति शीतरश्मिर्निजसुधास्यन्दिभिः करनिकरैः । कदाचित् प्रवाति सकलमनुजतनुमनः समीरणः, शीतलो मन्दः सुगन्धो मातरिश्वा चेदसावेव कदाचित् दहनज्वालामालायमानः प्रदहन्निव निखिलभुवनमण्डलं सर्वेषामुद्वेजकः सम्पद्यते । क्वचित् गर्जन्ति अकूपाराः, अपरत्र प्रवहन्ति सरितः, इतरत्र राजन्ते वनानि । एकत्र मरुस्थलं चेदपरत्र शस्यश्यामला मेदिनी । विविधरंगरञ्जितानां शुकपिकमयूरकारण्डवानामपूर्वां शोभां दृष्ट्वा कस्य मनो मुग्धं न भवति ? मनोहारिचित्रकखचितं विस्फार्य पक्षं नृत्यतां मयूराणां केका कस्य मानसं नोत्तरलीकरोति ? यावदेव दृश्यते सर्वत्र नवीनतैव प्रतिपदं दृष्टिपथमवतरति, विचित्रता एव नयनपथगोचरीभवति, अपूर्वता एव परिलक्ष्यते प्रतिक्षणं परिवर्तनमुपगूहमाना । फलतः स्पष्टमेव शक्यते वक्तुं विचित्रमिदं जगदिति ।

एतादृशं वैचित्र्योपेतं जगदिदं सकर्तृकम्, अकर्तृकं वा ? तत्राप्यकर्तृकत्वपक्षे जगतः स्वाभाविकत्वमुत् आकस्मिकत्वमथवा जड़परमाणुपुञ्जैर्निर्मितत्त्वमिति विचिकित्सा । तत्र प्रतिक्षणं परिवर्तनशीलमिदं कार्यत्वात् सकर्तृकं घटवदिति सिद्धान्तपक्षे प्रस्तुतीकृते प्रत्यवतिष्ठन्ते प्रतिपक्षिणः । तत्र केचित्— यदि प्रत्येकं वस्तुनः कश्चनावतिष्ठते कर्त्ता, तदावस्तुत्वेन ईश्वरस्यापि कश्चन कर्त्ताभ्युपेयः । यदि चोच्येत ईश्वरो नापेक्षते कर्त्तारं, तदा विश्वमेव कथमपेक्षतां कर्त्तारम् ? समुद्रस्य कर्त्ता केन दृष्टः ? विशालपर्वतानां निर्माणं केन कृतमिति कोऽन्वपश्यत् ? अतः प्रत्येकं वस्तु सकर्तृकमिति रिक्तं वचः । अत्रोच्यते— वस्तुपदेन पञ्चीकृतस्थूलभूतप्रपञ्चस्य ग्रहणम् । एवञ्च सावयवानि प्रतिक्षणं परिवर्तनपराणि अत एवानित्यानि सूर्यचन्द्रनदीपर्वतादीनि नितरामपेक्षन्तां कर्त्तारं, न तावता वाङ्-मनसयोरगोचरस्यात एव चाक्षुषप्रत्यक्षविषयताशून्यस्य शास्त्रैकमात्रवेद्यस्य जाग्रत्-

स्वप्नसुषुप्तीनां द्रष्टुरन्नाद्यानन्दमयकोशं यावत् सर्वसाक्षिणः सत्तां को नूत्सहेतापलपितुम् ? कथं वासावपेक्षेत कर्त्तारम् ? यदि चाग्रहग्रस्ततया तस्यापि सकर्तृकत्वमित्युदीर्यते, तदा तत्कर्त्तुरपि कर्त्ता, तस्यापि च कर्त्तेति कृत्वा कर्तृपरम्पराया अनवस्था कथं वार्यताम् ? अतोऽन्तिमकारणस्य निष्कर्तृकत्वमेवाभिप्रेतव्यम् । न चैवं जडवादिभिः स्वीकृतजडपदार्थानामेवाकर्तृकत्वमङ्गीकृत्य तत एव जगदुत्पत्तिरिति मन्यतामिति वाच्यम् ? एवञ्चेत् जड़परमाणुसदृशसूक्ष्मतत्त्वस्वीकरणस्य वैयर्थ्यापत्तेः । पृथिवीपर्यन्तमेव पदार्थं स्वीकृत्य तस्याकर्तृकत्वञ्चाङ्गीकृत्य तत एव सर्वोपपत्तेः सम्भवात् । तस्मात् यत्रयत्र स्थूलता, दृश्यता, परिच्छिन्नता, तत्र तत्र कार्यता, तथा यत्र यत्र सूक्ष्मता अदृश्यता, अपरिच्छिन्नता, तत्र तत्र कारणता इत्यवश्यमेवाभ्युपेतव्यम् । स्वीकृते चैवं दृश्यते यत् पार्थिवप्रपञ्चापेक्षया पृथिवी, तदपेक्षया जलम्, ततोऽप्यग्निः, ततो वायुः, तत आकाशम् इत्येवं क्रमेणोत्तरोत्तरं व्यापकता, सूक्ष्मता, अपरिच्छिन्नता च वर्तते । अत एव पृथिव्यां पञ्चज्ञानेन्द्रियविषयाः शब्दस्पर्शरूपरसगन्धाः समुपलभ्यन्ते चेत् जले गन्धहीनाश्चत्वार एवगुणाः । तेजसि च रसहीनास्त्रयः । वायौ च शब्दस्पर्शौ, द्वावेव गुणौ । आकाशे च केवलं शब्द एवैको गुणः । एतेनापि उत्तरोत्तरं व्यापकता सूक्ष्मता च स्पष्टं शक्यते परिलक्षितुम् । आकाशाद् बहिर्नास्ति किमपि वस्तु । तच्च सर्वेषामाधारः सर्वेभ्योऽधिकं सूक्ष्मम् । एवंभूतादाकाशादपि सूक्ष्ममहंतत्त्वं ततो महत्तत्त्वं ततः सूक्ष्ममव्यक्ततत्त्वं, ततोऽप्युत्कृष्टतमं सूक्ष्मतमञ्च निर्गुणं स्वप्रकाशमथ च सर्वेषां प्रकाशकम्, कार्यकारणातीतं परब्रह्मात्मकं तत्त्वं विलसति । तदेव सत्, तदेव चित् तदेवानन्दस्वरूपम् । तत एव सत्तामादाय जागतिकपदार्थाः सत्तावन्तः । तदीयं चैतन्यमवद्योतते सर्वत्र । तस्यैवानन्दसुधासिन्धोरांशिक्यानन्दानुभूतिः सर्वत्र । तमेव भान्तमनुभाति सर्वं, तस्य भासा सर्वमिदं विभाति । यद्यपि स्थूलपिण्डमन्नमयकोशमारभ्यानन्दमयकोशं यावदेव भवत्यनुभूतिविषयः । न चान्यः कश्चन ततो भवति अनुभवपथगोचरस्तथापि एते अन्नमयादयो येनानुभूयन्ते तं को निवारयेत् । यथा आकाशे रूपरसगन्धादीनामभावात् तत्र गुणाल्पता अग्राह्यता, सूक्ष्मता चोपलभ्यते तथैव सर्वेषामधिष्ठानभूतं यत् सूक्ष्मतमं तत्त्वं तस्येन्द्रियावेद्यत्वं कथमिव वार्यताम् । यथा चाक्षुषप्रत्यक्षाविषयमनोमात्रग्राह्यं सुखदुःखादिकं, तथैव सर्वेषां भासकं सूक्ष्मतमं तत्त्वं यत्नसहस्रेणाप्यपलपितुमशक्यम् ।

एतेन सिद्धं यत् सर्वेषां सूक्ष्मतमपरिच्छिन्नं नित्यञ्च तत्त्वं सच्चिदानन्दात्मकं तदेवास्यजगतः कारणम् । एवं स्थिते यदि जगतः कारणमपेक्षितं, चेदसावीश्वरस्तदा तस्यापिकारणेन भाव्यमित्यादयः सर्वे प्रलापाः समूलोन्मूलिताः ।

ईश्वरं बहिष्कुर्वाणाः कतिपये प्रलपन्ति यन्नास्ति कश्चन जगतः स्रष्टा । मयूराणां पुच्छं केन चित्रतम् ? कोकिलानां शब्दे माधुर्यं केन दत्तम् ? अग्नावुष्णता जलेचार्द्रता केन सृष्टा ? न केनापि, अपि तु स्वभाव एवैषाम् ।

परमाणूनां संयोगवियोगाभ्यां जगत्स्वरूपनिर्माणं स्वाभाविकम् । तदुक्तम्—

शिखिनश्चित्रयेत् को वा कोकिलान् वा प्रकूजयेत् ।
स्वभावव्यतिरेकेण विद्यते नात्र कारणम् ।।

(चार्वाक्दर्शनम्)

अत्रेदं जिज्ञास्यते— यदि परमाणूनां स्वभावो जगद्विरचनस्यास्ति, तदा संसारस्य प्रलयः कथमपि न स्यात् । यदि च प्रलयस्वभाववन्तः परमाणवस्तदा सदा प्रलय एव स्यात्, सृष्टिश्च नैव स्यात् । यदि चोभयस्वभावकैः परमाणुभिरुभयं सम्पद्यत इत्युच्यते चेत् सृष्टवस्तूनां कदाचिदपि नाशो न स्यात् । वर्तन्ते तत्र सृष्टिस्वभावकाः परमाणवः । अत एव दृश्यते जगत् । एवञ्चेत् प्रत्यहं जायमानः प्रलयः कथमुपपाद्यताम् ? किञ्च भवदभिमताः परमाणवश्चेतनाः, जड़ाः वाभिमताः ? जडाश्चेत् कथं तेषां संयोगवियोगः ? चेतनमन्तरा जडवस्तुनो रथस्याप्रवृत्तिदर्शनात् परमाणूनां संयोजको वियोजकश्च नूनमङ्गीकरणीयः । स च नामान्तरेणेश्वर एव । एवं जगतो वर्तत आकस्मिकत्वमित्यपि कथनमुपर्युक्तप्रपञ्चेनैव निराकृतम् ।

विवेचनेनानेन सिद्धं यत् परमानन्दस्वरूपात् स्वप्रकाशपरमार्थसत्यात् भगवतः परमेश्वरात् दुःखात्मकं जडात्मकं मिथ्या अपि व्यावहारिकसत्यं जगदुत्पद्यते । न च सुवर्णादुत्पन्नकटकस्य सुवर्णतामिव सत्यादुपन्नजगतोऽपि सत्यत्वमेव युक्तमिति वाच्यम् ? घटापेक्षया सत्यमृत्तिकातो बाध्यघट इव सत्यादपि ब्रह्मणोऽसत्यस्य बाध्यस्य जगतः समुत्पत्तिरित्यभ्युपगमात् ।

इदमत्रावधेयं यत्– जगतो बाध्यत्वेऽपि न तस्य सर्वथा मिथ्यात्वं वक्तुं युक्तम् । वेदान्तदर्शने प्रातिभासिकी, व्यावहारिकी तथा पारमार्थिकीति तिस्रः सत्ताः स्वीकृता वर्तन्ते । रज्जौ सर्पप्रतिभास इव ब्रह्मणि जगतः प्रतिभासः, किन्तु रज्जुज्ञानानन्तरं यथा विलीयते सर्पो न तथा ब्रह्मज्ञानात् विलीयते जगत् । रज्जुसर्पस्थले अधिष्ठानसत्तानतिरिक्तसत्ताकत्वं यथा सर्पे, तथैव ब्रह्मसत्तानतिरिक्तसत्ताकत्वं जगतः सत्वेऽपि तस्य व्यावहारिकसत्यत्वमपलपितुमशक्यम् । अत्रैवानुष्ठीयते सदसत् कर्म, क्रियते यज्ञयागादिकं, सम्पाद्यन्ते विभिन्नाः क्रियाः समुन्नत्यै मानवतायाः । अत एव विधिनिषेधार्थवादवाक्यानि सार्थकतां भजन्ते । अन्यथा सर्वेषां वैयर्थ्यमनिवार्यं भवेत् । अतो जगतो व्यावहारिकसत्यत्वमङ्गीकार्यमेव । किन्तु नैतावताऽस्य पारमार्थिकसत्यत्वं युज्यते वक्तुम् । महता पुण्योदयेन कृततत्त्वसाक्षात्कारस्य ब्रह्माकाराकारितायां चित्तवृत्तौ प्रदग्धायामविद्यायां तत्कार्यात्मकं निखिलमेव ब्रह्माण्डमिदमलीकमेव भवति कस्यचिन्मुक्तस्य कृते । तदानीं ब्रह्मैवावलोक्यते सर्वत्र तस्य कृते, विलीनञ्च भवतीदं रूपं जगतस्तस्येति प्रोच्यते जगतो मिथ्यात्वम् ।

एतेन— 'सर्वं खलु इदं ब्रह्म 'ब्रह्म सत्यं जगन्मिथ्या, जीवो ब्रह्मैव नापरः' इत्यादिश्रुतिवाक्यं कटाक्षयन्तो ये वदन्ति– यदा सर्वं ब्रह्मैव तदा मनुष्यपशुपक्षिकीटपतंगादयः, स्त्रियः कन्याभगिन्यादयो वा व्यवहाराः कथं निष्पद्येरन् ? कथं वा पुण्यपापव्यवस्था ? का नीतयः काश्चानीतय इति वक्तुं कथं प्रभवो वेदान्तिनः ? सहस्राधिकवर्षेभ्यश्चाक्षुषप्रत्यक्षविषयस्यास्य जगतोऽसत्यत्वकथनमुपहासास्पदमेव । रज्जुसर्पस्थले न हस्तगतो भवति सर्पः किन्त्वत्र तु मोदकादिभि र्बुभुक्षाशान्तिर्भवत्येव । न च मिथ्यावस्तूनि कार्यकराणि सम्पद्यन्ते । तस्मात् जगतो ब्रह्मरूपत्वं मिथ्यात्वं वा सर्वं प्रलापमात्रमिति वदन्तः पराकृता एव वेदनीयाः । यतो हि सत्यत्वं नाम त्रिकालाबाध्यत्वम् । न च जगत् त्रैकालिकं सत्यं, प्रतिक्षणं परिवर्तनशीलस्यास्य कदाचित् प्रलयविषयत्वस्यापि श्रुतत्वात् । न च 'ब्रह्म सत्यम् जगन्मिथ्या, 'ब्रह्म द्रष्टृ जगत् दृश्यम्' ब्रह्म चेतनम् जगत् जडम्' 'ब्रह्म अविनाशि, जगत् विनाशि' इत्येवं पार्थक्ये जागरूके 'सर्वं खलु इदं ब्रह्म' इति कथनं कथं संगच्छेदिति चेच्छृणु– इमं विरोधं परिहर्तुमेव जगतो मिथ्यात्वं स्वीक्रियते । जगदिदं ब्रह्मण्यध्यस्तम् । अध्यस्तवस्तुनः स्वकीयसत्ता न भवति, किन्तु अधिष्ठानसत्तयैव सत्तावत् तत् । रज्जुसर्पस्थले रज्जुरदृश्यः सर्पश्च दृश्यः । तथैव ब्रह्म अदृश्यम् जगच्च दृश्यम् । तत्र च यथा वास्तविकज्ञाने सर्पो विलीयते रज्जुश्चावशिष्यते तथैव जाते तत्त्वसाक्षात्कारे जगत् विलीयते ब्रह्मैवावशिष्यते । न चैतावता जगतो व्यावहारिकत्वं वार्यते, तेन सर्वे व्यवहाराः सुलभाः सम्पद्यन्ते । तस्मात् जगतो व्यावहारिकत्वेऽपि मिथ्यात्वं साधूपपादितं भवति !

तत्त्वमस्यादिवेदान्तमहावाक्यजन्यब्रह्माकाराकारितायां चित्तवृत्तौ सम्पन्ने आत्मतत्त्वसाक्षात्कारे तद्विषयकमज्ञानं पूर्वं निराकृतं भवति । तादृशे अज्ञाने निवृत्ते तत्कार्यात्मकश्चेतनाचेतनाध्यासो निवर्तते । ततस्तन्मूलकः कर्तृत्वाभिमानोऽनात्मसु ममत्वादिकश्च निवर्तते । ततः स्थूलशरीराधिष्ठानकं क्रियमाणं कर्म तथा आविद्यिककारणशरीराधिष्ठानकं संचितं कर्म च विनष्टं भवति । 'प्रारब्धकर्मणां भोगादेवक्षयः' इति कृत्वा केवलं तदेवावशिष्यते, यच्च भुज्यते ज्ञानिभिरपि । ज्ञानिनां क्रियमाणं कर्म भर्जितबीजमिवाप्ररोहकमिति सर्वकर्मणामुपशमाज्जायते दुःखस्यात्यन्तिकी निवृत्तिरिति 'जीवो ब्रह्मैव नापरः' इति सदुक्तिराञ्जस्येन संगता भवति ।

ख्यातिविमर्श:

ख्यातिवादो भारतीयदर्शनेषु परां प्रसिद्धिं गतो नूनमावर्जयति चेतांसि कृतविद्यानामिति प्रस्तूयते तदीयं तत्त्वं मोदाय बुधाम् । तत्र 'ख्या प्रकथने' इत्यस्मात् धातोः स्त्रियां भावे च क्तिनि निष्पन्नः ख्यातिशब्दः कथन-वाचक एव सम्पद्यते तथापि धातूनामनेकार्थत्वात् अत्र ख्यातिशब्दो भ्रमात्मकं ज्ञानं प्रत्याययति । स्वस्वदर्शनानुसारं भ्रमविषयपदार्थान् विवेचयितुं तत्तत्ख्यातिवादस्तत्तत्कृतान्तेषूपवर्णितः ।

ख्यातिर्नाम भ्रमज्ञानम् । भारतीयदर्शनानुसारम् अनुभवस्य द्वौ भेदौ यथार्थोऽयथार्थश्च । यथार्थज्ञानं प्रमा इत्युच्यते । अयं च तद्धर्मवति तत्प्रकारकोऽनुभवः । रजतत्ववति रजते इदं रजतमिति प्रतीतिसाक्षिकं 'ज्ञानं यथार्थज्ञानम्' । रजतत्वाभाववति रजतत्वप्रकारकं ज्ञानं हि अयथार्थज्ञानम् । अयथार्थज्ञानस्य संशयविपर्ययतर्क इति त्रयो भेदाः । एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यबोधकं ज्ञानं संशयः । स्थाणौ स्थाणुत्वप्रकारकः पुरुषत्वप्रकारको वा स्थाणुर्वा पुरुषो वेति विकल्पः संशयः । मिथ्याज्ञानं विपर्ययः । यथा शुक्ताविदं रजतमिति दोषसहितस्य नेत्रस्य रजतत्वेन सह सम्बन्धात् प्रतीयते । अत्र यद्यपि शुक्तित्वेन सह नेत्रस्य संयुक्तसमवायसन्निकर्षस्तथापि दोषवशात् शुक्तित्वस्य भानं न भवति किन्तु शुक्तौ रजतत्वं भासते । व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा यदि वह्निर्न स्यात् तदा धूमोऽपि न स्यात् । अत्र वह्न्यभावो व्याप्यः, धूमाभावश्च व्यापकः । अत्र व्याप्येन वह्न्यभावेन व्यापकस्य धूमाभावस्य आरोपः क्रियते इति तर्कज्ञानमिदम् ।

एषु त्रिषु ज्ञानेषु विपर्ययज्ञानमेव भ्रमपदेन व्यवह्रियते । अयमेव भ्रमः प्रस्तुतलेखे ख्यातिपदेन गृहीतो वर्तते । तत्र ख्यातिभेदास्तत्तच्छास्त्रकारैः परिकल्पिताः सन्ति येषु मुख्यास्त्विमे—

> आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।
> तथानिवर्चनीयख्यातिरित्येतत् ख्यातिपञ्चकम् ॥

तत्रात्मख्यातिः विज्ञानवादिनो बौद्धस्य मते स्वीकृतास्ति । एतन्मते क्षणिकविज्ञानमेवात्मा । इदञ्चान्तरम् । बाह्यरजतादयस्तस्यैवात्मनो धर्माः रजतादीनां बाह्यसत्ता तु अलीकप्राया । इन्द्रियादिदोषवशात् आन्तरं विज्ञानरूपमात्मैव बहिः

प्रतीयते रजतादिरूपेण। बौद्धसम्प्रदाये शून्यवादिनमतिरिच्यान्येषां बौद्धानां मते सर्वेषां पदार्थानां विज्ञानरूपतया आन्तरत्वे नास्ति वैमत्यम्। प्रकारेणामुना विज्ञानात्मा अधिष्ठानं खलु आन्तरस्य रजतस्य। आन्तरं रजतन्तु तदीयो धर्मः दोषजा चेयं रजतस्य बाह्यप्रतीतिः ज्ञानद्वारा विनश्यति। रजतस्यस्वरूपतो बाधस्तु तत्र नैव भवति। अनिर्वचनीयख्यातौ तु ज्ञानेन रजतरूपस्य धर्मिणः, तथा तस्येदन्ता रूपबाह्यवृत्तेश्च बाधनं भवति। मतेऽत्र मृगमदवासनावासितवसन इव पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रमणात् नानुपपत्तिः स्मरणस्यापि।

किन्तु मतमिदमयुक्तम्। यतोहि रजतमान्तरमिति न भवति प्रत्ययः कस्यचिदपि। यदि सुखादिकमिव रजतमपि आन्तरं स्यात् तदा मयि रजतम्, अहं वा रजतमित्येव जायेत प्रतीतिः नतु इदं रजतमिति। तस्मान्मतमिदं बुद्धेः पन्थानं नारोहति।

इदानीं प्रस्तूयते-असत्ख्यातिविवेचनम्। अत्र असतः ख्यातिरिति षष्ठीतत्पुरुषसमासः। न तु कर्मधारयः चतुर्थ्याद्यन्यतमः तत्पुरुषो वा ? तथा सति सर्वथैवानवस्थापत्तेः। असत्ख्यातिवादिषु प्रथमः शून्यवादी माध्यमिको बौद्धः। तन्मते सकलपदार्थः शून्यरूपः। तस्मात् शुक्तिरपि असत्, रजतमपि असत्। तस्मादसदधिष्ठाने असदेव रजतमवभासते। अतोऽत्र निरधिष्ठानो भ्रमः। अत्र च ज्ञाता ज्ञानादिकञ्च सर्वमसदेव। असत्प्रकाशनशक्तिमती या वासना सा स्वयमसत्स्वरूपापि सत्सदृशी प्रतीयते। यथा स्वप्ने असत्पदार्था एव भासन्ते तथैवासत्प्रकाशनशक्त्या अविद्यया संवृत्त्यापरपर्यायया असत्प्रपञ्चोऽयं सदिव प्रतीयते। अतः असत्यां शुक्तौ रजतस्य प्रतीतिरेवासत्ख्यातिः। एतन्मते अहमर्थोऽपि शून्य एव कल्पनामात्रं केवलम्। येन स्वभावेन निरस्तसमस्ताविद्यावासना बौद्धाः पञ्चस्कन्धान् न पश्यन्ति तदेषां परमार्थसत्यम्। तच्च शून्यतारूपमिति शून्यवादस्याधारशिला।

परन्तु शून्यवादोऽयुक्तः। यतो हि सर्वत्र शून्यत्वस्य सत्त्वेन सर्वव्यवहारापलापापत्तेः। यदि शून्येऽपि व्यवहारः स्यात् तदा जलस्य प्रयोजनमग्निना, अग्नेः प्रयोजनञ्च जलेन निष्पद्येत। अग्निजलं न सत्यं नापि मिथ्याभूतं किन्तु सर्वत्रगं शून्यरूपमेव। न च तत्र काचिद् विशेषताऽस्ति। अस्ति चेत् शून्यवादस्यैवोच्छेदः।

अपरेऽसत्ख्यातिवादिनः सन्ति केचन तान्त्रिकाः। एषां मते शुक्त्यादयो व्यावहारिकपदार्था न सन्ति असन्तः, किन्तु भ्रमज्ञानस्य विषयो रजतादिरेवासन्। अतो व्यावहारिकरजतादयः सत्यभूताः स्वस्वदेशेषु वर्तमानाः सन्ति। न च शुक्त्या सह तदीयः कश्चन सम्बन्धः। अत्र मते अन्यथाख्यातिवत् शुक्तौ रजतत्वस्य

प्रतीतिर्न भवति। न वा अनिर्वचनीयरजतमेवोत्पद्यते। नवा अख्यातिवादवदत्र ज्ञानद्वयमेव जायते। न च शून्यवाद इव ज्ञाताज्ञानादिकं चासत्। परन्तु शुक्तिः तदीयज्ञानं, ज्ञाता चैतत्सर्वमपि सदेव। यदा दोषसहितं नेत्रं युज्यते शुक्त्या सह तदा शुक्तिदेशे रजतस्य प्रतीतिर्भवति। न च भासते तदानीं शुक्तिरपि कदाचित्। यद्यपि अन्यथाख्यातौ अपि शुक्तौ असतो रजतस्य प्रतीतिः स्वीकृता तथापि देशान्तरस्थस्य सत्यरजतस्य रजतत्वं शुक्तौ स्वीकृतमस्ति। अत्र च देशान्तरस्थरजतवृत्तिरजतत्वं शुक्तौ न स्वीकृतमस्ति। अत्र मते भ्रमज्ञानस्य विषयो न शुक्तिः, न वा रजतम्। यदि शुक्तिः विषयः स्यात् तदा इयं शुक्तिरिति प्रत्ययः स्यात्। न च भवति तथेति न शुक्तिः भ्रमज्ञानविषयभूता। न वा रजतमेव तथा, पुरोवर्तिदेशे तस्यासत्त्वात् देशान्तरस्थेन सह नेत्रस्य संयोगाभावात्। तस्मात् रजतभ्रमस्य निर्विषयत्वात् असद्गोचरमिदं ज्ञानमसत्ख्यातिरित्युच्यते।

अपरे न्यायवाचस्पत्यकारादयो वदन्त्येवम्— शुक्त्या सह नेत्रसंयोगात् यत्र जायते रजतभ्रमः, तत्र रजतभ्रमस्य विषयः शुक्तिरेव भवति, किन्तु दोषवशात् तत्र शुक्तित्वं तदीयः सम्बन्धश्च न भासते समवायः किन्तु शुक्तौ रजतत्वसमवायोऽसन् अपि प्रतीयते। अत इयमसत्ख्यातिः। रजतत्वप्रतियोगिकः शुक्त्यनुयोगिकः समवायः सर्वथैवाप्रसिद्धः असन् चास्ति। रजतत्वप्रतियोगिकः समवायो रजतानुयोगिक एव भवति। शुक्त्यनुयोगिकः समवायः शुक्तित्वप्रतियोगिक एव भवति। शुक्त्यनुयोगिकः रजतत्वप्रतियोगिकश्च समवायः सर्वथैवाप्रसिद्धः। तस्मात् प्रतीतिरियमसत्ख्यातिरिच्युच्यते। प्रकारेणामुना त्रिविधेयं ख्यातिः। शून्यवादिनो निरधिष्ठानरूपा प्रथमा। तान्त्रिकरीत्या शुक्तिरूपमधिष्ठानं स्वीकृत्यासतो रजतस्य प्रतीतिरूपा द्वितीया। सदधिष्ठानभूतायां शुक्तौ असतो रजतत्वस्य समवायप्रतीतिरूपा तृतीया। परञ्चैतदयुक्तम्। यतोहि भवत्यत्र जिज्ञासा कोऽयमसत्पदार्थः ? अबाध्यविलक्षणः ? निः स्वरूपरूपो वा ? यद्युच्यते असत्पदार्थो निःस्वरूपस्तदा मम मुखे जिह्वा नास्तीतिवत् सत्तास्फूर्तिशून्यस्य निःस्वरूपत्वेन सोऽपि प्रतीयत इति असत्ख्यातिशब्दार्थः स्यात्, यश्च सर्वथैवासंगतः। सत्तास्फूर्तिशून्यः कथमिव भासेत ? यदि चाबाध्यविलक्षणोऽसत्पदार्थस्तदा तस्य बाध्यत्वेनानिर्वचनीयख्यातेरेव पक्षः समायाति। तस्मात् पक्षोऽयमसंगत एव।

अख्यातिस्तु— प्रभाकरमीमांसकस्य मते स्वीक्रियते। एतन्मते शुक्ताविदं रजतमिति ज्ञानं न भ्रमः किन्तु यथार्थज्ञानम्। इदञ्च नैकं ज्ञानं किन्तु इदन्तावगाहि इदमिति प्रत्यक्षम्। रजतमिदमिति तु पूर्वदृष्टस्य रजतस्यस्मरणम्। तत्रेदमा पुरोवर्तिनो द्रव्यमात्रस्य ग्रहणं, तत्र वर्तमानस्य शुक्तित्वस्य च दोषवशादग्रहणम्। पुरो गृहीतं यद् द्रव्यं तत् रजतसदृशमिति रजतसंस्कारस्योद्बोधकं सत् रजतस्मृतिमुत्पादयति। अत्र रजतत्वस्येदं पदार्थेनासंसर्ग एव। तथापि असंसर्गस्याग्रह एव

भवति। तेन च भवति प्रवृत्तिरपि । एवञ्चाग्रह एवाख्यातिरत्रमते। अथवा ज्ञानद्वयस्य विषययोः विवेकाख्यातिबलादत्र भ्रमत्वव्यवहारः।

परं मतमिदमपि न युक्तिसंगतम् । यतो हि यदीदं ज्ञानं प्रमात्मकमित्यभ्युपेयते तदा शुक्तौ रजतबुद्ध्या प्रवृत्तस्य रजतानुपलब्धौ, मरुमरीचिकायां वा जलबुद्ध्या प्रवृत्तस्य वा जलानुपलब्धौ मामकीनं ज्ञानमिदं भ्रमात्मकमिति सार्वजनीनानुभवस्यापलापः स्यात् । किञ्चात्रमते भ्रमात्मकज्ञानस्याभावात् शुक्ताविदं रजतं तथा सत्यरजते इदं रजतमिति ज्ञानद्वयं समानमेवेति-यथा शुक्तिस्थले इदंपदार्थरजतपदार्थयोरसंसर्गाग्रहात् प्रवृत्तिर्भवति, तथा सत्यरजतस्थले संसर्गाग्रहात् निवृत्तिः कथं नेति प्रबलो दोषः। अपरञ्चानिच्छताऽप्यत्रमते भ्रमात्मकं ज्ञानं स्वीकार्यं भविष्यति । यतो हि वह्निव्याप्यधूमेन वह्न्यनुमितिवत् 'यत्र 2 रजतत्वं तत्र 2 इष्टसाधनत्वमिति व्याप्तिबलात् 'शुक्ताविदं रजतमिति स्थले व्याप्यस्य हेतोः रजतस्यासम्बन्धज्ञानाभावात् इदंपदार्थात्मके पक्षे सामग्रीबलात् इच्छां विनैव इष्टसाधनत्वस्य भ्रमात्मिकानुमितिर्जायते एव । इष्टसाधनत्वाभाववत्यां शुक्तौ इष्टसाधनत्वप्रकारकं ज्ञानं भ्रम एव। तस्मात् मतमिदमनेकशंकाच्छन्नमेव। अन्यथाख्यातिस्तु नैयायिकानां मतेऽस्ति । एतन्मतानुसारं यस्य वस्तुनः अनुभवजन्यसंस्कारो यस्य पुरुषस्य भवति तस्य दृष्टरजतस्य पुरोवर्तिन्यां शुक्तौ दोषवशात् रजतत्वमवभासते । अयं चावभासो रजतानुभवसंस्कारसमुद्भूतः । अतः शुक्तिरवभासते रजतवत् । अन्यस्य वस्तुनोऽन्यथाप्रतीतिरेवान्यथाख्यातिः । परं मतमिदमप्यमनोरमम् । यतो हि दूरस्थस्य रजतस्य रजतत्वं शुक्तौ कथमवभासते ? मानसं स्मरणं स्यान्नाम रजतत्वस्य शुक्तिं दृष्ट्वा, किन्तु स्मृतं रजतत्वं शुक्तौ भासत इत्यत्र विनिगमनाविरहः । नेत्रस्य संयुक्तसमवायसन्निकर्षमन्तरा शुक्तौ रजतत्वभानं प्रत्यकिंचित्करत्वात् ।

अनिर्वचनीया ख्यातिस्तु अद्वैतवेदान्तिनां मतानुसारं स्वीकृतास्ति । एतदनुसारं शुक्ताविदं रजतमित्यत्रासच्चेद् रजतं तदा शशशृङ्गवन्न प्रतीयेत । सच्चेत् सति ज्ञाने आत्मवन्न बाध्येत । सदसत्त्वञ्चैकस्य व्याहतमेवेति अनिर्वचनीयमेव रजतं शुक्त्यवच्छिन्नचैतन्ये । एवमेव ब्रह्मणि प्रतीयमानमिदं जगत्, न सत्, नाप्यसत् । सच्चेत् न बाध्येत । असच्चेत् न प्रतीयेत । सदसदत्त्वञ्चैकस्य सर्वथा विरुद्धमसंभवि । तस्मादनिर्वचनीयख्यातिरभिप्रेयते । मतस्यास्यायं सारांशः—स्वप्ने सकलपदार्थाः साक्षिभास्याः, तथापि तत्र चाक्षुषत्वराशनत्वादयो धर्मा भासन्त एव । तथैव अनिर्वचनीयपदार्थाः रज्जुसर्पादयोऽपि साक्षिभास्या भवन्ति तत्र चाक्षुषत्वप्रतीतिर्भ्रमरूपैव जायते । वस्तुतस्तु अनात्मभूताः सर्वे पदार्थाः साक्षिभास्याः । तत्रानात्मभूतेष्वहंकारादिषु नात्मस्वरूपाध्यासः किन्तु तदीयस्य सम्बन्धस्यैवाध्यासो भवति। आत्मनि च मिथ्यात्मकस्य प्रपञ्चस्यस्वरूपाध्यासो जायते।

यथा शुक्तौ रजतस्वरूपाध्यासः, रजते च शुक्तिसम्बन्धाध्यासः । अयमेव सत्यमिथ्याख्यावभासशब्देनाप्युच्यते । ज्ञानद्वारा एतस्य बाधपुरःसरं भवत्यात्मसाक्षात्कार इति वैदान्तिकी प्रक्रिया साधीयसीति संक्षेपः ।

शुद्धिपत्रम्

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
10	16	दरीदृश्यते	दरीदृश्यन्ते
13	21	निम्नाभिः	निम्ननाभिः
32	29	त्थत्र	त्यत्र
43	20	रूपमेदाद्	रूपभेदाद्
50	13	लोहितोष्णीत्व	लोहितोष्णीषत्व
54	19	अत्रोदाहररेष्व	अत्रोदाहरणेष्व्
63	4	इति इति	इति
75	29	भुंङ्क्ते	भुङ्क्ते
78	17	उपयुक्तेषू	उपर्युक्तेषू
107	16	एकाथीभाव	एकार्थीभाव
108	5	सूत्रे	सूत्रै
109	27	वर्मत्वम्	कर्मत्वम्
110	20	धात्वर्थतावच्छेदक ।	धात्वर्थतावच्छेदक
111	14	अपादानम्ः	अपादानम्
112	16	कर्मत्वम्ः	कर्मत्वम्
118	23	कारणादिदं	करणादिदं
118	27	शब्देन्दुक्षेरवरः	शब्देन्दुशेखरः
122	7	प्रत्यः	प्रत्ययः
128	5	तृतीथ	तृतीय
130	5	सूत्रे	×
130	13	निषेव	निषेध
130	14	समास्य	समासस्य
130	15	तत्त	तत्तु
131	23	ह्युक्तम्	ह् युक्तम्
136	21	प्रत्यायति	प्रत्याययति
145	8	प्रसंग	प्रसंगः
148	10	सध्बन्धेन	सम्बन्धेन

165	11	प्रधान्य	प्राधान्य
173	4	विवध	विविध
173	5	भे	भेदो
175	21	पवादभा	पवादभाजो
175	22	प्राथमि	प्राथमिक
176	17	समूलोन्मूकलमेव	समूळोन्मूलकमेव

VN/1733
R.K.S. VIDYAPEETHA
JAMMU
Book No. 22576
Call No..